IMPACT FACTOR : 2.995

ISSN : 2249 - 2313

षाण्मासिकी संस्कृतशोधपत्रिका

Half Yearly Peer Reviewed Sanskrit Research Journal

Vol. XIII April, 2020 - September, 2020 Issue No. 1

वर्षम् १३ अप्रेल २०२० - सितम्बर २०२० अङ्कः - प्रथमः

# प्राचीसुधा

# PRACI SUDHA

**A NATIONAL PEER REVIEWED HALF-YEARLY SANSKRIT RESEARCH JOURNAL**

"प्राचीसुधा" सुललिता बहुशास्त्रतत्त्व-
पूर्णा जगज्जनहिताऽखिललोकमान्या ।
आध्यात्मिकीं सुखकथां परिवेषयन्ती
संराजतां निरभिमानबुधेषु नित्यम् ।।

सम्पादकः सञ्चालकश्च

प्रो. विश्वनाथस्वाईँ

सहसम्पादकाः

डॉ.युधिष्ठिरसाहुः

डॉ. विघ्नेश्वरमिश्रः

पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्, पुरी, ओडिशा

PURUSOTTAM RESEARCH ACADEMY OF INDOLOGY

SARVODAYA NAGAR, PURI - 752002, ODISHA

Website : www.pracisudha.in

IMPACT FACTOR : 2.995 PRACI SUDHA ISSN 2249 - 2313
A NATIONAL PEER REVIEWED HALF-YEARLY SANSKRIT RESEARCH JOURNAL

# पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्

**Purusottam Research Academy of Indology**
Sarvodaya Nagar, Puri - 752002 (Odisha)
E.mail: Pracisudha2013@gmail.com

**संरक्षका:**
श्रीमहन्तः डॉ.वृन्दावनविहारिदासकाठियाबाबामहाराजः, सुखचरः कोलकाता
श्रीमहन्तः श्रीरामकृष्णदासमहाराजः, पुरी
श्रीमहन्तः श्रीश्रीनिवासदासमहाराजः, पुरी
त्रिदण्डी स्वामी भक्तिस्वरूपश्रीधरमहाराजः, पुरी
स्वामी श्रीत्र्यम्बकेश्वरमहाराजः, काशी

**परामर्शदातृमण्डलम्**
प्रो.अलेखचन्द्रषडङ्गी(पूर्वकुलपतिः), प्रो.अद्वैतचरणधलः,
महामहोपाध्यायः द्वारिकानाथत्रिपाठी, प्रो.गङ्गाधरपण्डा(पूर्वकुलपतिः),
प्रो.प्रफुल्लकुमारमिश्रः(पूर्वकुलपतिः), प्रो.चन्द्रशेखरमिश्रः,
प्रो.विन्ध्येश्वरप्रसादहिमांशुः, प्रो.ललितकुमारसाहुः, श्रीज्ञानेन्द्रत्रिपाठी,
डॉ.पूनमलखनपाल, प्रो.नागवरप्रसाद राव चन्द्रपाटी,

**पुनरीक्षणसमिति: (PEER REVIEW COMMITTEE)**
महामहोपाध्यायः प्रो.सुधाकराचार्यत्रिपाठी, चौ.च.वि.वि., मेरठ (यू.पी.)
प्रो.विक्रमकुमारः, पञ्जावविश्वविद्यालयः, चण्डीगड़
प्रो.सरोजकौशलः, जयनारायणव्यासविश्वविद्यालयः, जोधपुर (राजस्थान)
प्रो.कमलेश सि चोक्सि, अहमदाबादविश्वविद्यालयः, अहमदाबाद (गुजरात)

**सम्पादकमण्डलम्**
प्रो.प्यारीमोहनपट्टनायकः, प्रो.हरेकृष्णमहापात्रः,
प्रो.सूर्यमणिरथः, डॉ.कान्हुचरणपण्डा, डॉ.निर्मलापाणिग्राही, डॉ.शत्रुघ्नपाणिग्राही
प्रो.प्रभातरञ्जनमहापात्रः, डॉ.वसन्तकुमारमिश्रः, प्रो.विश्वनाथस्वाईँ

**सम्पादकः सञ्चालकश्च**
प्रो.विश्वनाथस्वाईँ

**सहसम्पादकाः**
डॉ.युधिष्ठिरसाहु
डॉ. विघ्नेश्वरमिश्रः

IMPACT FACTOR : 2.995 PRACI SUDHA ISSN 2249 - 2313
A NATIONAL PEER REVIEWED HALF-YEARLY SANSKRIT RESEARCH JOURNAL

पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्
Purusottam Research Academy of Indology
Sarvodaya Nagar, Puri - 752002 (Odisha)
E.mail: Pracisudha2013@gmail.com



## सम्पादकीयम्

ॐ "भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः" इति वाग्विज्ञानी गोतमो राहूगणः (ऋक्. १.८९.१) ।
अथात्र राजते आत्मेन्द्रियमनोभूषितः भोक्तृपुरुषः । अनन्त एष जीवात्मा असाधारणबुद्धिमति मनुष्यगणे प्रफुल्लतापूर्वकं विद्यमानः । कर्मसम्पादनार्थी मनुष्यः स्वभावप्रकाशनिमित्तं सङ्केतमाध्यमेन यां व्यवहरति सा वाक् भाषा वा इति कथ्यते । वाक् सर्वशक्तिकरुणाप्रसूता। भवति "आत्मतो वाक्" इति छान्दोग्यश्रुतेः । " वाग् वै ब्रह्म" इति वृहदारण्यकश्रुतेश्च। वाक् खलु तेजोमयी । मनुष्यः वैखरी-वाक्प्रकाशने समर्थः "तुरीयं वाचो मनुष्या वदन्ति" इति ऋक्श्रुतेः । मनोवाक्कायकर्मणां परस्परं सम्बन्धः सुविदितः "यन्मनसा ध्यायति तद्वाचा वदति" इत्यादि शतपथश्रुतेः । वाक् सर्वदा मनोऽनुसारिणी प्रवर्त्तते "मन एवास्यात्मा वाग्जाया" इति वृहदारण्यकश्रुतेः । मनोनियन्त्रणं सत्यभाषणस्वाध्यायाध्ययनसात्त्विकान्नसेवनयोगाभ्यासैः सम्भवति । शुद्धे मनसि तदनुरूपा वाक् प्रवर्त्तते । अत एव "इदमहमनृतात् सत्यमुपैमि" इति शुक्लयजुर्वेद उद्घोषयति । सत्यव्रतपरायणा अध्ययनाध्यापनप्रवीणा मेधाविनः शोधार्थिनश्चात्र शोभमानाः । इन्द्र = इन्द्रियसंयमरूपादर्शगुणपरेन्द्रद्युम्नभूमिः अस्माकम् उत्कलदेशः । एवं सति "वाच्यर्था नियताः सर्वे वाङ्मूला वाग्विनिःसृताः" इति स्मृतिमनुसरतां वाग्व्यवहारकुशलानां विगतमत्सराणामेतेषां रचनाकाराणां शोधपूर्णरचना अत्र विलसन्ति । एता रचना यथा -नैम्बार्को जगन्नाथः, पाणिनिदिशा सङ्गतपदविमर्शः, उपनिषदां साररसरूपं गीतामृतम्, अग्निदर्शनं चेत्यादयः । पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानस्य परिवीक्षितायां षाण्मासिकिसंस्कृतशोधपत्रिकायां **प्राचीसुधा**याम् एता अधुना प्रकाशिता इत्ययं प्रमोदावसरः। **प्राचीसुधा**संस्कृतशोधपत्रिकाया अयं पञ्चविंशतितमबिन्दुः । (वर्षम् -१३, अङ्क-१, अप्रेल-२०२०– सितम्बर-२०२०) । सर्वप्रकाशकारणभूतः नीलाद्रिनाथः श्रीजगन्नाथः अनेन प्रकाशनेन प्रसीदतु इति ॐ ।

विदुषामनुचरः
**विश्वनाथस्वाईं**
**सम्पादकः सञ्चालकश्च, प्राचीसुधा**
**तथा च महासचिवः,**
**पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्, पुरी, ओडिशा**

**श्रीजगन्नाथपुरी**
**३०.०९.२०२०**

IMPACT FACTOR : 2.995 PRACI SUDHA ISSN 2249 - 2313
A NATIONAL PEER REVIEWED HALF-YEARLY SANSKRIT RESEARCH JOURNAL
त्रयोदशवर्षम् प्रथमसंख्या

# विषयसूची


| क्रमाङ्काः | लेखकाः | विषयाः | पृष्ठाङ्काः |
|---|---|---|---|
| १. | प्रो.विश्वनाथस्वाइँ | सम्पादकीयम् | २ |
| २. | डॉ.पूनम लखनपाल | नैम्बार्को जगन्नाथश्च | ४-५ |
| ३. | डॉ. युधिष्ठिरसाहुः | पाणिनिदिशा सङ्गतपदविमर्शः | ६-१० |
| ४. | संगीताराणी विश्वाल | संस्कृतवाङ्मये श्रीपुरुषोत्तमचरितम् | ११-१५ |
| ५. | सञ्जीवकुमारदाशः | "गीतगौरीपति"पर्यालोचनम् | १६-२० |
| ६. | महेश्वरवागः | व्याकरणवाङ्मये शक्तिः | २१-२४ |
| ७. | डॉ.शुभमयपाहाड़ी | वेदान्तसम्प्रदायेषु अचिन्त्यभेदाभेदसिद्धान्तः | २५-३५ |
| ८. | नीलाम्बरबाघः | राजनीतिज्ञा द्रौपदी | ३६-३९ |
| ९. | अशोकमण्डलः | किरातार्जुनीयदिशा शिवतत्त्वविमर्शः | ४०-४४ |
| १०. | डॉ. बी.उमामहेश्वरा | तालपत्रग्रन्थानां सम्पादनं लिपिदर्शनञ्च | ४५-४९ |
| ११. | डॉ. जितेन्द्रकुमारदाशः | कालिदाससाहित्ये विनोदः | ५०-५३ |
| १२. | डॉ.दयानन्दपाणिग्राही | उपनिषदां साररसरूपं गीतामृतम् | ५४-५८ |
| १३. | मधुस्मिता पाढी | प्रत्ययस्वरूपं तद्भेदाश्च | ५९-६१ |
| १४. | डॉ. नृसिंहनाथगुरुः | श्रीजगन्नाथसंस्कृतौ कलेवरान्तरणम् | ६२-६५ |
| १५. | डॉ.सुरेनकुमारमहापात्रः | अग्निदर्शनम् | ६६- ६९ |
| १६. | प्रो. अनुपमापृष्टिः | माहेश्वरसूत्राणां दार्शनिकतत्त्वानुशीलनम् | ७०-७५ |
| १७. | डॉ.अनिलकुमारदाशः | धर्मशास्त्रे याज्ञवल्क्योक्तदिशा श्राद्धविचारः | ७६ - ७८ |
| १८. | श्रीकृष्णमण्डलः | आगमप्रमाणे भर्तृहरिसिद्धान्तः | ७९-८१ |
| १९. | जुबुलि षढङ्गी | ऐतरेयोपनिषदि सृष्टिक्रमविचारः | ८२-८५ |
| २०. | शुभकान्तबेहेरा | शिवाजीचरितमहाकाव्यम् - एकम् अध्ययनम् | ८६-८९ |
| २१. | सौम्यरञ्जनकरः | प्रश्नवैष्णवे रोगविचारः | ९०- ९३ |
| २२. | चन्दन शतपथी | द्विताया-तृतीया-सप्तमीनामाश्रयार्थविचारः | ९४-९९ |
| २३. | Declaration | | १०० |

# नैम्बार्को जगन्नाथश्च

डॉ.पूनम लखनपाल

नाऽनैम्बार्की प्रचरति सदा पद्धतिः पूजयाढ्या
जागन्नाथी स्वयमिह पुरो जागरूका यथेयम् ।
भेदाऽभेदौ भिदुरभुवने सन्नतौ सन्नतानां
देवानां तौ, जयत इह च प्रांशुलभ्यौ सदैव ।।१।।
विद्याऽविद्ये द्युतिचरणजे नाथमाने समन्ताद्-
वीचिक्षोभाच्छ्रुतिचरणजे श्रोत्ररम्ये सुगीते ।
गोविन्दानां सुमधुरतरैर्गीतलभ्यैः प्रसादैः
प्रीणन्त्यौ ते विशत इह मनो बिन्दुशः श्रोत्रमार्गम् ।।२।।
तीर्णं तीर्णं वितरतितरां तत्प्रसादं तरन्ती
कीर्णं कीर्णं विकिरति करैः कार्यजातं किरन्ती ।
चीर्णं चीर्णं विचरति चरैः चारुचर्यां चरन्ती
कार्पण्यार्द्रा कृपति कृपया तत्कृपा भावरम्या ।।३।।
शैली नाभौ शिलति हि शिला शालिशालां स्मरन्ती
शालिग्रामैः शलति सततं गण्डकीगण्डितेयम् ।
जागन्नाथीं प्रतिशति मुदा दारुरम्यां सुगम्या-
माषाढे सा गुरुगतिचरा द्वादशीमात्ममूर्तिम् ।।४।।
छिन्नं भिन्नं यदि तव मनोऽद्वैतमार्गेण गच्छे-
स्तुन्नं नुन्नं यदि च सततं द्वैतमार्गेण गच्छेः ।
भेदाऽभेदौ विदधति च ये सत्समाधानहेतो-
र्निम्बार्काणां मतमनुसरेर्नित्यमेवाऽत्र तेषाम् ।।५।।

एरण्डाढ्यो भुवि नु रमतेऽद्वैतभावप्रकीर्णो
भारुण्डाढ्यो विलसतितरां द्वैतमात्रप्ररूढः ।
पाखण्डाढ्यो लसति त तथा मार्गहीनः स्वबिम्बो-
ऽभिन्ना भिन्ना इह विदधते निम्बजार्कप्रसिद्धाः ।।६।।
आधानाय प्रचरत समुदं सम्विधानेन लोके
दीनं हीनं भुवि च दयतामुत्सुको ह्युत्कले त्वम् ।
भिन्नोऽभिन्नः सरति सततं साधु संसार एष
प्रान्तारुण्यं तरुणसुलभं प्राप्य निम्बार्करीत्या ।।७।।
दृष्टा मृष्टा स्वरति नु यथेयं जगन्नाथपूजा
सृष्टं श्लिष्टं सृजति हि तथा नो जगन्नाथ एषः ।
श्रान्तः क्लान्तो न भवतु जनोऽत्र स्वरीत्याग्रहाढ्यो
निम्बार्कस्य प्रकृतिसुलभं प्राप्य सत्सम्विधानम् ।।८।।

—०—

*एसो०प्रो० एवं अध्यक्षा, संस्कृतविभागः,*
*आर०जी० पी०जी० कॉलेज, मेरठ, यू.पी*

# पाणिनिदिशा सङ्गतपदविमर्शः

डॉ. युधिष्ठिरसाहुः

व्याकरणं न केवलं लधुनोपायेन शब्दाननुशास्ति अपि च समाजीपयोगानि आध्यात्मिकसांस्कृतिकप्रगतितत्वानि तत्र संकेतमाध्यमेन उपदिशन्ति। तेषामुदाहरणमेव अत्र प्रयाससापेक्ष्यम् । अत्र व्याकरणशास्त्रे संगतपदं यथा पाणिनिनां सूत्रे प्रयुक्तं यद् ततत्त्वबोधार्थं अत्र विचारः क्रियते ।

सम् उपसर्गात् गम् धातोः भावे क्तप्रत्यये 'संगतम्' इति पदं निष्पद्यते । 'संगतम्' अर्थात् सौहार्द्दम्, युक्तियुक्त वाक्यम् या । पाणिनिना अजर्यपदसिद्धौ संगतपदस्य तद्विशेष्य रूपेण गृहितम् । तथाहि -

''अजर्यं संङ्गतम्'' इति पाणिनिसूत्रभूयितव्यम् ।

तत्र नञ् पूर्वकात् जृष् ववोहानौ धातोः कित्रर्थे निपाननेन तदा यत् प्रत्यय यिधौ अर्जनम् । इति शब्दः साध्यते । यदात्स्य विशेष्यत्वेन संगतपदं स्यात् । न जीर्यतोत्यजर्यम्' इति व्यूत्पतौ किमिति आकांक्षा जायते । ततः उच्यते संगतमेव न जीयर्ति । अर्थात् सौहार्दमेव कदापि जीर्णत्वं न धारयति । अनेन सूत्रेण महर्षिपाणिनिः संगतपदस्य महत्वं साधकं वक्ति । यद्यपि यत्प्रत्ययविधिरेव सूत्र प्रणयनाशयः ।

लौकिकाना वैदिकानां च शब्दानां व्याकरणे अनुशिष्यन्ते । अतः लौकिक प्रयोगमभिलक्ष्य सूत्रकारेण पाणिनिना संगत पदप्रयोगतात्पर्यं वीधयितुं संगतपदस्य विशेष्यभावें अजर्य'' शब्दसिद्धौ अनिवार्चत्वेन स्वीकृतः ।

भट्टिकाव्ये सङ्गतम्:-

भरयोजिदीक्षितेन ''अर्जयं सङ्गतम्'' इत्यस्य वृत्तौ भट्टिकाव्ये प्रयुक्तं वचनमुद्दतम् । तथाहि-

''तेन संगतामर्येण रामाजर्यं कुरु द्रुतम्'' । इति भट्टिः अस्यार्थस्तु ''है राम ! तेन आचार्येण साकं शीघ्रम् अजर्यं सङ्गतं कुरु'' इति । अत्राहि सङ्गतपदं सौहाब्दार्थं प्रकटयति तस्य विशेष्यत्वाधारेण ''अर्जनम्'' इति पदं यत् प्रत्यये कृते सति सम्भवति ।

तर्हि प्रश्नजायते यदि सङ्गतपदं विना अजर्यमिति पदं नैब प्रयुक्तव्यम् चेत्

कथं कालिदासेन विना सङ्गतपदं वाक्य विरचितम् तथा हि - तस्मिन् सूत्रवृत्तिप्रसङ्गे भट्टिजिदीक्षिदेनोदा ह्वीयते - ''मृगैरजर्थं जरसौपदिष्टमदेहबधाय पुनर्बबन्ध'' इत्यत्र समाधानार्थं दीक्षितेन कथ्यते ''सङ्गतमिति विशेष्याहारेणाथर्निर्णय: कर्त्तव्य: ।

ननु सङ्गतपदं विना ''जृष्'' धातो: क: प्रत्यय: विधातव्य: इति येदुच्यते -

नन् पूर्वात् 'ज' धातों तृच् प्रत्यये अनुबन्ध्लोपे अर्धधातुकस्येड़ वलादे:' सूत्रेण ''आध्यन्तौटक्कितौ'' परिभाषा साहाय्येन इटि अनुबन्धलोपे ''सार्वधातुकार्धधातुकर्भो सूत्रेण ऋकारस्य गुणे रपरत्वे ''अजरितृ'' इत्यस्य प्रातिपदिकसंज्ञायां प्रथमायां सुविभक्तौ 'अजरिता' इति अपरं रूपं जायते न तु अजर्यम् इति । अपि च दीक्षितेन आकाक्षान्तरमुत्थात्य संशयं संसाधितम् । तत्र हि ''भावे तु सङ्गतकर्त्तृत्वेऽप ण्यदेव । अजार्यं संगतेन'' अर्थात् 'संगतपदम्'' कत्तृत्त्वेऽपि यदि भावोर्थ प्रयुक्ते सति ''ऋहलोयीण्यत्'' सूत्रेण ण्यत प्रत्यये अ ३ृ जृ ३ ण्यत्'' इति जाते ऋकारस्य ''अजोञ्णिति'' सूत्रेण वृद्धौ रपरत्वे ''अजार्यम्'' इति पदं सिद्धयति । अत्र सङ्गतार्थ: प्रत्ययवाचित्वं नादधाति ।

''अजर्यपदसिद्धौ'' सङ्गतपदस्य प्रक्रियात्मकं महत्त्वं कथं वर्त्तते । तद् सूत्रकारेण समुद्घाटितम् । परन्तु लौकिकप्रयोगानां सामाजिकाध्यात्मिकमूल्यवोधानामपिं तात्पर्यं वोधव्यम् । आचरितव्यं चेति सूत्रकारेण तत्रेङ्गितम् ।

प्रोक्तस्य भट्टिकाव्यस्योकस्य तात्पर्यम्:-

रामवणेन सीता यदा अपहृता आसीत् । तत: रामलक्ष्मणौ तामनुसरन्तौ अभिषापवलेन रामचन्द्रेण तस्य हस्तछेदात् प्रकृतस्वरपं संप्राप्य सविनयं परामर्शारूय वचनमुक्तम् । तथा हि -

तेन संगतामार्य्येण रामाजर्य्यं कुरुद्रुतम् ।
लङ्का प्राप्य तत: पापं दशग्रीवं हनिष्यसि ॥

(भट्टिकाव्यम् - ५८ श्लोकसंख्या)

अस्य श्लीकस्यार्थ: तावत् ''है राम ! भवान् शिष्टतापूर्वकं शीघ्रं हि तेन सुग्रीवेण साकं समयोजितं सख्य स्थापयतु । तत: तस्मात् सुहृद्भावात् पापात्मन् रावणस्य वधार्थं समर्थ: भवेत्''

प्रसङ्गेऽस्मिन् मल्लिनाथ कृतेनोद्घाटितस्यास्यश्लोके स्तिथस्य संगतपदार्थस्य

तात्पर्यं नूनूम् अवधेयम् । तथाहि -

''मल्लिनाथः । तेनेति हे राम । आर्य्येण अर्त्तुमर्हेण सङ्गत्यर्हेण । ऋ गतौ 'ऋ हलोण्यत्'' । अर्यस्येदं प्रयुदाहरणम् । तेन सुग्रीवेण । न जीर्यतीति अजर्यमनपायि । ''अर्जयं सङ्गतम्'' इति सङ्गत विषये जीर्य्यतेनञ्पूर्वात्कर्त्तरि यत्प्रत्ययान्तो निपातः । सङ्गतं सङ्गतिं सख्यमित्यर्थः भावे क्तः । द्रुतं क्षिप्रं कुरु । अजर्यमार्यसङ्गतम् । ''अजर्यं नोऽस्तु सङ्गतम् । ''अजर्रिता कम्बलः'' इति वृत्तौ उदाहरणप्रत्युदाहरणयोविशेष्यभावावगमात् अजर्यं सङ्गतमिति तथैव प्रयुक्तम् । कालिदासेन तु पर्य्यायत्वदृट्या 'मृगैरजर्य्यं राजसोऽपदिष्टम्' इति वैकल्येन प्रत्युक्तम् । अथवा तत्रापि सङ्गतमिति शेष इत्यास्तां तावत् । ततः सुग्रीयसंगत्या लङ्कां प्राप्य पापं क्रूरं दशग्रीवं हनिष्यासि''

संगतपदाजरर्यपदयोः विशेष्यविशेषणभावसम्बन्धात् स्नेहीमैत्री प्रीतिरजय्यं समाजने सङ्गतं प्रोक्तम् इति हलायुधः ।

रघुबंशे सङ्गतशब्दार्थः - रघुवंशे सङ्गतपदं सन्यासभावं परामर्शयति । तस्मात् कारणात् प्रोच्यते -

तस्नै विसृज्योत्तरकोसलानां धर्मोत्तरस्तत्प्रभवे प्यभुत्वम् ।
मृगैरजर्यं जरसोपदिष्टरमदेहबन्धाय पुनर्बबन्ध ॥

अर्थात् धर्मात्मा नभःनभनामकं पुत्रम् उत्तरकोशलराज्यभारं प्रदाय स्वयं वार्धक्यकारणादारण्ये मृगौं साकं सङगतं संस्थापितवान् । अत्र मृगैः साकं सङ्गतकारणेन संसारजन्मचक्रान्त मुक्त्यर्थं वैराग्याद्वारा पुनर्जन्मप्राप्तिः न भवतु इति भावः उत्पेक्षते । प्रसङ्गेऽस्मिन् श्रीमद् भगबद्गीतायाः वचनमवहयेयम् तथाहि -

'' न रूपमस्येह तथोपलभ्यते नन्तो न चादिर्न च
अश्वत्थमेनं सुविरूढमूलमसङ्ग सम्प्रतिष्ठा शाश्त्रेण दृढेद छित्त्वा'' ।

(श्री.भ.गी. श्लोक - ३.....)

अत्र संसाररूपकस्याश्वत्थवृक्षस्य छेदनप्रकारः उपदिष्टः भगवता श्रीकृष्णेन । तदर्थं गृहीत्वा निम्नोकतानि तत्वानि अवध्येयानि वर्त्तन्ते ।

तावत् - संसारबन्धनछिन्नोपायाः-

१. प्राप्त्याशां प्रत्याशां च परित्यज्य संसारात् प्राहानि द्रव्याणि संसारार्थे हि सेवितव्यानि प्रयुक्तव्यानि च ।

२. संसारस्य भोगस्य कामना पूर्णतया व्यक्तव्यानि ।

३. संस्स्याश्रय: सर्वथा परित्यक्तव्य: ।

४. शरीर संसारयो: अहंभाव: ममवावश्च परिवर्जनीयॅ ।

५. अहं भगवदश: (परमात्मन् अंशविशेष:) भगवान् हि मम एक नान्य: इति भाव: हृदि प्रतिवद्वतापूर्वकं संस्थापनीय: ।

६. व्यवसायात्मिकाबुद्धि: परमात्माभिमुखिनो भवेत् केवलम् ।

७. शास्त्रपूर्वकं स्वकर्त्तव्यानुष्ठानं नूनं करणीयम् ।

८. वाल्यत: विद्यावुद्धिशरीरप्रभृतीति यथा आसन् परवत्तिनि काले तथा न प्राप्यन्ते । परन्तु अन्तरात्मन: (स्वयं) तथैव विद्यते । ,तादृश: भाव: विचिन्तनीरय: ।

९. संसारस्वीकृतसम्बन्ध: असत्यत्वात् तत्स्वीकृति: नादरणीया, एतेषां भावानां परमशार्थं पाणिनिना लौकिक शब्दानां व्यवहारादिकं विचार्याद् भूतोपायेन सूत्राणि संरचितानि संगहितानि च । तद्भावोद्धारनमेव विदुषां कर्त्तव्यमिति विचार्यते । कोमलमतीनां छात्रां मनसि अलोचितस्य सूत्रस्य प्रयोगे यद्यपि ''संगतम्'' इति केवलं सख्यमित्यर्थ: अवगृह्यते । तद्भावसाधनमेव गवेषकानां सूमतीनां चिन्तानाकाक्ष्यापरिसमासये गवेषणापत्रमिदं नूनं सहायक भयिष्यतीति दिक् ।

---

**सहायकसंदर्भ ग्रन्थसूची**

१. अष्टाध्यायी, नपुंसके भावे क्त: (३.३.११४)

२. वाहादुरष, स्यार - राजा - राधाकान्तदेव, शब्दकल्पद्रुम:, राष्ट्रिय संस्कृतसंस्थानम् (अधुना इन्द्रियसंस्कृतानिविश्वविद्यालय:) नवदिल्ली - भारतम २००२ (पुन: मुद्म्)

३. पाणिनीय अष्टाध्यायी. (सूत्र. सं ३.९.१०५)

४. दीक्षित:, श्रिमद् भट्टोजि, वैयाकरणसिद्धान्तकौमुदी, श्रीधरमुखी..सिनी हिन्दीव्याख्या समन्विता, षष्ठभाग:, चौखम्बसुरश्रती प्रकाशनम्, वारणासी,. २०९२ (प्रथम संस्करणम्), सिद्धान्तकौमुदी सूत्रक्रम: २८५३.

५. अष्टाध्यायी सू.सं. ३.१.१३३

६. पा. अष्टाध्यायी. सू.सं - ७/२/३५

७. दीक्षितः, श्रिमद् भट्टोजि, वैयाकरणसिद्धान्तकौमुदी, श्रीधरमुखी..सिनी हिन्दीव्याख्या समन्विता, षष्ठभागः, चौखम्बसुरश्रती प्रकाशनम्, वारणासी,. २०९२ (प्रथम संस्करणम्), सिद्धान्तकौमुदी सूत्रक्रमः २८५३.

८. दीक्षितः, श्रिमद् भट्टोजि, वैयाकरणसिद्धान्तकौमुदी, श्रीधरमुखी..सिनी हिन्दीव्याख्या समन्विता, षष्ठभागः, चौखम्बसुरश्रती प्रकाशनम्, वारणासी,. २०९२ (प्रथम संस्करणम्), सिद्धान्तकौमुदी सूत्रक्रमः २८५३.

९. अष्टाध्यायी. सू. सं. ३.१.१२४

१०. अष्टाध्यायी. सू. सं. ७.१.२२५

११. दीक्षितः, श्रिमद् भट्टोजि, वैयाकरणसिद्धान्तकौमुदी, श्रीधरमुखी..सिनी हिन्दीव्याख्या समन्विता, षष्ठभागः, चौखम्बसुरश्रती प्रकाशनम्, वारणासी,. २०९२ (प्रथम संस्करणम्), सिद्धान्तकौमुदी सूत्रक्रमः २८५३.

१२. भट्टिकाव्यस्य मल्लिनाथटीकायाम् षष्टसर्गस्य, ५४ श्लोक व्याख्यायाम् ।

१३. रघुवंशे - १८सर्गे श्लोक संख्या - ७

—०—

*संस्कृत-विभागः, रेभान्सा विश्वविद्यालयः,*
*कटकम्, ओडिशा ।*

# संस्कृतवाङ्मये श्रीपुरुषोत्तमचरितम्

संगीताराणी विश्वाल

**उपक्रम :**

कविकृति: काव्यम् । तच्च साधारणत: छन्दोबद्धम् । तच्च [१]"तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुन: क्वापि", [२]"वाक्यं रसात्मकं काव्यम्", [३]"रमणीयार्थप्रतिपादक: शब्द: काव्यम् ।" चेत्यादिरूपेण आचार्यै: परिभाषितम् । [४]"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्य:परनिर्वृत्तये कान्तासम्मिततयोपदेशयुजे ।।" इत्यादि प्रयोजनवत् काव्यं भवति । काव्यं गद्यपद्यचम्पूभेदेन त्रिविधम् आर्षपरम्पराप्लावित-मानन्दमयमिति दृश्यते। पुनश्च काव्यं श्रव्य-दृश्यभेदेन द्विविधम् । पुनश्च एतत् महाकाव्यं खण्डकाव्यं गीतिकाव्यं इत्यादि भेदचिह्नितम् उपदिश्यते । आधुनिकयन्त्रप्रधानयुगे विविध-वैज्ञानिकयन्त्राणां विनियोगकारणेन व्यस्तवहुलमानवजीवने अनेकानि व्यक्तिगतपारिवारिक-सामाजिकदु:खानि आयान्ति । सर्वत्र अशान्ति-असोन्तष: वर्द्धते, अस्थिरता च दृश्यते । सर्वोपरि अद्य मानवसमाज: उद्भ्रान्त:, तस्य गतिश्च उद्देश्यहीना । विपर्यस्तमानवसमाजे सर्वेषामपि दु:खानां प्रमुखं कारणं भवति नैतिकमूल्यानाम् अभाव: । अत: संकटापन्न-मानवजीवने नैतिकमूल्यबोध: अत्यावश्यक: वर्त्तते । नैतिकमूल्यबोध: मानवजीवनं मार्जितं करोति । अधुनातनकाले समाजे नैकविधा: समस्या: दरीदृश्यमाना: वर्त्तन्ते । एतासामपि समस्यानां समाधानं नैतिकशिक्षया कर्त्तुं शक्यते । यानि कानि नैतिकमूल्यानि मानवजीवने उपादेयानि भवन्ति तानि सर्वाणि एव काव्यशास्त्रेषु अन्तर्निहितानि भवन्ति । तानि काव्यानि पठित्वा पाठयित्वा श्रुत्वा श्रावयित्वा च संसारे मानवा: सुमार्गम् अधिगच्छन्ति । आदर्श-नैतिकज्ञानेनैव अस्माकं शारीरिक-मानसिक-आध्यात्मिकविकाश: सम्भविष्यति । अस्माकं क्रान्तदर्शिन: कवय: स्वीयरचनाद्वारा समाजस्य मार्गदशनं कुर्वन्ति । तथैव उत्कलीय: सारस्वतसाधक: कविवरो गणेश्वर: रथ: अपि व्यावहारिकतत्त्वानि नैतिकमूल्यानि सरलोपस्थापनापूर्वकं सर्वलोकाभिमुखीकरणाय द्वादशसर्गात्मके स्वमहाकाव्ये पुरुषोत्तमचरिते प्रस्तौति । तानि अत्र शोधप्रबन्धे किञ्चित् विचारयाम: ।

**समन्वयभावनात्मकं श्रीपुरुषोत्तमचरितम् -**

भारतीयसंस्कृतिः समन्वयभावनायाः संदेशदात्री । इयं भावना मनुष्येषु तादृशस्य दृष्टिकोणस्य विकासं करोति येन "वसुधैव कुटुम्बकम्" इति भावना प्रकटिता जाता। मानवाः सन्मार्गं प्रति प्रेरिताः भवन्ति । "अयं निजः परो वेति" इति भावना अपसरति । तदा समाजे ईर्षाद्वेषादयः समाप्ताः भविष्यन्ति, जनानां हृदयेषु "आत्मवत् सर्वभूतेषु" इति भावनायाः विकाशः भविष्यति । गीतायां भगवता श्रीकृष्णेन प्रोक्तम्-

"समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्" । इति ।

प्राचीनकालादद्यावधि कवयः स्वकाव्येषु अस्याः भावनायाः स्थापनार्थं प्रयत्नं कुर्वन्ति । श्रीपुरुषोत्तमचरिते महाकाव्येऽपि एतादृशी भावना दरीदृश्यते । महनीय-जगन्नाथसंस्कृतेः मूलाधारः श्रीजगन्नाथः उत्कलप्रदेशे विराजते । सः स्वयं समन्वयभावनायाः प्रतीकभूतः। प्रतिवर्षं महाप्रभोः जगन्नाथस्य विश्वप्रसिद्धरथयात्रा अत्र महासमारोहेण अनुष्ठिता भवति । अस्यां यात्रायां समस्तवर्गाणां जनानां समावेशः भवति । समग्रविश्वे इयं यात्रा ऐक्यता-संहतिं विदधाति । अस्मिन् दिवसे सः दयामयः आर्त्तनाशनः जगन्नाथः सर्वेषां जनानां दुःखनिवारणार्थं स्वरत्नसिंहासनं विहाय स्वबाहू प्रसार्य्य बहिरागच्छति । तदुक्तं कविवरेण गणेश्वरेण यथा-

[५]"दयैव सा किं कटिबद्धवाससा समाचकर्ष प्रभविष्णुमोजसा ।
अतो विहाय स्वपदं दयामयः प्रसार्य्य बाहू समुपागतो बहिः ।।" इति ।

**आध्यात्मिकभावनामयं श्रीपुरुषोत्तमचरितम् -**

भारतीयसमाजे आध्यात्मिकभावनायाः प्राधान्यं विद्यते । आत्मानं शरीरमधिश्रितं तत्त्वम् अध्यात्मम् । आत्मसम्बन्धीत्यस्मिन् अर्थे आध्यात्मिकशब्दस्य निष्पत्तिः भवति । वैदिकसाहित्ये उपनिषदि रामायणे महाभारते धर्मशास्त्रे आधुनिककाव्येषु च आध्यात्मिकभावनाः समुपलभ्यन्ते । तेन आध्यात्मिकज्ञानेन प्रभावितस्य मानवस्य हृदयाभ्यन्तरे ईश्वरविषयकजिज्ञासा जायते । ततः सः मानवः मनसा आध्यात्मिकविषये एव सम्यक् समाहितत्वात् समाधि-अवस्थां लब्धुं शक्नुयात् । सर्वे जनाः अपि अस्याः भावनायाः महत्त्वं स्वीकुर्वन्ति । काव्येष्वपि विविधाः आध्यात्मिकविचाराः समुपलभ्यन्ते।

उदाहरणभूतं वचनं यथा-

[६]"स्वं च ब्रह्म च संसारे मुक्तौ तु ब्रह्म केवलम् ।
इति स्वोच्छित्तिमुक्त्युक्तिवैदग्धी ब्रह्मवादिनाम् ।।" इति ।

एवं पुरुषोत्तमचरितेऽपि कविना गणेश्वरेण आध्यात्मिकभावनाया: जागरणार्थं श्रीजगन्नाथस्य स्वरूपं वर्णितम् । तद् यथा -

[७]"नित्यं जगतकारणमद्वितीयं ब्रह्मैव सर्वं जगदेतदास्ते ।
श्रद्धाश्रया लोकतति: किलेयं सा यत्र यस्यास्ति स सत्यसेव्य:" ।। इति ।

एवं सा आध्यात्मिकभावना भौतिकसुखोपभोगिनां कृते मोक्षभावनां जागरयति । अत: सदैव मानवै: स्वमनसा आध्यात्मिकविषयाणामेव चिन्तनं कर्तव्यम् ।

**नि:स्वार्थभावनापूरितं श्रीपुरुषोत्तमचरितम् -**

निखिलेस्मिन् संसार वयं सर्वे मानवा: समाना: । अत: मानव: निरहङ्कार: निस्पृह: त्यागभावान्वितश्च सन् सर्वेषां हितं चिन्तयेत् । तर्हि स: जीवने परमशान्तिमधिगच्छति। भगवता श्रीकृष्णेन उक्तम् -

[८]"विहाय कामान् य: सर्वान् पुमांश्चरति नि:स्पृह: ।
निर्ममो निरहङ्कार: स शान्तिमधिगछति ।।" इति ।

तत्वदर्शी राजा पुरुषोत्तम: सर्वदा जगन्निवासस्य जगन्नाथस्य प्रसादात् नि:स्वार्थभावनया च स्वदेशरक्षणे तत्पर: आसीत् । अत: आनन्दमये अस्मिन् उत्कलदेशे दु:खं पदं स्थानं न लब्धम् । तत्र उत्कलेषु प्रजा: निरन्तरं सुखेन निवसन्ति: । राजनीतिकुशल: स: नरराजवर्य्य: याचकानां कल्पद्रुमसदृश: । अद्यापि सत्यवादिभि: स: रत्नाकर: एव कथ्यते । तदुक्तं यथा -

[९]"द्विजातिविश्राणनतो गलद्भी रत्नोच्चयै: सम्मिलित: प्रदीप्तै: ।
अद्यापि रत्नाकर एव सद्भिरुदीर्यतेऽन्वर्थवचोभिरेष: ।।" इति ।

**परोपकारभावनापरं श्रीपुरुषोत्तमचरितम् -**

समाजस्य कल्याणं परोपकारभावनया एव भवितुमर्हति । स्वार्थभावनां विहाय यत् किमपि परार्थं क्रियते तत् एव परोपकारपदवाच्यम् । न केवलं मानवेषु एव परोपकारभावना विद्यते अपितु पशव: पर्वता: सरितश्चेत्यादय: निरन्तरं परोपकारे संलग्ना: भवन्ति । जडप्रकृतिरपि परोपकारस्य शिक्षां प्रददाति । नद्य: स्वयमेव जलं न पिबन्ति,

वृक्षा: स्वयमेव फलानि न खादन्ति, गाव: स्वयमेव दुग्धं न पिबन्ति । किन्तु ते सर्वे परोपकारं कुर्वन्ति । यथोक्तम् अभियुक्तै: -

"परोपकाराय फलन्ति वृक्षा: परोपकाराय वहन्ति नद्य: ।
परोपकाराय दुहन्ति गाव: परोपकारार्थमिदं शरीरम् ।।" इति ।

परोपकारस्य महत्त्वं कविना गणेश्वरेण सम्यगुपस्थापितम् । कविना वर्णितं यथा -

[१०]"परार्त्तिविध्वंसनहेतवे सदा स्वशीर्षदेशे सहमानमातपम् ।
सुशिक्षमन्तं जनतामनेन यत् परोपकारो जनुष: परं फलम् ।।"इति ।

अर्थात् परोपकारतत्पर: सूर्य: परदु:खस्य विनाशाय स्वशीर्षदेशे आतपं धारयन् सकलप्राणिनां रक्षां करोति । वस्तुत: सर्वे मानवा: अपि परोपकारं कृत्वा असीमशान्तिमनुभवन्ति । अत: दुर्लभं मानवं शरीरं प्राप्य जीवने अवश्यं परोपकार: कर्त्तव्य: । सत्संगतिशिक्षाप्रदायकं श्रीपुरुषोत्तमचरितं शोभते । तदुक्तं यथा-

[११]"काच: काञ्चनसंसर्गाद् धत्ते मारकतीं द्युतिम् ।
तथा सत्सन्निधानेन मूर्खो याति प्रवीणताम् ।।
कीटोऽपि सुमन:सङ्गादारोहति सतां शिर: ।
अश्मापि याति देवत्वं महद्भि: सुप्रतिष्ठितम् ।।" इति ।

जगति कोऽपि एकाकी न संसरति । संसारयात्रायां विविधकार्यकलापेषु परसङ्गति: अनिवार्या । यथा वृक्षं विना लता स्वपोषणं धारणं च सम्यक् रूपेण कर्त्तुं न पारयति तथा असारे संसारे कोऽपि प्राणी सत्सङ्गतिं विना स्वजीवर्नयात्रां चालयितुं न शक्नोति । पशुपक्षिणश्च स्वमित्रै: सह उषित्वा एव प्रसन्ना: भवन्ति । मधुपगण: अपि पुष्पसङ्गत्या एव वसति । कदापि सुसङ्गगुणं ते न त्यजन्ति । सत्सङ्गते: हेतो: अपर: गुणी भवति । तदुक्तं कविवरेण गणेश्वरेण -

[१२]"मधु मधुव्रत तेऽशनमीक्ष्यतेऽनुकुरुतेऽशनमङ्ग निजं वपु: ।
तदनुगच्छति सद्गुणसंहतिस्त्वयि मृषेयमहो भणिति: कथम् ।।
सुमगणो वसतिस्तव दृश्यते भवति सङ्गगुणादपरो गुणी ।" इति ।

संयोग: एव उत्पत्ते: कारणम् । स एव प्रत्येकजीवस्य कारणमस्ति । एवमेव गुणज्ञसङ्गे सति गुणिन: रमन्ते । राजा पुरुषोत्तम: अपि स्वदेशसंरक्षणाय विद्वद्वरेण्यै: कविभि: च सह उषित्वा गम्भीरतत्त्वानि विचारयति । सतां संगति: सर्वं प्रददाति, निखिलम्

अभीष्टमपि साधयति । यथोक्तं कविना -

[१३]"स्तदेशसंरक्षणतत्परोऽपि विद्वद्वरेण्यैः कविभिः समेतः ।
अमोदतातीव समानधर्मा गुणज्ञसङ्गे गुणिनो रमन्ते ।।" इति ।

**सन्दर्भाः सहायकग्रन्थाश्च** –


१. काव्यप्रकाशः - ४ ; चौखम्बाप्रकाशितः ।

२. साहित्यदर्पणः - १/३; चौखम्बाप्रकाशितः ।

३. रसगङ्गाधरः - १; चौखम्बाप्रकाशितः ।

४. काव्यप्रकाशः - २; चौखम्बाप्रकाशितः ।

५. श्रीपुरुषोत्तमचरितम् - ६/२३; ओडिशासाहित्यएकाडेमीप्रकाशितम् ।

६. नैषधीयचरितम्- १७/७४; चौखम्बाप्रकाशितम् ।

७. श्रीपुरुषोत्तमचरितम् - ५/३४; ओडिशासाहित्यएकाडेमीप्रकाशितम् ।

८. श्रीमद्भगवद्गीता - २/७१; गीताप्रेसप्रकाशिता ।

९. श्रीपुरुषोत्तमचरितम् - २/२६; ओडिशासाहित्यएकाडेमीप्रकाशितम् ।

१०. श्रीपुरुषोत्तमचरितम् - ९/९; ओडिशासाहित्यएकाडेमीप्रकाशितम् ।

११. हितोपदेशः - ४१,४५; चौखम्बाप्रकाशितः।

१२. श्रीपुरुषोत्तमचरितम् - ४/३७,३८; ओडिशासाहित्यएकाडेमीप्रकाशितम् ।

१३. तदेव - २/५३ ।


—o—


*Ph.D. शोधच्छात्रा, संस्कृतविभागः,*
*सम्बलपुरविश्वविद्यालयः, सम्बलपुरम्, ओडिशा।*
*मार्गदर्शकः- डॉ०हरेकृष्णमेहेरः*

# “गीतगौरीपति”पर्यालोचनम्

सञ्जीवकुमारदाशः

**भूमिका –**

चराचरेऽस्मिन् जगति सृष्टासु भाषासु दिव्यामृतगीर्वाणवाणी संस्कृतमिति सुविदितं वर्तते। परिष्कृतं, परिशुद्धं, व्याकरणादिदोषरहितं यत्तत् संस्कृतपदवाच्यम्। संस्कृतवाङ्मये साहित्यशास्त्रं सहृदयानां हृदयाऽऽह्लादकारकं वर्तते। आह्लादं प्राप्तुं कवयः मनीषिणः च साहित्यशास्त्रस्य रचनां कारयामासुः। समाजे जनाः साहित्यं पठन्ति चेत् काव्यस्य प्रभावेण समाजस्य हितसाधनं भविष्यति, यथा सूर्यकिरणमाध्यमेन अन्धकारः दूरीभवति, तथैव काव्याध्ययनेन समाजे विद्यमानानां कुसंस्काराणां दूरीकरणं भवति। शब्दार्थयोः सहितयोर्भावः साहित्यम् । यथा वयं मुखस्य सौन्दर्यं स्थितिञ्च च द्रष्टुं दर्पणं पश्यामः, तथा समाजस्य प्रतिबिम्बं साहित्ये काव्ये च द्रष्टुं शक्नुमः । साहित्याध्ययनेन “रामादिवत्प्रवर्तितव्यं न रावणादिवत्”[१] इति व्यवहारज्ञानप्राप्तिर्भवति । कान्ता यथा आनन्देन प्रीत्या च उपदेशं ददाति तथा साहित्यमपि उपदेशं ददाति । साहित्यं भवति शोभाशालि यथा –

“साहित्यमनयोः शोभाशालिनां प्रति काप्यसौ ।
अन्यूनानतिरिक्तत्वमनोहारिण्यवस्थितिः ।।” इति ।

**गीतिकाव्यम् -**

संस्कृतसाहित्ये काव्यवाङ्मये गीतिकाव्यम् अतिप्राचीनं सुप्रसिद्धञ्चास्ति। गीतिकाव्यानि कविहृदयस्य भावसन्देशं वहन्ति गिरिनिर्झरिणीव प्रसरन्ति पाठकप्राणान् आनन्देन परिप्लावयन्ति। गीतिकाव्ये कवेः तीव्रानुभूतिः जायते। वाद्ययन्त्रसहयोगेन बहिर्भागात् भावप्रवणता जायते, परन्तु गीतिकवितायाः अभ्यन्तरदेशात् सा प्रवणता उपलब्धा। गीतिकाव्ये भावादीनां प्राधान्यता वर्तते। एतद् भावोच्छ्वासपूर्णं, रसमयं, स्वच्छन्दं, सावलीलं, श्रुतिमधुरं, सङ्गीतमयं, संक्षिप्तञ्च भवति। गीतिकाव्यस्य शुभारम्भः महाकविजयदेवेन गीतगोविन्दाख्यस्वकृतौ विहितः। एवंक्रमेण गीतिकाव्यस्य धारा प्रवाहिता।

**गीतगौरीपतिकाव्यस्य परिचयः -**

१८८७ तमे ख्रीष्टाब्दे महामहोपाध्यायः भानुदत्तवर्यः “गीतगौरीपति” इति नामकं गीतिकाव्यं व्यरचयत्। गीतगौरीपतिनामकं गीतिकाव्यं दशसर्गेषु विभक्तं रसरञ्जितं विद्यते। काव्येऽस्मिन् कविप्रवरेण भानुदत्तेन पार्वतीशङ्करयोः पवित्रा प्रणयगाथा सुमनोहरेण गीतेन चित्रिता। पार्वतीशङ्करयोः प्रणयगाथाहेतोः शृङ्गारः अङ्गिरसः भवति। कविप्रवरेण भानुदत्तेन गीतगौरीपतिकाव्ये सम्पूर्णदशसर्गे पञ्चदशछन्दसां प्रयोगः क्रियते। तत्र आर्या,

अनुष्टुप्, इन्द्रवज्रा, पुष्पिताग्रा, मन्दाक्रान्ता, मालिनी, वसन्ततिलका, शार्दूलविक्रीडितम् आदीनि दृश्यन्ते। काव्येऽस्मिन् भाषा प्रसादगुणयुक्ता सरला सुबोध्या च भवति। काव्येस्मिन् प्रतिसर्गं गीतारम्भे जयदेवस्य 9गीतगोविन्दम्" इव संगीतशास्त्रचर्चितानां रागाणां नामोल्लेखः विद्यते। गीतानां मध्ये-मध्ये कथासूत्रसंयोजनाय श्लोकानां रचनापि अत्र कविना कृता। अत्र गीतस्य उदाहरणं यथा –

"सकलकलारसधन्या ।

तव विरहे परिपतति विषीदति विलपति गिरीपति कन्या ।।......

वदति भानुरिति मुञ्च कथामिति लोकैरुपहसनीयम् ।

सकलज्ञाननिधौ पुरवैरिणि दूति किमथ कथनीयम् ।। " इति।

कृतिरियं पूर्णतः जयदेवविरचितगीतगोविन्देन प्रभाविता वरीवर्ति। यथा गीतगोविन्दस्य प्रारम्भे दशावताराणां वर्णनं जयदेवेन विहितं, तथैव अनेनापि काव्यारम्भे भगवतः शङ्करस्य अष्टमूर्तिस्तवो रचितः। "गीतगौरीपतिह्लकाव्योपरि भवानिदत्तशर्मणा संस्कृतभाषानिबद्धा एका टीका कृता।

**ग्रन्थकारपरिचयः -**

सुप्रसिद्धमहाकविना श्रीमता भानुदत्तमहोदयेन स्वीयपरिचयो यद्यपि "रसमञ्जरी" कुमारभार्गवीयम् चेति ग्रन्थद्वये सामान्यतः प्रदत्तः परन्तु तस्य कालविषये मतभेदः दरीदृश्यते। तथापि तस्य समयः -डॉ. कृष्णकुमारमहोदयस्य मतानुसारेण षोडशशताब्दी। डॉ. बलदेव उपाध्यायमहाशयेनास्य कालः त्रयोदशशताब्द्याः अन्तिमः ततः चतुर्दशशताब्द्याः प्रारम्भः इति प्रतिपादितः। गणेश्वरमिश्रः भानुदत्तमहोदयस्य पिता इति बहुत्र लभ्यते। परन्तु रसतरङ्गिण्याम् अन्तिमपुष्पिकायां यदस्ति- मैथिलगणनाथः तस्य पिता इति। ग्रन्थकारः स्वीयपरिचयविषये रसमञ्जर्यां वदति–

"तातो यस्य गणेश्वरः कविकुलालङ्कारचूडामणि-

र्देशो यस्य विदेहभूः सुरसरित्कल्लोलकीर्मीरिता ।

पद्येन स्वकृतेन कविना श्रीभानुना योजिता

वाग्देवी श्रुतिपारिजातकुसुमस्पर्धाकरी मञ्जरी ।।ह्ल[२]इति ।

**कृतिः -**

महामहोपाध्यायः भानुदत्तमिश्रमहाभागः बहूनि काव्यानि गीतकाव्यानि च सुमधुरवाक्यैः व्यरचयत्। तद्यथा- रसपारिजातः, रसमञ्जरी, रसतरङ्गिणी, कुमारभार्गवीयम्, गीतगौरीपतिप्रभृतयः ।

**रसः –**

रस्यते आस्वाद्यते अनेन इति रसः। सः काव्यस्यात्मा मन्यते। रसरहितं काव्यं मृतमेव भवति। गुणालङ्कारादीनां सर्वेषां तत्त्वानामात्मलाभस्तदैव संभवति यदा ते रसानुगुणा भवन्ति। रसाभावेऽलङ्कारनिबन्धो निष्फल एवेति श्लोकोऽयं प्रतिपादयति –

"रसध्वनिर्न यत्रास्ति तत्र बन्ध्यं विभूषणम्।

मृताया मृगशावाक्ष्याः किं फलं हारसम्पदा।।"इति ।

विभावादिभिरभिव्यक्तः स्थायिभावरूपो ब्रह्मास्वादसहोदरो लोकोत्तरचमत्कारप्राणो रसो गुणालङ्कारादिविशिष्टशब्दार्थरूपे रमणीयार्थप्रतिपादकशब्दस्वरूपे वा काव्ये व्यञ्जकसम्बन्धेन तिष्ठति। स एव काव्यस्यात्मेति प्रकारान्तरेण "नहि रसादृते कश्चिदर्थः प्रवर्तते।"[३] इति भरतमुनिनाऽपि "नाट्यशास्त्रे" प्रतिपादतम्। रसोत्पत्तिविषये भरतमुनिना "नाट्यशास्त्रे" प्रप्रथमतया रसनिष्पत्तिसूत्रं प्रतिपादितम् –

"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः।"[४]

शृङ्गारहास्यकरुणा रौद्रवीरभयानकाः।

वाीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ।।"[५] इति ।

प्रथमः रसः भवति शृङ्गारः। शृणाति, विषमदशाप्रापणेन हिनस्ति युवकान् इति व्युत्पत्या शृंगपदं निष्पद्यते। शृंगं हि मन्मथोद्भेदः, शृंगमिति उपपदात् ऋ-गतौ इति धातोः 9कर्मण्यम्" प्रत्ययेन शृंगारशब्दः जायते। शृंगारः द्विविधः – सम्भोगः, विप्रलम्भश्च। विप्रलम्भः पञ्चविधः – अभिलाषः, विरहः, ईर्ष्या, प्रवासः, शापः। नायिकानायकयोः मेलनं सम्भोगः। तयोर्विच्छेदः विप्रलम्भः। अनुरागिणीं वेश्यां वर्जयित्वा अन्यसमस्तनायिकाः अस्य आलम्बनं, चन्द्रादयः उद्दीपनविभावाः। उग्रतामरणाऽलस्यजुगुप्सादीः वर्जयित्वा अन्ये समस्ताः अस्य व्यभिचारिणः। रतिः स्थायिभावः। विष्णुः देवता। अस्य वर्णः श्यामलः। कविप्रवरभानुदत्तविरचितं गीतगौरीपतिनामकं गीतिकाव्यं शृङ्गाररसप्रधानं वर्तते। कविः विप्रलम्भशृंगारेण नायकस्य शिवस्य विरहं वर्णयति –

"अथ कनकसरोरुहातपत्रो विकसितकेतकविस्फुरत्किरीटः।

नवकिसलयकञ्चुकोपगूढः शिवमशिवैर्विशिखैः स्मरो जघान ।।"[६]इति ।

**अलङ्कारः –**

अलं क्रियते भूषयते अनेन इति अलङ्कारः। आचार्यभामहः अलङ्कारसम्प्रदायस्यादिप्रवर्तकः। काव्येऽलङ्कारस्य प्राधान्यं येन केनापि स्वीकृतमासीत् तेषां मतानुसारेण अलङ्कार एव काव्यस्यात्मा जीवनाधायकतत्त्वं वा। अलङ्कारहीनं काव्यमुपहासास्पदं भवति। भामहाचार्यः "न कान्तमपि निर्भूषं विभाति वनिताननम्"[७] इत्युद्घोष्यालङ्कारस्यैव सर्वाधिकमहत्त्वं प्रतिष्ठापयामास। अलङ्कारविषये आचार्यमम्मटस्य मतं यत्–

"उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।

हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः"[८]इति ।

अर्थात् यः धर्मः काव्यस्य शब्दार्थरूपेण शरीरेण तमङ्गिनः रसमुपकुर्वन्ति ते अलङ्कारा इत्युच्यन्ते। यथा नायिका स्वहस्तपादौ कटकनूपुरादिकं परिदधाति तथैव काव्यरूपिणी नायिकाऽपि स्वशब्दार्थशरीरे अनुप्रासोपमादीन् अलङ्कारान् मण्डयति।भ्रान्तिमानलङ्कारस्य

लक्षणविषये साहित्यदर्पणकारेण कविराजविश्वनाथेनोक्तम्– "साम्यादतस्मिंस्तद्बुद्धिर्भ्रान्तिमान् प्रतिभोत्थितः"[१]इति। काव्यप्रकाशकारमम्मटेनाप्युक्तम् "भ्रान्तिमानन्यसंवित्तत्तुल्यदर्शने"[११]इति भानुदत्तेन काव्यमिदं बहुषु अलङ्कारेषु वर्णितम्। कविना षष्ठसर्गे भ्रान्तिमान्नलङ्कारेण वर्णितः श्लोकः –

"स्कन्धात् भ्रष्टभुजङ्गनायकधिया गृह्णन्मृणालाङ्कुरान्
कण्ठस्रस्तहलाहलावधिधिया कर्षन् द्विरेफावलीम्
नेत्रप्रान्तचलायमानदहनभ्रान्त्या हरन्किंशुकः,
देवः सानुषु भूधरस्य विचरन्न क्वाऽपि लेभे रतिम्"इति ।

श्लोकेऽस्मिन् शिवस्य मदनतप्तशरीरे जायमाना क्रिया वर्णिताऽस्ति। तत्र भगवतः शिवस्य मनसि भ्रान्तिः जायते। यथा- प्रथमपादे भुजङ्गः मृणालामंकुरः (पद्मनाड) इव भ्रान्तिः भवति। द्वितीयपादे हलाहलविषं द्विरेफः(भ्रमरः) इव भ्रान्तिः भवति। तृतीयपादे भगवतः शङ्करस्य त्रिनेत्राग्निः किंशुकपुष्पम् इव भ्रान्तिः भवति। अतः श्लोकेऽस्मिन् भ्रान्तिमान् अलङ्कारः।

**छन्दः –**

छन्दः काव्यसौन्दर्यवर्धकतत्त्वेष्वन्यतमम्। काव्ये मोहकता- रमणीयता- अभिव्यक्तितीव्रता- आह्लादकतासम्पादनाय छन्दसः भूमिका गुरुत्वपूर्णा वर्तते। "छन्दांसि छादनात्" इति निरुक्तवचनानुसारं येन भावरसादय आच्छादिता भवन्ति तच्छन्दः। कविप्रवरेण भानुदत्तेन गीतगौरीपतिकाव्ये सम्पूर्णदशसर्गे पञ्चदशछन्दसां प्रयोगः क्रियते। तत्र आर्या, अनुष्टुप्, इन्द्रवज्रा, पुष्पिताग्रा, मन्दाक्रान्ता, मालिनी, वसन्ततिलका, शार्दूलविक्रीडितम् आदीनि प्रधानानि। ग्रन्थेऽस्मिन् अधिकाधिकपदानि शार्दूलविक्रीडितछन्दसा विरचितानि भानुदत्तेन। काव्येऽस्मिन् शार्दूलविक्रीडितछन्दसा मङ्गलपदम्–

"सन्ध्यानृत्यविधौ भूजङ्गमपतेर्गीतामृतं श्रुण्वतः
प्रत्यक्षस्खलितप्रसादसलिलस्तोमे तनौ सर्पति ।
मौलेरुत्पथगा किमु त्रिपथगा जातेति शङ्काजुषो
देवस्य त्रिपुरान्तकस्य चकितं व्यालोकितं पातु व ।।"इति।

समवृत्तेषु शार्दूलविक्रीडितमन्यतमम्। एषा वृत्ति ऊनविंशत्यक्षरा (१९) भवति। लक्षणं यथा – "सूर्याश्वैर्यदिनः सजौ सततगाः शार्दूलविक्रीडितम्" इति। अर्थात् प्रतिचरणं क्रमशः मगणः(SSS), सगणः(IIS), जगणः(ISI), सगणः(IIS), तगणः(SSI), तगणः(SSI), गुरुश्च भवन्ति तत्र एतच्छन्दः स्यात्। अस्मिन् छन्दसि सूर्यैः(१२), अश्वैः(७) अक्षरैः विरामो भवति। उदाहरणम् –

| | | | | | | |
|---|---|---|---|---|---|---|
| मगण: | सगण: | जगण: | सगण: | तगण: | तगण: | गुरु |
| SSS | IIS | ISI | IIS | SSI | SSI | S |
| सन्ध्यानृ | त्यविधौ | भूजङ्ग | मपते | र्गीतामृ | तं श्रुण्व | त: |
| प्रत्यक्षि | स्खलित | प्रसोद | सलिल | स्तोमे त | नौ सर्प | ति |
| मौलेरु | त्पथगा | किमु त्रि | पथगा | जातेति | सङ्काजु | षो |
| देवस्य | त्रिपुरा | न्तकस्य | चकितं | व्यालोकि | तं पातु | व: |

**निष्कर्ष : –**

संस्कृतगीतिकाव्यपरम्परायां भानुदत्तविरचितगीतगौरीपतिकाव्यस्य महत्वपूर्णस्थानं वर्तते। गीतिकाव्येऽस्मिन् कविना गीतिकाव्योचितगुणानां भावानाञ्च सन्निवेश: कृत:। उदात्तं सजीवञ्च वर्णनं, सरल-सुबोध-प्रसादगुणयुक्तभाषा रमणीयकविकल्पना हृदयग्राहिकोमलकान्तिपदावली अलङ्काराणां रसानां छन्दसां चमत्कारप्रयोगश्च, एते सर्वे महनीया: गुणा: भानुदत्तेन अस्मिन् काव्ये प्रतिष्ठापिता:। अत: भानुदत्तस्य गुणोऽयं गीतिकाव्यस्य गौरवं विस्तारयति। इति ।

---

**सन्दर्भा: सन्दर्भग्रन्थाश्च -**

१. गीतगौरीपतिकाव्यम्-आचार्यभानुदत्तमिश्रप्रणीतम्, अप्रकाशितम् ।
२. साहित्यदर्पण: - विश्वनाथप्रणीत: - चौखम्बा - १।
३. रसमञ्जरी-भानुदत्तप्रणीता, चौखम्बा - १३८ ।
४. नाट्यशास्त्रम् - भरतमुनिप्रणीतम्,चौखम्बा - ६ ।
५. तदैव - ६ /१५ ।
६. गीतगौरीपति - ६ /१ ।
७. काव्यालङ्कार: - रूद्रटप्रणीत:,मोतीलालबनारसीदास, दिल्ली - १ /१३।
८. काव्यप्रकाश:- मम्मटभट्टप्रणीत:, साहित्यएकाडेमि,भुवनेश्वर, ओडिशा - ८ / २।
९. साहित्यदर्पण: - १०/३६ ।
१०. काव्यप्रकाश: - १०/२०० ।

*विद्यावारिधि (Ph.D.) शोधच्छात्र:, साहित्यविभाग:,*
*केन्द्रीयसंस्कृतविश्वविद्यालय:, श्रीसदाशिवपरिसर:, पुरी, ओडिशा।*
***मार्गदर्शक:- डॉ. उदयनाथ झा***

—०—

# व्याकरणवाङ्मये शक्तिः

महेश्वरवागः

"वेदानां वेदम्"[१] इति श्रीनारदभगवान् प्रस्तौति। सर्वेषां वेदानां रक्षकत्वात् वेदार्थावबोधने सहायकत्वात् स्वरपदस्वरूपप्रतिपादकत्वात् व्याकरणशास्त्रस्य महिमा सुतरां विवर्धते। पदकल्प-वाक्यकल्पनाभ्यां काव्यनाटकादीनां शास्त्राणामपि प्रकृतज्ञानाय व्याकरणशास्त्रज्ञानम् आवश्यकम्। शब्दानुशासनम् अस्य शास्त्रस्य नामान्तरम्। शब्दानाम् अनुशासनं शब्दानुशासनम्। शब्दानुशासनेनेव संसारे विद्यमानानां मानवज्ञानाधार-विषयकग्रन्थानां चतुर्दशविद्यानाञ्च संरक्षणं क्रियते। चतुर्दशविद्याविषये स्मृतिशास्त्रकारेण याज्ञवल्क्येन उपदिष्टम्-

"पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दशः।।"[२]

लोके सर्वासु विद्यासु प्रशस्तं शब्दानुशासनम्। भगवता श्रीमता भर्तृहरिणा निगदितं यत्,- "पवित्रं सर्वविद्यानाम् अधिविद्यं प्रकाशते"।[३] व्याकरणविद्या ज्योतिः,तपः पदेन च अभिधीयते। अपि च वेदानां मुखत्वेन भजति। "मुखं व्याकरणं स्मृतम्"।[४]इति । एवंभूतस्य व्याकरणशास्त्रस्य महत्त्वं सर्वैरपि ज्ञायते।

"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुबिद्धमिव ज्ञानं सर्वं शब्देन भासते ।।"[५]

इति वाक्यपदीयवचनानुसारं वचसः शुद्धत्वं साधुशब्दानां प्रयोगविज्ञानं वा व्याकरणाधीनमिति साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः इति यस्य सम्यग् ज्ञानं विना शास्त्रान्तरे प्रवेशनं यथा चिन्तनं प्रकाशनं नैव सम्भवति।

लोके प्रत्यात्मकपदार्थस्य सिद्धये प्राधान्येन चत्वारि कारणानि समुपवर्णितानि। तद्यथा,-प्रत्यक्षम्,अनुमानम्,उपमानम्,शब्दश्चेति। न्यायसूत्रकारेण महर्षिगौतमेन भणितं यत्,- "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि""। स्फोटात्मकस्य शब्दस्य कथं सिद्धिः भवति इति तु सर्वेषाम् अनुभवसिद्धमेव। यदि शब्दनामकज्योतिः वसुधातले नास्ति तर्हि त्रिभुवनम् अन्धकाराच्छन्नम्। यथोक्तं दण्डिना,-

"इदमन्धं तमः कृत्स्नं जायते भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ।। [६] इति ।

अतः शब्दस्य प्राधान्यं वरीवर्ती एव। शब्दात् जातः इति शब्दः। यथा घट इति शब्दोच्चारणेन कम्बुग्रीवादिमानपदार्थस्य बोधः जायते। "तद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति

"तद्धर्मावच्छिन्ननिरूपि वृत्तिविशिष्टज्ञानं हेतु"।[७] शब्दात् जायमानं तादृशबोधं प्रति शब्दनिष्ठायाः वृत्तेः ज्ञानं करणं भवति। सा च वृत्तिः त्रिधा– शक्तिः लक्षणा व्याञ्जना चेतिभेदेन। तत्र शक्तिज्ञानं शाब्दबोधे आत्यन्तिकमर्हतां भजते यस्मिन् विवक्षया वस्तुगत्या प्रकटनाशयः निश्चीयते । शब्दशक्तिग्रहवता केनचिद् उत्तमबृद्धेन मध्यमवृद्धमुद्दिश्य "घटमानय" इत्युक्तौ घटानयने प्रवृत्तं तं बुद्ध्वा अगृहीतशक्तिकः कश्चिदस्य वाक्यस्य कम्बुग्रीवादिवत्वस्त्वानयनरूपेऽर्थे तात्पर्यमिति प्राक्प्रतिपद्यते । पश्चात् "घटं नय", "पटमानय" इत्यन्वयव्यतिरेकाभ्यां घटशब्दस्य कम्बुग्रीवादिमानर्थोऽनयनशब्दस् हरणाञ्चार्थ इत्येव बोधो भवति। तत्र पदविशेषोपस्थितेन पदार्थेन सह पदान्तरोपस्थितस्य पदार्थस्य यः सम्बन्धस्तस्य ज्ञानं शाब्दबोधोऽन्वयबोधो वाक्यार्थबोधो वेति प्रतिपद्यते। तत्र शाब्दबोधे पदज्ञानं, पदजन्यपदार्थोपस्थितिः वृत्तिज्ञानम्, आकांक्षा, योग्यता, आसत्तिः तात्पर्यमित्येतानि अष्टौ कारणानि भवन्ति। एतेषु आकलितेषु अष्टासु शाब्दबोधेषु पदज्ञानं शाब्दबोधे कारणम्, पदज्ञानजन्यपदार्थोपस्थितिः व्यापारः शाब्दबोधस्तु फलमिति विचार्यते । उक्तञ्च मुक्तावल्याम् -

"पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः ।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी"।।[८] इति ।

इदन्तावत् निश्चवचं यत् स्वज्ञानरहिताया भाषायाः पदानां स्थितेऽपि श्रावणानुभवेन शाब्दबोधो न भवति । तत्र पदज्ञानस्य विद्यमानत्वेऽपि तत्पदविषयकशक्तिज्ञानस्य विरहात् शाब्दबोधात्मकं फलं नैवोत्पद्यते पदार्थस्मरणरूप व्यापाराभावात्। अतः शक्तिज्ञानं विना शाब्दबोधो नैव सम्भवति। नागृहीतवृत्तिकस्य सर्वथा शाब्दबोधो जायते। "तद्धर्मावच्छिन्नविषयक शाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपित वृत्तिविशिष्टज्ञानं" हेतुरिति लघुमञ्जूषायां स्पष्टमिति । वृत्तिस्तु शाब्दबोधानुकूलः पदार्थज्ञानजनकज्ञानविषयः पदपदार्थयोः सम्बन्धो विशेष एव वृत्तिः । वृत्तिस्तु शक्तिर्लक्षणा व्यञ्जना च । तत्र शक्तिशब्दस्य विभिन्नार्थपुरःसरं शास्त्रान्तरेषु प्रयोगो दृश्यते । तद्यथा "या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता।" अत्र शक्तिपदेन कार्यजननरूपसामर्थ्यं हि बोध्यते । पुनश्च शक्यते जेतुमनया" इति शक्तिः । त्रिशक्तिः यथा -

"एषात्रिशक्तिरुद्दिष्टा नयासिद्धान्तगामिनी ।
एषा श्वेता परा सृष्टिः सात्त्विकी ब्रह्मसंस्थिता ।।
एषैव रक्ता रजसि वैष्णवी परिकीर्त्तिता ।
एषैव कृष्णा तमसो रौद्री देवी प्रकीर्त्तिता ।।
परमात्मा यथा देवी एक एव त्रिधा स्थितः ।
प्रयोजनवशाच्छक्तिरेकैव त्रिधामतम् ।।"[९] इति ।

अपिच शक्तिर्नाम शब्दशक्तिः। भादृचिन्तामणावपि अव्यवधानेन शब्दजन्यप्रतीत्यनुकूला वृत्तिः शक्तिरित्यभिधीयते। तत्र ईश्वरसङ्केतः शक्तिः, आधुनिकसङ्केतः परिभाषा। शक्यार्थबोधकपदं वाचकमित्युच्यते । बोध्यक्षार्थोवाच्यः। शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः। वस्तुतः प्राचीननैयायिकानां मते- "ईश्वरेच्छा शक्तिः"। सा चेच्छा द्विविधाः, पदपकारिका अर्थविशेष्यिका,अर्थप्रकारिका पदविशेष्यिका च ।" अस्मात् शब्दात् अयमर्थो बोधव्यः। इदं पदम् इममर्थं बोधयतु इत्याकारा वा इश्वरेच्छा शक्तिः"[१०] लाघवान् सैव सङ्केतः सम्बन्धः इति तार्किकाः। प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधमङ्गीकुर्वाणां नैयायिकानां नये वाक्ये प्रथमान्तपदस्य मुख्यत्वात् प्रथमेच्छा भवति अर्थविशेष्यिका पदप्रकारिका। एवं द्वितीयेच्छा भवति पदविशेष्यिका अर्थ प्रकारिका। तत्र लौकिकेच्छाया वाहुल्यत्वात् लाघवदृष्ट्या ईश्वरेच्छाशक्तिरिति नैयायिकाः स्वीकुर्वन्ति। सा च ईश्वरेच्छारूपाशक्तिः आधुनिके नाम्नि शक्तिरस्त्येव।

वैयाकरणाः ईश्वरेच्छा शक्तिरिति नैयायिकोक्तं नाङ्गीकुर्वन्ति। यतः सम्बन्धत्वेन अभिमता या इच्छा सा शब्दार्थरूपसम्बन्धिद्वयात् भिन्ने एव ईश्वरे तिष्ठति। सम्बन्धस्तु सम्बन्धिद्वयनिष्ठः भवति, इयन्तु शब्दार्थरूपसम्बन्धिद्वयात् भिन्ने एव ईश्वरे वर्तते, अतः अस्याः इच्छायाः सम्बन्धत्वमपि न। अतः पदपदार्थयोः सम्बन्धान्तरमेव शक्तिरिति स्वीकार्यम्। सा च वाच्यवाचकभावापरपर्याया इति। अत्र वाच्यम् इत्युक्ते पदं, वाचकम् इत्युक्ते पदार्थः। अत्रेदं ज्ञातव्यं यत् वाच्यत्वं नाम न बोधविषयत्वरूपं, नापि वाचकत्वं बोधजनकत्वरूपमिति, अपितु अखण्डोपाधिरूपं पदार्थान्तरमेव वाच्यवाचकत्वे वर्तेते। ते उभे अपि वाच्यवाचकरूपशब्दार्थोभयनिष्ठे भवतः। वाच्यत्वन्तावत् अर्थनिष्ठम्, वाचकत्वमपि केवलं शब्दनिष्ठम्, तस्मात् एकनिष्ठत्वात् बोधविषयत्वरूपं बोधजनकत्वरूपमिति वा सम्बन्धः भवितुं नार्हति। सम्बन्धो हि द्विष्ठः भवति इति पूर्वमेव निरूपितम्। अनया रीत्या एकनिष्ठत्वात् सम्बन्धत्वाभावरूपपूर्वोक्तदोषस्य तथैव सत्त्वाद् बोधविषयत्वरूपं बोधजनकत्वरूपमिति वा न शक्तिः अनयोः सखण्डत्वात्। अत एव वाच्यवाचकभावापरपर्यायरूपः कश्चन अखण्डोपाधिरेव सम्बन्धान्तरम्। अखण्डोपाधिः नाम शब्दार्थोभयनिष्ठः कश्चन अनुगतधर्मविशेषः, यस्तावत् शब्दार्थोभयनिष्ठः भवति न तु शब्दे अर्थे वा पृथक् पृथक्। बोधविषयत्वरूपं बोधजनकत्वरूपं वा क्रमशः अर्थनिष्ठः शब्दनिष्ठश्च पृथक् पृथक् भवतः न तु उभयनिष्ठे अनुगततया। तस्मात् तयोः कस्यचिदेकतरस्यापि सम्बन्धकोटौ अप्रविष्टत्वात् ते त्यकत्वा नागेशभट्टः वाच्यवाचकभावापरपर्याय सम्बन्धान्तरमेव शक्तिरिति अङ्गीकरोति। अस्याः वाच्यवाचकभावरूपायाः शक्तेः ग्राहकं = बोधकं भवति इतरेतराध्यासमूलकं तादात्म्यम्। तदेव च सम्बन्धः। अनेन तादात्म्यस्य शक्तिग्राहकत्वमेव न तु शक्तित्वमित्यपि स्पष्टम्।

"एकादशेऽह्नि पिता नाम कुर्यात्" इति श्रुतिवचनात् तत्रापि ईश्वरेच्छा विधते । वाच्यवाचक भावस्यैव शक्ति: पदपदार्थयो: इति मीमांसकै: अङ्गीकृता । तत्र वैयाकरणै: बोधजनकत्वमेव शक्ति: । शक्ति: लक्षणा गौणी चेति त्रिस्रो वृत्तय: इति भाट्टमीमांसका: । तेषां मते व्यजना नास्ति । अभिहितान्वयवादिन: मीमांसका: अभिधातिरिक्तां तात्पर्यंलक्षणां च शक्तिरिति स्वीकुर्वन्ति । अन्ये मीमांसका: तात्पर्यं विहाय अभिधां लक्षणाश्च शक्तिभावेन स्वीकुर्वन्ति । आलङ्कारिका: वृत्तित्रयमङ्गीकुर्वन्ति । महिमभट्टेन केवलमभिधा स्वीक्रियते। इत्थञ्च शास्त्रान्तरेषु शक्ति: विभिन्नतया विभिन्नदृष्ट्या च विभाजिता सती तत्तत् शास्त्रविशेषतामवगाहते।

---

**सन्दर्भा: सन्दर्भग्रन्थाश्च -**

१.छान्दोग्योपनिषद् , गीताप्रेस-गोरखपुरप्रकाशनम् ७/१/२।
२.याज्ञवल्क्यस्मृति:, चौखम्बासुरभारतीप्रकाशनम्, वारणासी १/५।
३.वाक्यपदीयम् , चौखम्बासुरभारतीप्रकाशनम्, वारणासी १/१४।
४.पाणिनीयशिक्षा , स्वदेशप्रकाशनम् २०१० ।
५.वाक्यपदीयम् , चौखम्बासुरभारतीप्रकाशनम्, वारणासी ब्रह्मकाण्ड-११४।
६.काव्यादर्श: , चौखम्बासुरभारतीप्रकाशनम्, वारणासी ।
७.वैयाकरणपरमलघुमञ्जूषा , चौखम्बासुरभारतीप्रकाशनम्, वारणासी ।
८.न्यायसिद्धान्तमुक्तावली , चौखम्बासुरभारतीप्रकाशनम् वारणासी, २००८।
९.दूर्गासप्तशती , गीताप्रेस, गोरखपुरप्रकाशनम्।
१०. वैयाकरणपरमलघुमञ्जूषा ,चौखम्बासुरभारतीप्रकाशनम्, वारणासी ।

*विद्यावारिधि (Ph.D.) शोधच्छात्र:, नव्यव्याकरणविभाग:,*
*केन्द्रीयसंस्कृतविश्वविद्यालय:, श्रीसदाशिवपरिसर:, पुरी, ओडिशा।*
*मार्गादर्शक:–प्रो.के.वि.सोमेयाजुलु*

—०—

# वेदान्तसम्प्रदायेषु अचिन्त्यभेदाभेदसिद्धान्तः

**डॉ.शुभमयपाहाड़ी**

वस्तुतः दुःखनिवृत्तये अनपायोपायं प्रदर्शयितुं दर्शनशास्त्राणां प्रादुर्भाव समजनि। तानि च दर्शनानि मिथः विवदमानाऽपि साध्यनिरूपणे स्वसामर्थं निर्वहन्ति। तेषु वेदान्तदर्शनमिदं नितरां प्रथते। देहेन्द्रियव्यतिरिक्तमात्मज्ञानमेव दुःखनिवृत्तये साक्षाद्धेतुरिति निगदति वेदान्तदर्शनम्।श्रीवेदव्यासप्रणीतस्य ब्रह्मसूत्रस्य भाष्येषु नैकाः भाष्यकाराः आचार्याः भिन्न भिन्नप्रकारेण स्वकीयान् मतान् प्रतिपादितवन्तः। तेषु माधवाचार्यस्य द्वैतसिद्धान्तः,निम्बार्कस्य द्वैताद्वैतः, शंकरस्याद्वैतः, रामानुजस्य विशिष्टाद्वैतः श्रीचैतन्यदेवस्य च अचिन्त्यभेदाभेदसिद्धान्तः सुप्रसिद्धः। तेषु सिद्धान्तदृष्ट्या सर्वेषां मतभेदः स्पष्टः।

वैष्णवसम्प्रदायेषु अनादिवैदिकः भवति श्रीनिम्वार्कसम्प्रदायः। भगवतः श्रीनिम्वार्काचार्यस्य दार्शनिकसिद्धान्तः द्वैताद्वैतनाम्ना भेदाभेदनाम्ना वा प्रसिद्धः। आचार्यप्रवरोऽयं श्रीसर्वेश्वरप्रभोः प्रियदिव्यश्रीसुदर्शनचक्रराजस्यावरत्वेन कल्पितः। उच्यते तर्हि भविष्यपुराणे -

"सुदर्शनो द्वापरान्ते कृष्णाज्ञप्तो भविष्यति।
निम्बादित्य इति ख्यातो धर्मग्लानिं हरिष्यति"[१]।।

निम्वार्काचार्यस्य मतेन ब्रह्मानं जीव- जगद्भ्याम् स्वरूपतः भेदपरकम् अभेदपरकञ्चेति रूपद्वयं भिद्यते। यथा कार्यकारणात् भिन्नमपि अभिन्नमपि चेति। यतो हि उभयोर्मध्ये नाम-रूप-आकारादिभिः भिन्नत्वम्, सामग्रिकस्य एकत्वात् अभिन्नमपि स्पष्टम्। एवं कार्यजगत् ब्रह्मकारणात् भिन्नम् अभिन्नञ्चेति। वस्तुतः ब्रह्म स्वकीयया अनन्तशक्त्या जीव-जगद्रूपेण च प्रकाशितत्वात् ततोऽभिन्नरूपेण कल्पितम्। पुनश्च तत् अतीतरूपेण विद्यमानात् जीव-जगत्भ्यां भिन्नमपि । अतः ब्रह्म जीव-जगदित्येषां पारस्परिकं भेदाभेदप्रतिपादनमेव श्रीनिम्बार्काचार्यस्याभिप्राय इति। तदर्थं ब्रह्म-जीव-जगतां विस्तृतं विवेचनमेव कृतम्। श्रीनिम्वार्काचार्यस्य मतेन ब्रह्म आनन्दमयम् यत्रानन्दस्यैव प्राधान्यमिति[२]। आनन्दमयस्यार्थ न कदापि विकारवान्, तस्यानन्दः भूमावस्थायां गत्वा तिष्ठति[३]। वस्तुतः

जीवात्मानम् आनन्दप्रदानादपि परमात्मा एव आनन्दमय इत्युच्यते[४]। ब्रह्म जगतः न केवलमुपादानकारणम्, अपि तु जगतः निमित्तकारणमेव[५]। यतो हि अनेनाश्रुतं श्रुतं भवति। अमूर्तं मूर्तं भवति, अविज्ञातं विज्ञातं भवतीति। एकस्य मृत्पिण्डस्य दर्शनेन सम्पूर्णस्य मृत्पदार्थस्य ज्ञानं जायते तथैव परमात्मा जगतः कारणमिति निश्चितम्। स जगतः उपादानकारणमपि -"तदैक्षत बहुस्याम्"। इत्यादिना तदुपदेशात् ब्रह्मणः स्रष्टृत्वप्रकृतित्वे वर्तेते[६]इत्यनेन वाक्येन अभिलाषाप्रकटकारीब्रह्मचैतन्यं भवति स्वतन्त्रपरमात्मा। अयमात्मा आनन्दमयः, अप्राकृतः, सर्वशक्तिमान् पुरूषोत्तमस्वरूपश्चेति। तस्य नास्ति कापि वस्त्वन्तरस्य आवश्यकता यतो हि तस्य सर्जनेच्छया सङ्कल्पमात्रेण च जगत उत्पत्तिरिति[७]। श्रुतिष्वपि ब्रह्मण एकत्वं प्रतिपादितम्। उच्यते तर्हि " रसो वै स " "आनन्दो ब्रह्मह्लइत्यदीनि। आनन्द भवति ब्रह्मणः एकः विशिष्टगुणः, यस्यैव पृथगुल्लेखः दृश्यते। सर्वेषामेव उपसंहारः परमात्मन्येव इति ज्ञातव्यम् । स एव अचिन्त्यशक्तेः आधारः। श्रीनिम्बार्काचार्यस्य मतानुसारं वस्तुतः सम्पूर्णजगतः सृष्ट्यादिनां कारणं भवति ब्रह्म तत् कारणानां कारणम्, सर्वेषां नियन्ता स्वामि भवति ब्रह्म। श्रीनिम्बार्काचार्य एकेनैव श्लोकेन जीवस्य वास्तविकं स्वरूपं प्रतिपादयति। जीवः चैतन्यज्योतिस्वरूपः। शरीरेण संयोगी वियोगी, अणुपरिमाणः, सूक्ष्मः। भिन्नेषु शरीरेषु पृथक्त्वादनन्त परमात्माधीनः इति। उच्यते तर्हि -

"ज्ञानस्वरूपं च हरेरधीनं शरीरसंयोगवियोगयोग्यम्।
अणुं हि जीवं प्रतिदेहभिन्नं ज्ञातृत्ववन्तं तदनन्तमाहुः "[८]।।

जीवस्याणुत्वेऽपि सुखाद्यनुभवो भवतीति भाष्यकारः[९]। जीवात्मनः प्रकाशेनैव सर्वस्य शरीरस्य प्रकाश यथा एकस्मिन् स्थाने स्थितः प्रदीपः गृहस्य सर्वत्रं प्रकाशयतीति -" देहे प्रकाशो जीवगुणादेव, कोष्ठे दीपालोकादिवत्"[१०] इति। निम्बार्कमतेन आनन्दमयः परमात्मा, न तु जीवः। जीवात्मा न जायते न वा म्रीयते। स नित्योऽजन्मा चेति। अनेनैव जीवस्य नित्यत्वं सिद्धम्[११]। मुक्तजीवः ब्रह्मसाक्षात्कारं प्राप्य तस्मिन् पूर्णानन्दे निमग्नो भवति। किन्तु बद्धजीवस्यानन्दात्मकस्य जगतोऽनुभूतिः केवलं जड़रूपेणैव प्रतिभासते। भाष्यकारः ज्ञान-जीवयोर्मध्ये धर्म-धर्मीसम्बन्धरूपेण भेदाभेदसम्बन्धः स्वीकरोति।

वेदान्तस्य नैकेषु सम्प्रदायेषु द्वैतवेदान्तोऽन्यतमः। द्वैतदर्शनस्य प्रतिष्ठाता भवति मध्वाचार्यः। माध्वसिद्धान्तस्य नामान्तरं भवति ब्रह्मसम्प्रदायः। माध्वमतेन स्वतन्त्र-परतन्त्रभेदात् तत्त्वद्वयम्। स्वतन्त्रं भवति परमेश्वरः परतन्त्रञ्च जीव इति। साक्षात् विष्णुरेव परमात्मा परमेश्वरः वेति। परमात्मा अनन्तगुणैः परिपूर्णः[१२]। अर्थात् भगवतः गुणा अनन्ताः। तस्य सर्वे गुणाः निरवधिकाः निरतिशयाश्चेति। तत्र सजातीयोभयविधमानन्त्यं विद्यते।

उत्पत्ति-स्थिति[१३]-संहार-नियमन-ज्ञान-आवरण-बन्ध-मोक्षाणाञ्च कर्त्ता भगवान् एव। सर्वज्ञोऽयं जीव-जड़-प्रकृतिभ्य: विलक्षण:। ज्ञान-आनन्दादय: कल्याणगुणा: भगवत: शरीरस्वरूपा:। अत: स यद्यपि शरीरी तथापि नित्य: सर्वतन्त्रस्चेति। तस्यैकत्वेऽपि नानारुपं दृश्यते। तस्य परिपूर्णरूपं विद्यते। वस्तुत: परमात्मा सजातीय-विजातीय-स्वगत-नानात्वशून्यमिति[१४]अद्वैतीनां मतम्। द्वैतवादिभिश्च -" प्रतियोगिसापेक्ष एव सर्वत्र भेद: प्रथत इति चेन्न। प्रथमं सर्वतो विलक्षणतया वस्तुस्वरूपे ज्ञायमाने प्रतियोग्यपेक्षया विशिष्टव्यवहारोपपत्ते:।[१५]ठ अत्र विशेषणविशेष्यभावश्च भेदापेक्ष:। प्रत्यक्षानुमानाभ्यामेव जीवेश्वरयोर्भेदोऽत्र प्रतिफलित:। सुतरां यस्यैव जन्माद्यष्टकर्तृत्वं विद्यते स एव परब्रह्म। अत: वक्तुं शक्यते - जगतां जन्माद्यष्टककर्त्ता परब्रह्म इति। ननु वहुधा स्वरूपवर्णनात् क: परब्रह्म भवेदिति चेदुच्यते -"ब्रह्मशब्दश्च विष्णावेव[१६]। प्रत्यक्षादिभि: प्रमाणै: जीव-परमेश्वरयोर्मध्ये य: भेद: दृश्यते स कथमपि अपलपितुं न शक्यते। द्वैतमते शङ्करस्योभयसत्यत्वाङ्गीकारे समानधर्मत्वादैक्यं सम्भवति। अत: मध्वाचार्य: "तत्त्वतो भेद: " इति स्पष्टतया प्रतिपादयति। परमात्मा -जगत् च यथा सत्यरूपे तयोर्भेदोऽपि सत्यरूप इति। प्रमेयेषु भेदोऽज्ञस्यापि बुद्धिविषय: किमुत पण्डितामिति भाष्यकार:[१७]। सुतरां वस्तुनोर्मध्ये भेदस्तावदनुयोगिप्रतियोगिनो: प्रत्यक्षज्ञानसापेक्षो भवति। तथैव जीवेश्वरयोर्मध्ये भेद: प्रतिपादयितुं भाष्यकार: कथयति -" भेदप्रतिपादनं प्रत्यनुयोगिनो: प्रत्यक्षमावश्यकमिति नास्ति नियम:, स्तम्भ पिशाचो न इत्यत्र यद्यपि स्तम्भस्य प्रत्यक्षत्वं पिशाचस्याप्रत्यक्षत्वं तथापि तयोर्भेद: स्पष्टतया ज्ञायते"[१८]। एते द्वैतिन: भक्तिमार्गमाश्रयन्ते। तेषां मतेनाऽपि स्वस्वरूपाधिगमो मोक्ष:। किन्तु जीव: यदा स्वविस्मृतस्वरूपं नाम भगवतो विष्णोरहं भृत्य इत्यादि रूपेन जानाति तदैव तस्य जीवस्य तस्मिन्नीश्वरे भक्तिर्जायते। एवञ्च क्रमेणोपासनया मोक्षं प्राप्नोति। एतन्मते यथार्थतोऽभेदज्ञानं बन्धनं भेदज्ञानञ्च मुक्तिरिति। मुक्तिर्नैजसुखानुभूतिरिति भाष्यकार:। स्वकर्मानुसारमपि जीवा: सालोक्यादिचतुर्विधं मोक्षसुखमनुभवन्ति।भक्तिमार्गस्य मालिन्यं दृष्ट्वा आचार्य: मध्व: वैदिकसिद्धान्तं प्रतिष्ठयामास:।

हिन्दुसम्प्रदाये निर्गुण-निराकारे ईश्वरे सगुण-साकारवादस्य स्थापनं रामानुजाचार्येण कृतम्। अस्य सिद्धान्त: विशिष्टाद्वैतसिद्धान्त इत्युच्यते। ईस्वरस्य स्वरूपप्रसङ्गे तेनोक्तम् - ईश्वर: सर्वेषां प्रभु: सर्वेषां पूरकश्चेति। जीव: जगच्च तस्य शरीरस्य रूपमेकम। ईश्वर: सर्वत्र आत्मत्वेन स्थित्वा नियन्त्रको भवति। उच्यते तर्हि श्रीभाष्ये -"परस्यैव ब्रह्मण: सर्वात्मकं सर्वशरीरकत्वं सर्वनियन्तृत्वं च प्रतिपद्यते।"[१९]तन्मते पृथिव्यादि जड़जगत्

ईश्वरेण परिव्याप्तम्। जीवात्माऽपि तेन व्याप्तः । विशिष्टाद्वैतमतानुसारं एकमेव ब्रह्मास्ति। यः सर्वेषु आत्मभावेन तिष्ठति, सर्वेषाञ्च नियामकः। ब्रह्म जीवं कर्मणि प्रेरयति, सामर्थ्य प्रददाति अन्ते च कर्मानुसारं फलमपि ददाति। जीवस्य शरीरगतविकारादिभिः स न बद्धो भवति। बृहदारण्यकोपनिषदः व्याख्यानेऽपि भाष्यकार; कथयति -"अपि चैके शाखिन एकस्मिन्नेव देहसंयोग बोधस्यापुरुषार्थे परस्य तु तद्भावम् अधीयते"[२०]। स सत्यकामः, सत्यसंकल्पः, सर्वेषां नियन्त्रकः सर्वेश्वरश्चेति[२१]। विशिष्टाद्वैतमते ईश्वरः सर्वसद्गुणसम्पन्नः। स परिणामशून्यः, पूर्णः सर्वोत्कृष्टश्चेति। क्षरं जगत् अक्षराश्रयरूपे ईश्वरे तिष्ठति। अतः सारोऽयं सत् पदवाच्यः। नास्ति तत्र कर्मसंक्रमणम्। अतः ब्रह्म सत्यानां सत्यम्- "तस्य च ब्रह्मणः सत्यस्य सत्यमिति नामधेयम्[२२] ।अपि च "जीवानां कर्मानुगुण्येन ज्ञानसंकोच तुसौ विद्यते......सत्यमिति"[२३]। " प्राज्ञस्यानन्दः सारभूतो गुण इति प्राज्ञ आनन्दशब्देन व्यपदिश्यते[२४]। अर्थात् ईश्वरः सर्वेषां ज्ञानशक्त्यादिकल्याणगुणानामाश्रय आनन्दश्च तस्य सारगुणः। नास्ति तत्र दुःखस्य लेशः। [२५] तैत्तिरीये स एव रसः[२६]। रामानुजीयदर्शने धर्मभूतं ज्ञानं चित्तत्वस्य अपृथक्सिद्धविशेषणमिति। तस्य ज्ञानं परमशुद्धत्वात् सः नित्यः विभुश्चेति। परमात्मा देशगत-कालगत-वस्तुगतपरिच्छेदभिन्नत्वात् आनन्तः। सत्यत्वं, ज्ञातृत्वं आनन्दत्वं च परमात्मनः स्वरूपनिर्देशकगुणः। सर्वज्ञत्वं, सर्वशक्तित्वञ्चादीनि कार्योपयोगीधर्माः। वात्सल्य,सौशील्य-सोम्यत्वादिगुणैः सः जीवात्मनः आश्रयः भवति। करूणादिधर्मः तस्य रक्षकरूपमभिव्यनोक्ति।

वेदान्तसम्प्रदायेषु अन्यतमोऽस्ति अद्वैतसम्प्रदायः। अस्य दर्शनस्य मूलं तत्वं भवति ब्रह्मणः अद्वितीयत्वस्थापनम्। गौड़पादाचार्यः यद्यपि सम्प्रदायस्यास्य प्रवर्त्तकः तथापि शङ्कराचार्येनैवास्य विशेषः प्रचारः कृतः। तेन विरचितं ब्रह्मसूत्रभाष्यं शारीरकभाष्यनाम्ना प्रसिद्धम्।[२७] उपनिषत्स्वपि ब्रह्म सदिति उक्तम्। ऐतरेयोपनिषदि उच्यते - "आत्मा वा इदमेक एवाग्र आसीत्[२८] " इति। बृहदारण्यके च "आत्मा एवं इदमग्र आसीत् पुरुषविधः[२९] "इति उद्घोषितम्। अर्थात् परिदृश्यमानसंसारोऽयं पुरुषाकारेण आत्मरूपेणासीत्। अपि च आत्मानं दर्शन-श्रवन-मननमाध्यमेन च सर्वं ज्ञायते[३०]। छान्दोग्ये उच्यते - सर्वमिदमात्मा[३१]। पुनश्च " सदेव सौम्य इदमग्र आसीदेकमेवाद्वितीयम्[३२]। अर्थात् जगदिदमादौ एकाद्वितीय सद्रूपेणासीत्। बृहदारण्यकेऽपि स्पष्टरूपेण कथितं यत् -" अयमात्मा ब्रह्म"[३३] "अहं ब्रह्मास्मि[३४] " चेति। सुतरामुपनिषत्सु सर्वत्रैव अद्वैतसिद्धान्तः वीजाकारेण निहितः। ऋग्वेदस्य नासदीयसूक्ते वर्णिता एका परमसत्ता भवति ब्रह्म[३५]। सृष्टिविषयकं तत्त्वं तेन

ज्ञातम्[३६]। पुरुषसूक्ते उल्लिखित: विराटपुरुष: सगुणब्रह्मरूपेण[३७] नासदीये च अनिर्वचनीयनिर्गुणब्रह्मरूपेण उपस्थापितम्।

जीवात्मनोऽस्तित्वमाधारीकृत्य सर्वे खलु सिद्धान्ता: वेदान्तेषु प्रवर्त्तिता:। विषयेऽस्मिन् शङ्करपादैरुक्तम् –" सर्वो ह्यात्मास्तित्वं प्रत्येति, न नाहमस्मीति प्रतीयात्[३८]। "अत: सर्वेषामेव अहमिति ज्ञानं जायते इति कृत्वा जीवात्मनोऽस्तित्वं विद्यते एव। अद्वैतनये ब्रह्मेव चराचरस्यास्य जगत: कारणं भवति। " यतो वा इमानि भूतानि जायन्ते.......[३९]" इत्यादीनि वाक्यानि ब्रह्मण: कारणत्वं प्रतिपादितम्। अस्मिन् दर्शने ब्रह्मभिन्नस्य कस्यापि वस्त्वन्तरस्य सत्ता नाङ्गीक्रियते। "ब्रह्म सत्यं जगन्मिथ्या ,"नेह नानास्ति किञ्चन[४०]" इत्यादीनि श्रुतिवाक्यानि अद्वैतसिद्धान्तं प्रतिपादयन्ति. जगदधिकृत्याद्वैतिन: विचारयन्ति यत् -" गच्छति नाम उत्पत्तिस्थितिलयान् प्रापनोति जगत्ह्र इति व्युत्पत्त्या जगन्न नित्यम्, तत्तु परिवर्त्तनशीलं सदसदात्मकम्। इदं मायिकं जगत् ब्रह्मण्यध्यस्तम्। परिवर्त्तनशीलं जगदिदं शुक्तिकायां रजतवद् ब्रह्मणि अध्यस्तम्। अर्थात् स्वस्वरूपमनपहायापररूपेणावभासनं भवति। सिद्धान्तोऽयं विवर्त्तवाद इत्युच्यते। उच्यते तर्हि वेदान्तसारे सदानन्देन -

" सतत्त्वतोऽन्यथा प्रथा विकार इत्युदीरित:।
अतत्त्वतोऽन्यथा प्रथा विवर्त्त इत्युदीरित:।।[४१]"

रज्जौ सर्पज्ञाने शुक्तिकायां वा रजतज्ञाने रज्जुशुक्तिकयोर्वक्रत्वचाकचक्यादिगुणास्तथैव तिष्ठति। परन्तु तत्र करणापाटववशात् दूरत्वादिव्यवधानवत्वा रजतभिन्नाऽपि शुक्तिका रजतवत्, सर्पत्वरहिताऽपि रज्जु: सर्प इव प्रतिभासते। एवमविद्यावशात् ब्रह्मणि जगदवभासते[४२] इति ग्रन्थकार: विश्वम्भरानन्द:। सत्यं ज्ञानमनन्तम् इत्यादिना प्रकृतं ब्रह्म निर्गुणं कूटस्थं, असें च भवति। अविद्योपहितं सत् तत् जगद्रचनादौ प्रवर्त्तते। अविद्योपहितस्य ब्रह्मण: संसारधर्मनामरूपादिकं च सम्भवति। सद्ब्रह्म मायया मायाचिद्वदनेकरूपेण विभाव्यते। वस्तुत: ब्रह्मण: रूपद्वयम् यथा नामरूप-विकारभेदोपाधिसहितम्, सर्वोपाधिरहितश्चेति। जगत्प्रति ब्रह्म निमित्तोपादानं कारणमिति। ब्रह्म रज्जौ सर्पवत् स्वरूपमपरित्यज्य स्वरूपान्तरेण जड़जगदाकारेण प्रतीयते। सुतरां जगन्न सत्, सत्तु केवलं ब्रह्मैव। ऊर्णनाभ इव अक्षरात् ब्रह्मण: जगत: उत्पत्ति:[४३] इति मुण्डकोपनिषद्। मायाशक्तिप्रभावेन ब्रह्म सूक्ष्मात् स्थूलजगद्रूपेण प्रतिभाति। एवं ब्रह्मणि जगदध्यस्तम् इति ब्रह्म जगत: उपादानकारणम्। निष्कर्षरूपेण वक्तुं शक्यते पारमार्थिकदृष्ट्या यत् ब्रह्म, व्यवहारिकदृष्ट्या तदेव ईश्वर:। ईश्वरस्योपासनया चित्तशुद्धि:, चित्तशुद्धिं विना नात्मसाक्षात्कार इति। भाष्यकारस्य मतेन मुक्ति: ज्ञानेन लभते। उच्यते तर्हि श्वेताश्वतरोपनिषदि -" तमेव विदित्वाऽतिमृत्युमेति[४४]" इति। अपि च

"ऋते ज्ञानान्न मुक्तिरितिह्न।शङ्कराचार्येण मुक्तिद्वयं स्वीकृतम् जीवन्मुक्तिः विदेहमुक्तिभेदेन। जीवन्मुक्तावस्थायां सर्वानि बन्धनानि छिद्यन्ते इति। प्रारब्धकर्मणः विनाशेन शरीरनाशे जीवन्मुक्तः पुरुषः विदेहमुक्तिं प्राप्नोति। विदेहमुक्तस्य पुनर्जन्म न भवति।

वङ्गदेशस्य साधारणजनाः यस्य रसमयकीर्त्तनेन भक्तिमुखीनः रसामृतमूर्तिसम्पन्नाः सञ्जाताः सः भवति बल्लभाचार्यस्य समसामयिकः आचार्यः, जगन्नाथमिश्रस्य पुत्रः श्रीमन्महाप्रभुचैतन्यदेवः[४५]। चैतन्यस्याविर्भावसमये वङ्गप्रदेशे शक्तिपूजायाः तामसीसाधनायाश्च प्राधान्यवशात् यद्यपि विष्णुभक्तेः समादरः नानुभूयते: तथापि चैतन्यस्य प्रेरणया सात्त्विकोपासनार्थं कृष्णभक्तेः प्रचारार्थञ्च जनाः समाकृष्टाः अभवन्। न केवलं वङ्गप्रदेशे, अपि तु उत्कलादारभ्य ब्रजमण्डलं यावत् श्रीचैतन्यदेवस्य प्रभावः अनुभूतोऽभूत्। वैष्णवधर्मस्योत्थानाय तस्य प्रयत्नः सर्वैः सुविदितः। तेन प्रवर्त्तितः सिद्धान्तः गौडीयसिद्धान्त इत्युच्यते। स चाचिन्त्यभेदाभेदवादस्य प्रवर्त्तकत्वेन प्रचारकत्वेन च सुविदितः। वस्तुतः सिद्धान्तोऽयं श्रीरूप-सनातन-जीवगोस्वामीपादैः परिपुष्टोऽभवत्। भागवतादिपुराणेषु वर्णितकृष्णचरितमाधारीकृत्य वैष्णवसिद्धान्तसमन्वितं महाप्रभुना प्रदत्तं यत्तत्त्वं तस्याधारेण परवर्त्तिकाले रूप-सनातन-जीवगोस्वामीप्रभृतिभिः तच्छिष्यैश्च भक्तितत्त्वस्य प्रचारार्थं बहवः ग्रन्थाः विरचिताः। उत्कलप्रदेशस्य सुप्रसिद्धः दार्शनिकः बलदेवविद्याभूषणः ब्रह्मसूत्रस्योपरि यद्भाष्यं विरचितवान् तद् गोविन्दभाष्यं चैतन्यमतस्य दार्शनिकं रूपम्। गौड अर्थात् प्राचीनवङ्गप्रदेशे चैतन्यस्य जन्म आसीदिति कृत्वा सम्प्रदायोऽयं गौडीयवैष्णवसम्प्रदायनाम्ना प्रसिद्धः। सम्प्रदायस्यास्य दार्शनिकसिद्धान्तः "अचिन्त्यभेदाभेद"त्वेन सुविदितः।

अचिन्त्यभेदाभेदस्य स्वरूपं यत् परमतत्त्वस्य शक्तिः अकल्पनीया। तत्र भगवान् श्रीकृष्ण एव परमतत्त्वम्। एतन्मते परब्रह्मस्वरूपः श्रीकृष्णः सर्वशक्तिमान्। ऐतिह्यासिकदृष्ट्या यद्यपि सम्प्रदायोऽयं मध्वाचार्यस्य मतास्यानुरूपः तथापि दार्शनिकसिद्धान्तभेदात्तस्य पृथक्त्वेन कथनम्। बलदेवस्य मतेन भागवतमेव ब्रह्मसूत्रस्य मूलं भाष्यम्। वस्तुतः चैतन्यदेवस्य सिद्धान्तः अचिन्त्यभेदाभेदनाम्ना प्रसिद्धः। ननु "अचिन्त्य" इति शब्दस्यात्र कोऽर्थः ? नैकेषु अर्थेष्वेव आचिन्त्यशब्दस्य प्रयोगः दृश्यते। तत्रोक्तं श्रीधरस्वामीपादेन यत्- "अचिन्त्यं तर्कासहं यज्ज्ञानमह्न - अर्थात् यज्ज्ञानं तर्कगम्यं न भवति तदचिन्त्यमिति ।"Achintya means in conceivable", bheda translates as 'difference', abheda translets as 'non difference'....... This school representing the philosophy of inconceivable oneness and difference [46]" जीवगोस्वामीपादानुसारमचिन्त्यं नाम अर्थापत्तिगम्यम् - "भिन्नाभिन्नत्वादिविकल्पैश्चिन्त-

यितुमशक्य: केवलमर्थापत्तिज्ञानगोचर:" इति उच्यते च कृष्णोपनिषदि - "न भिन्नम्, नाभिन्नामाभिर्भिन्नो न वै विभु:[४७]।" षट्सन्दर्भस्य भागवतसन्दर्भे गोस्वामिपादेनाचिन्त्य-शक्तिविषये उक्तं यत् - या शक्ति: असम्भवं सम्भवरूपेण प्रतिपादयति अथवा या अभेदेषु भेदं दर्शयति सा शक्ति: अचिन्त्यशक्तिरिति। "दुर्घटघटकत्वम् अचिन्त्यत्वम्"[४८]। रूपगोस्वामी विशेषमेव अचिन्त्यस्य पर्यायवाचीत्वेन स्वीकरोति। तन्मते -

"विशेषबलात् तद्भेदव्यवहारो भवति विशेषश्च।
भेदप्रतिनिधि: भेदाभावेऽपि तत्कार्यं प्रत्याय्यम्।।[४९] "

अचिन्त्यभेदाभेदसिद्धान्तानुसारं भगवान् श्रीकृष्ण एव परंब्रह्म, सर्वशक्तिमान्। शक्ति-शक्तिमद्रूपेण ब्रह्मणा सह जीवजगत: स्थिति:। शक्ति-शक्तिमानित्यनयोर्यथा पृथग्ज्ञानं न सम्भवति केवलं तत्र पृथग्रूपेण तत्कार्यं ज्ञायते, तथैव अस्तित्वदृष्ट्या ब्रह्मण: जीवजगतोरभेद:। कार्यदृष्ट्या च भेद इति। अयं भेदाभेदसम्बन्ध: यद्यपि नित्य: सत्यश्चेति तथापि मानवीयचिन्तनपरिधे: बहिर्भूतत्वादचिन्त्य:। अत: सिद्धान्तोऽयमचिन्त्यभेदाभेदनाम्ना ख्यात:। अतोऽत्र वक्तुं शक्यते जीवगोस्वामिन: वचनं यत् - "स्वरूपादभिन्नत्वेन चिन्तयितुमशक्यत्वात् भेद:, भिन्नत्वेन चिन्तयितुमशक्यत्वादभेदश्च प्रतीयते इति शक्ति-शक्तिमतोर्भेदाभेदौ अङ्गीकृतौ ।" इति।

अचिन्त्यभेदाभेददर्शनानुसारं भेदाभेदोभयं सदिति, भेदाभेदोऽयं चिन्तनस्यातीत:। एतस्मिन् सिद्धान्ते भगवान् श्रीकृष्ण: सच्चिदानन्दस्वरूप: अनन्तगुणानामाश्रयस्थलश्चेति। भगवत: अनेकासु शक्तिषु मुख्या: भवन्ति यथा - (१) स्वरूपाशक्ति:, (२) मायाशक्ति: (३) तटस्थाशक्तिश्चेति। तत्र स्वरूपाशक्ति: अन्तरङ्गा चित्स्वरूपा वेति। सा सन्धिनी संवित् - ह्लादिनीरूपेण प्रकाश्यते। सन्धिनीशक्त्या भगवान् स्वकीयसत्ता परकीयसत्ता च धारयति। संवित्शक्तिमाध्यमेन स ज्ञानं लभते जीवान् च प्रददाति। ह्लादिन्या च भगवान् आनन्दं लब्ध्वा अपरान् आनन्दं ददाति। एवं मायाशक्तिद्वारा जीवस्याविर्भाव इतिकृत्वेयं बहिरङ्गाशक्तिरिति। अपि च तटस्थशक्त्या अणुत्वविशिष्टानां परिच्छिन्नानां जीवानामाविर्भाव भवति। एतेषु ब्रह्मशक्तिषु स्वरूपशक्ते: प्रधानत्वादियं पराशक्तिरित्युच्यते। शक्तिशक्तिमत: नित्यसम्बद्धत्वात् ब्रह्म सर्वदासविशेषं सगुणमिति ज्ञेयम्। सुतरां वैष्णवदर्शनानुसारं श्रीकृष्ण: पूर्णशक्तिमान् राधिका च तस्य शक्तिस्वरूपा। चैतन्यश्च राधा-कृष्णयो: युगल: विग्रह:। अनेन मतेन ब्रह्म तस्य मायाशक्तिमाध्यमेन जगत् सृजति। अत: जगत् सत्। यतो हि सृष्टिकाले जगदिदमीश्वरस्य कृते अभिभक्तत्वेन तिष्ठति, प्रलयकाले च तस्मिन् ईश्वरे इदं जगत् सुप्तरूपेण विराजते। जीव-ब्रह्मणोर्मध्ये भेदाभेदौ

विद्यत:। चिन्मयत्वादभिन्नौ, गुणप्रभेदाच्च भिन्नौ इति। एकस्मिन् काले एकस्य वस्तुन: भेदाभेदासम्भवात् तत्त्वचिन्त्यमिति । एवं जगत् ब्रह्मण: स्वरूपादिभि: अभिन्नमित्यचिन्तनीयम्, अतो भेद:। भेदोऽपि च न चिन्तनीय: अतोऽभेद: प्रतीयते। सुतरां शक्ति-शक्तिमदित्यनयो: भेदाभेद: स्वीकृत:, यस्त्वचिन्त्य:।श्रीचैतन्यदेवस्य सिद्धान्तसार: विश्वनाथचक्रवर्त्तीमहोदयेन सूचारूतया प्रतिपादयति यत् -

"आराध्यो भगवान् ब्रजेशज्ञतनयस्तद्धाम वृन्दावनं
रम्या काचिदुपासना ब्रजवधूवर्गेण या कल्पिता ।
शास्त्रं भागवतं प्रमाणममलं प्रेमा पुमर्थो महान्
श्रीचैतन्यमहाप्रभोर्मतमिदं तत्रादरो न: पर: [१०]।।"

सुतरामीश्वरस्य शक्तिमाध्यमेनैव जीवस्य जगतश्चोत्पत्ति:। जीव-जगतो: ईश्वरान्नास्ति कोऽपि भेद:, नास्ति चाभेद इत्ययं सम्बन्ध: सदैव अचिन्त्यज्ञानगोचर इति।

**सहायकग्रन्थानुक्रमणिका -**

१.पाण्डेय,ड.विजयकृष्ण,ईशावास्योपनिषद्,मोतिलालवनारसीदास:,मुम्वाई,२०१४।
२. दास:,साधु भद्रेश, उपनिषद् मर्म, स्वामिनारायण अक्षरपीठम्, २०१२।
३. गौरोला, वाचस्पति, भारतीयदर्शनम्,लोकभारतीप्रकाशनम्,वाराणसी, तृतीयसंस्करणम्,१९७२।
४.श्रीमन्मध्वाचार्य:,भागवत् तात्पर्यनिर्णय:, मायापुर श्रीचैतन्यमठ, प्रथमसंस्करणम्,मायापुर,.१९८५।
५. महर्षिजैमिनि:,मीमांसादर्शनम्, आनन्दाश्रमसंस्था, पुना,चतुर्थसंस्करणम्,१९७६।
६. भट्ट, कुमारिल:,मीमांसाश्लोकवार्त्तिकम्,भारतीयविद्याप्रकाशनम्, प्रथमसंस्करणम्,१९७१।
७.सान्याल,निशिकान्त:,मुण्डकोपनिषद्,मञ्जूषाप्रिण्टिंवार्कस्,ढाका,द्वितीयसंस्करणम्,१९८१।
८.आचार्य, विष्णुदास:,वादरत्नावली,चौखम्बासंस्कृतसीरीज, द्वितीयसंस्करणम्,१९८६।
९.यति,सदानन्द;,वेदान्तसार:,परिमलपाब्लिकेशन्स, वाराणसी, द्वितीयसंस्करणम्,१९८१।
१०.शास्त्री,दामोदर:,वेदान्तमञ्जूषा,दामोदरशास्त्री,पुरी, प्रथमसंस्करणम्,१९३८।
११.गोस्वामी,श्रीतत्त्वसन्दर्भ:,श्रीजीव, श्रीचैतन्यमठ:,श्रीमायापुरम्, तृतीयसंस्करणम्,२००७।

१२. गोस्वामी, श्रीजीव, श्रीभगवत्सन्दर्भः, श्रीचैतन्यमठः,श्रीमायापुरम्, तृतीयसंस्करणम्, २००७।

---

**सन्दर्भाः**

१. भ.पु.,१५.४.१७।

२. आनन्दमयः परमात्मा एव न तु जीवः। नि.भा., १.१.१३।

३. निरतिशय-सुखरूपत्वामृतत्वस्वमहिमप्रतिष्ठितत्वादीनां परमात्मन्येवोपपत्तेश्च भूमा परमात्मैव। तत्र,१.१.९।

४. जीवानन्देहेतुत्वादपि परमात्मैवानन्दमयः। तत्र,१.१.१५।

५. प्रकृतिरुपादानकारणं चकारान्निमित्तकारणं च परमात्मैव । तत्र,१.४.२३।

६. तत्र,१.४.२४।

७. कामात् संकल्पादेव, सोऽकामयतः बहुस्यामः, इत्यादि श्रुतेः अतः तद्भिन्न आनन्दमयः। तत्र,१.१.१९।

८. वे.का.द.श्लो.,१।

९. जीवोऽपि प्रकाशयति , अतः कृत्स्नशरीरे सुखाद्यनुभवो न बिरुद्ध्यते। तत्र,२.३.२३।

१०. तत्र,२.३.२५।

११. न जायते न म्रियते वा विपश्चित् नित्यो नित्यानाम्। तत्र, २.३.१७।

१२. नित्यपूर्णाखिलगुणनिर्दोषः सर्वदैव यः।
य: स्वतन्त्रः परो विष्णुः जन्ममृत्त्वादिवर्जितः।।
विष्णुसर्वगुणैः पूर्णं ज्ञात्वा संसारवर्जितः।
निर्दुःखानन्दभुङ् नित्यं तत्समीपे स मोदते।। ब्र.सू.मा.भा.

१३. जन्माद्यस्य यतः। ब्र.सू.,१.१.२।

१४. सदेव सौम्येदमग्र आसीत्। एकमेवाद्वितीयम्। छा.उ.,.६.२.१।

१५. स.द.स.,पृ.२१५।

१६. तत्र,१.१.११।

१७.स्वलक्षणानुसारमपि जीवः परमात्मनो भिद्यते। अज्ञानादिदोषयुक्तत्वं संसारित्वं चेति लक्षणं जीवस्याङ्गीकरणात् इति।

१८. सामान्य.द.,पृ.६२।

१९.श्री.भा.,१.२.९।

२०. तत्र, ३.२.१३।
२१. य.म.,पृ.८४।
२२. श्री.भा.,२.३.२।
२३. तत्रैव।
२४. तत्रैव।
२५. आनन्द प्राचुर्यमल्पदु:खाभावमगमयतीति तदसत् प्रमाणान्तरेण तद्भावोपगम्य:। तत्र, १.१.१४।
२६. रसो वै स:। तै.उ.,२.७।
२७. शरीरे भव, शरीरेण व्यज्यते इति शारीरक:, शरीरवानात्मा। भा.द.(वा), पृ.३५३।
२८. ऐ.उ.,१.१।
२९. बृ.उ.,१.४.१।
३०. आत्मनि खलु अरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम्। तत्र,४.५.६।
३१. छा.उ.,७.२५.१।
३२. तत्र,६.२.१।
३३. बृ.उ.,२.५.१०।
३४. तत्र,१.४.१०।
३५. नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमो परे यत्। ऋग्.,१०.१२९.१।
३६. इयं विसृष्टि: यत: आवभूव यदि वा दधे यदि व ा न।
यो अस्य अध्यक्ष: परमे व्योमन्तसे अङ्ग वेद यदि व ा न वेद।। तत्र,१०.१२९.७।
३७. सहस्रशीर्षा पुरुष: सहस्राक्ष सहस्रपात्।
स भूमिं विश्वतो वृत्त्याऽत्यातिष्ठद्दशाङ्गुलम्।। तत्र, १०.९०.१।
३८. ब्र.सू.शा.भा.,१.१.१।
३९. तै.उ.,३.१.१।
४०.बृ.उ.,४.४.१९।
४१.वे.सा.,पृ.२६।
४२. परमात्मैव अज्ञानेन धीवरत्वलब्धराजपुत्रवत् जीवत्वं लभते। आ.द.,३.पृ.५६
४३. यथोर्ननाभि: सृजते गृह्यते च यथा पृथिव्यामोषधय: सम्भवन्ति।
यथा सत्त: पुरूषात् केशलोमानि तथाऽक्षरात् सम्भवतीह विश्वम्।। मुण्ड.१.१.७।
४४. श्वे.श्व.उ.,३.८।

४५. As a matter of fact, he was a junior contemporary of Ballabh.....", A History of Indian philosophy, Dr. S.N. Dasgupta, Motilal Banarsidas, Delhi, Vanaras, Patna 1st Ed. 1975, page-384.

४६.Gupta, Ravi. M. (2007), Caitanya Vaisnava Vedanta of Jiva Goswamin's Caturstri tika. Routledge, pp.47-52.

४७. कृ.उ., १.२५

४८. ष.सं., भा.सं ।

४९. सि.र., ८३/४।

५०. भारतीयदर्शन, (Odia) डॉ.गौराङ्गचरणनायकः, ओडिशा राज्य पाठ्यपुस्तकप्रणयन ओ प्रकाशन संस्था, भुवनेश्वर, २०११, पृ. ४४२.

*अध्यापकः,संस्कृतविभागः(स्नातक-स्नातकोत्तरयोः)*
*प्रभातकुमारमहाविद्यालयः,काँथिः,पश्चिमवंगः।*

—०—

# राजनीतिज्ञा द्रौपदी

**नीलाम्बरबाघः**

वैदिककाले , स्मृतिकाले, रामायणकाले , महाभारतादि काले च नारीणां स्थितिः अतीव गौरवास्पदम् आसीत् । जायेदस्तम् ।[१] जाया एव गृहं मन्यते स्म । सम्राज्ञी श्वशुरे भव।[२] सा श्वशुरश्वश्र्वोश्च नियन्त्री आसीत् । यत्र नार्यस्तु पूज्यन्ते, रमन्ते तत्र देवताः।[३] यत्र नारीणां पूजा सम्मानं च क्रियते , तत्र देवानां निवासः । ताभ्यः उच्चशिक्षायाः प्रविधानमासीत् । ताः शिक्षिताः नार्यः व्यवसायक्षेत्रे, व्यापारवाणिज्यसंबद्धेषु कार्येषु महतीं क्षमतां द्योतयन्ति स्म । न केवलमेतदेव अपि तु ताः राजकीयकार्येषु , प्रशासन-संबद्धेषु च कार्येषु अपि स्वीयामुत्कृष्टतां साधयन्ति स्म । तासु स्त्रीषु पाण्डववधू द्रौपदी अन्यतमा । एषा द्रुपदपुत्री पाण्डववधू द्रौपदी राजनीतिक्षेत्रे स्वतन्त्रस्थानमावहति। धर्मराजयुधिष्ठिरः यदा धर्मान्धः सन् द्युतक्रीडायां सर्वहरा भवति । राज्यादिकं च हरति तदा पुनः राज्यप्राप्त्यर्थमुपायादिकं न पश्यति तस्मिन्नेवासरे द्रौपदी वहुधा धर्मराजयुधिष्ठिरं राजनीतिं शिक्षयति । राज्यापहृतेन शत्रुणा सह कीदृशः व्यवहारः करणीयः ? किं करणीयम् ? किं न करणीयम् ? कथं च कार्यं सम्पादनीयम् ? इत्यादि विषये विस्तृतभावेन स्वमतं प्रकटयामास । अत्र तु दिङ्मात्रमुदाह्रीयते-

तत्र महाभारतस्य वनपर्वणः अर्जुनाभिगमनपर्वणि द्रौपदी युधिष्ठिरे शत्रुविषयकं क्रोधमुत्पादयितुमित्थं कथयति –

"न निर्मन्युः क्षत्रियोऽस्ति लोके निर्वचनं स्मृतम् ।
तदद्य त्वयि पश्यामि क्षत्रिये विपरीतवत् ।।" [४] इति ।।

संसारे न कोऽपि क्षत्रियः क्रोधरहितः भवति, क्षत्रियशब्दस्य व्युत्पत्तिः एव एतादृशी अस्ति । यया क्षत्रियस्य क्रोधः सूचिता भवति । परन्तु अधुना भवादृशेषु क्षत्रियेषु क्रोधस्याभावः क्षत्रियस्य वीपरित इव अहं अवलोकयामि ।

"यो न दर्शयते तेजः क्षत्रियः काल आगते ।
सर्वभूतानि तं पार्थ सदा परिभवन्त्युत ।।[५] इति ।

हे कुन्तीनन्दन ! यः क्षत्रियः सकाले स्वस्य प्रभावं नैव दर्शयति , तं सर्वे अपि जन्तवः सदा तिरस्कारं कुर्वन्ति ।

तत् त्वया न क्षमा कार्या शत्रून् प्रति कथंचन ।

तेजसैव हि ते शक्या निहन्तुं नात्र संशयः ।।[६] इति ।।

हे राजन् ! शत्रवः न कदापि भवता क्षन्तव्याः । तेजसा एव तेषां हननं कर्तुं शक्यते नात्र संदेहलेशः ।

तथैव यः क्षमाकाले क्षत्रियो नोपशाम्यति ।

अप्रियः सर्वभूतानां सोऽमुत्रेह च नश्यति ।[७]इति ।।

इत्थं यः क्षत्रियः क्षमाकरणयोग्यसमये शमितो न भवति । सः सर्वेभ्यः प्राणिभ्यः अप्रियः भवति । तथा इहलोके परलोकेऽपि तस्य विनाशः एव भवति ।

मृदुर्भवत्यवज्ञातस्तीक्ष्णादुद्विजते जनः ।

काले प्राप्ते द्वयं चैतद् यो वेद स महीपतिः ।।[८] इति ।।

कोमलपूर्णव्यवहारं यः करोति तं सर्वे अवहेलनां कुर्वन्ति । किन्तु यः तीक्ष्णस्वभावयुक्तः भवति तत्र सर्वे उद्वेगं प्राप्नुवन्ति । यश्च समये एव उभयोः प्रयोगं करोति सः सफलो भूपालो भवति ।

द्रौपदी युधिष्ठिरस्य वुद्धेःधर्मस्य च आक्षेपमित्थं करोति –

कर्मभिश्चिन्तितो लोको गत्यां गत्यां पृथग्विधः ।

तस्मात् कर्माणि नित्यानि लोभान्मोक्षं यियासति ।।

नेह धर्मानृशंस्याभ्यां न क्षान्त्या नार्जवेन च ।

पुरुषः श्रियमाप्नोति न घृणित्वेन कर्हिचित् ।।[९] इति ।।

कर्मानुगुणम् उत्तम-मध्यम-अधमयोनिषु भिन्न भिन्न लोकानां प्राप्तिः इति निगद्यते । कर्म नित्यमस्ति किन्तु मूर्खाः लोभात् एव मोक्षमभिलषन्ति । न कदापि धनमैश्वर्यं च प्राप्तुं शक्नोति ।

द्रौपदी पुरुषार्थं प्राधान्येन अङ्गीकृत्य पुरुषार्थं सम्पादयितुं युधिष्ठिरं प्रचोदयाति–

कुर्वतो नार्थसिद्धिर्मे भवतीति ह भारत ।

निर्वेदो नात्र कर्त्तव्यो द्वावन्यौ ह्यत्र कारणम् ।।[१०] इति ।।

हे भारत! पुरुषार्थे कृतेऽपि यदि सिद्धिः न प्राप्यते तत्र तद् विषये अधिकं विचिन्त्य खिन्नः न भवेत् । किमर्थमिति चेत् फलस्य सिद्धौ पुरुषार्थं विहाय अन्यत् कारणद्वयमपि भवति । प्रारब्धं, ईश्वरकृपा च ।

सिद्धिर्वाप्यथवासिद्धिरप्रवृत्तिरतोऽन्यथा ।

बहूनां समवाये हि भावानां कर्म सिद्ध्यति ।।[११] इति ।।

हे राजन् ! कार्यं सिद्धिर्भवति वा न इति संदेहेन यदि भवन्त: कार्ये प्रवृत्ता: एव न भवन्ति तर्हि एतत् न समीचिनम् । किमर्थमितिचेत् बहूनां कारणानां समवाये एव कर्मषु सफलता प्राप्यते ।

स्वदोषात् एव अनर्थस्यागमनम्, स च दोष: कुटिलेषु अकौटिल्यमिति द्रौपदी युधिष्ठिरं राजधर्म शिक्षयति-

व्रजन्ति ते मूढधिय: पराभवं भवन्ति मायाविषु ये न मायिन: ।

प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान्निशिता इवेषव: ।।[१२] इति ।।

ये मूढवुद्धय: कुटिलेषु अकौटिल्यमाचरन्ति ते पराजयं प्राप्नुवन्ति । कथमिति चेत् स: कुटिल: तं निष्कपटं व्यक्तिविशेषं तस्य समीपं गत्वा इत्थं नाशयति यथा कवचरहितं अङ्गं निशिता: इषव: प्रविश्य घ्नन्ति । नन्वन्त: शत्रुत्वादयं क्रोधस्त्याज्य एवेत्याशङ्क्याह–

अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्या: स्वयमेव देहिन: ।

अमर्षशून्येन जनस्य जन्तुना , न जातहार्देन न विद्विषादर: ।।[१३] इति ।।

य: पुरुष: विनाशकारी अमोघक्रोधयुक्त: भवति तथा दानेन इष्टजनस्य आपत्तिं दूरीकर्तुं समर्थ: भवति तादृशपुरुषस्य अधिने शत्रु: मित्रं च तिष्ठति किन्तु य: पुरुष: क्रोधरहित: भवति तत्र शत्रव: भीता: न भवन्ति । एवं य: न किमपि ददाति तादृशं मित्रं न कोऽपि आदरेण पश्यति । अथ समयोल्लङ्घनाद्बिभेषि तदपि न किञ्चिदित्याह–

न समयपरिरक्षणं क्षमं ते निकृतिपरेषु परेषु भूरिधाम्न: ।

अरिषु हि विजयार्थिन: क्षितीशा: विदधति सोपधि सन्धिदूषणानि ।।[१४] इति।।

यदा शत्रु: निरन्तररूपेण अपकारे तत्पर: भवति तदा भवता वनवासकालप्रतीक्षा न समुचिता विजयार्थिन: राजान: अरिषु सोपधि सन्धिदूषणानि विदधति इति हेतो: ।

इत्थम् उपरोक्तविवेचनाषु सिद्धं भवति यत् पाण्डववधू द्रौपदी एका सुदक्षा राजनीतिज्ञा महाभारतकाले आसीदिति ।

---

**सन्दर्भा:**

१. ऋग्वेद: ३/५३/४

२. ऋग्वेद: १०/८५/४६
३. मनुस्मृतिः ३/५६
४. महाभारत/ वनपर्व / अर्जुनाभिगमपर्व/ २७/ ३७
५. म.भा/ व.प/ अ.अ.प./ २७/ ३८
६.म.भा/व.प/अ.अ.प/ २७/ ३९
७. म.भा/ व.प/ अ.अ.प/ २७/४०
८. म.भा/ व.प/ अ.अ.प/ २८/ ३६
९. म.भा/व.प/अ.अ.प/ ३०/ २-३
१०.म.भा./अ.अ.प/ ३२/५०
११. म.भा/ व.प/अ.अ.प / ३२/५१
१२. कि.अ/ १/ ३०
१३. कि.अ / १/ ३४
१४. कि.अ / १/४५

—०—

*सहायकाचार्यः, साहित्यविभागः,*
*श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,*
*श्रीविहारः, पुरी, ओडिशा ।*

# किरातार्जुनीयदिशा शिवतत्त्वविमर्शः

**अशोकमण्डलः**

**विद्यावारिधि–शोधच्छात्रः, केन्द्रीयसंस्कृतविश्वविद्यालयः**

दृश्यमानमिदं जडचेतनात्मकम् अत्यद्भुतम् अचिन्त्यं विश्वब्रह्माण्डं ब्रह्ममूलमिति वेदवेदान्तपुराणादिषु समुपगीयते। तन्निर्गुणं निर्विकारं सच्चिदानन्दं ब्रह्म सिसृक्षया सगुणसाकाररूपं धत्ते। तमेव सगुणसाकारब्रह्मपरमात्मानं वैष्णवाः विष्णुः, शाक्ताः शक्तिः, शैवाश्च शिव इति स्वीकुर्वन्ति। शैवमतानुसारं परमेश्वरः शिव आद्यः सर्वेश्वरो राजराजो निर्मलः शुद्धसत्त्वस्वरूपश्च विराजते। यदा यदा आवश्यकता आयाति, तदा तदा विविधरूपेण भूमावाविर्भवति परमेश्वरः। कदाचिच्च सृष्टिरक्षार्थं स वृषेश्वरशरभादिकमलौकिकं रूपं धत्ते, यादृशः रूपस्य कल्पनामपि □कर्तुं लोके कोऽपि न समर्थः, तादृशं रूपं गृहीत्वा परमेश्वरः शिवो भूतले अवतरति। भगवतः तादृशः अवताराः दुष्टानां दलनाय सतां परिपालनाय समग्रसंसारस्य कल्याणाय चोदिष्टा भवन्ति। अस्य शिवस्य महत्त्वं न तु वेदादिशास्त्रेष्वपि तु काव्यसाहित्यादिषु च बाहुल्येन निरूपितं वर्तते। तत्र कालिदासोत्तरकविषु महाकविना भारविना किरातार्जुनीयमिति वीररसात्मके महाकाव्ये शिवतत्त्वं समुपस्थापितम्। महाभारते वनपर्वणि तथा च शिवपुराणे समुल्लिखितमर्जुनस्य किरातवेशिनो भगवतः शिवतः पाशुपताऽस्त्रप्राप्तिवृत्तान्तमादाय महाकाव्यमिदमष्टादशसर्गैः संगृहीतं वरीवर्ति। परमेश्वरः शिवः परिपूर्णस्वरूपः, स च सृष्टिकर्ता संरक्षकः संहारकश्च। यद्यपि स महाकोपी तथापि यत्नेन प्रसादितः। स भक्तस्य कृते किं न कुर्यात्? अस्यैव महाकाव्यस्याष्टादशसर्गेऽर्जुनः शिवेन सह युद्धं कृतवान्। तस्मिन् युद्धे शिवः अर्जुनस्य पराक्रमेण सन्तुष्टः सन् स्वरूपं दर्शयित्वा तस्मै पाशुपताऽस्त्रं दत्तवान्। तत्र शिवस्य स्वरूपमालोक्य तत्स्तुतिप्रसङ्गे अर्जुनः तन्महत्त्वमेकविंशतिश्लोकैः(१८/२२ तः १८/४२) प्रतिपादितवान्। तेषु प्रथमस्तावत् शिवस्य महत्त्वं प्रतिपादयन् अर्जुनो ब्रवीति यत् – शिवः अतीवकारुणिको भक्तिगम्यश्च, तस्य शरणं प्राप्य जनाः मृत्युमपि जयन्ति। तादृशाः शिवशरणाप्ताः जितमृत्यवो जनाः जगतः आपत्काले रक्षकाः जायन्ते। यदुक्तं–

"शरणं भवन्तमतिकारुणिकं भव भक्तिगम्यमधिगम्य जनाः।
जितमृत्यवोऽजित! भवन्ति भये ससुरासुरस्य जगतः शरणम्।।"[१] इति।

तत्परमर्जुनो वक्ति यत्– यावत्कालं पुरुषः शिवं न नमस्करोति, तावत् तस्य नाशकर्त्री विपत् तमनुसरति। स निजेप्सितं वस्तु नाऽऽसादयति। एतेन ज्ञायते यत्– ये जनाः भक्तिपूर्वकं शिवेऽर्पितमनसो भवन्ति, ते स्वाभीष्टं प्रचुरमाप्नुवन्ति अपि च तेषां विपदपि नश्यति। एतदर्थं संसारदुःखमवलोक्य धनवन्तो दानशीलाः जनाः दानादिकार्यं कृत्वा भक्तिमार्गयायिनो भवन्ति। परन्तु केवलं प्रणतेभ्यः शिवो निःस्पृहः सन् यदाशीर्वादं करोति तत् महाश्चर्यकरमस्ति। यदुक्तं कविना–

"संसेवन्ते दानशीला विमुक्त्यै संपश्यन्तो जन्मदुःखं पुमांसः।

यन्निःसङ्गस्त्वं फलस्यानतेभ्यस्तत्कारुण्यं केवलं न स्वकार्यम्।।"[२] इति।

अतःपरमर्जुनः शिवस्य महत्त्वं प्रतिपादयन् कथयति– यत्तीर्थमिहलोके दूरमगत्वा प्राप्यते, यत्तीर्थम् अपरलोकगताय फलति, भवार्णवबाह्यं सार्वकामिकं तत्तीर्थं शिवेन विना न प्राप्यते। एवं यदि कश्चिद् भक्तः शिवस्यानुकूलदात्री दक्षिणामूर्तिं तत्त्वतः अज्ञत्वाऽपि केवलं भक्तिपूर्वकं तस्य स्मरणं करोति चेत्, तर्हि सः अवश्यं शिवाशिषा मुक्तिमवाप्नोति। यदुक्तं कविना–

"दक्षिणां प्रणतदक्षिणमूर्तिं तत्त्वतः शिवकरीमविदित्वा।

रागिणापि विहिता तव भक्त्या संस्मृतिर्भव भवत्यभवाय।।"[३] इति।

श्लोकेनाऽनेन भगवतः शिवस्य भक्तवात्सल्यत्वं द्योत्यते। पुनः अर्जुनः शिवस्य माहात्म्यं प्रस्फोटयन् कथयति यत्– व्यासादिमहर्षयो जनानां कृते विविधोपदेशान् प्रदाय तेषां कृत्याकृत्यप्रवृत्तिनिवृत्तिमार्गमुपदिशन्ति। उपदेशद्वारा सन्मार्गे चलन्तस्ते परमसुखमाप्नुवन्ति। परन्तु ते यदा शिवस्य शरणं व्रजन्ति तदा स शिवः किमपि नालोच्य तेषां दुरुत्तराणि कर्माणि नाशयति, येन ते संसारमुक्ता भवन्ति। अनेन ज्ञायते यत्– शिवोऽयं संसाररूपसागरस्य त्राणकर्ता। यदुक्तं–

"युक्ताः स्वशक्त्या मुनयः प्रजानां हितोपदेशैरूपकारवन्तः।

समुच्छिनत्सि त्वमचिन्त्यधामा कर्माण्युपेतस्य दुरुत्तराणि।।"[४] इति।

अतःपरमर्जुनः कथयति–

"सन्निबद्धमपहर्तुमहार्यं भूरि दुर्गतिभयं भुवनानाम्।

अद्भुताकृतिमिमामतिमायस्त्वं बिभर्षि करुणामय मायाम्।।"[५] इति।

अनेन श्लोकेन प्रतिपाद्यते यत् – करुणामयः शिवो मायामतिक्रम्य सर्वदा राजते। परन्तु यदा प्राणिनां भूरिदुर्गतिर्भवति तदा तद् दुर्गतिभयमपहर्तुं स स्वेच्छया कर्माधीनतां न गच्छन् मायां धारयति। शिवस्य अन्यदेकं विशिष्टं महत्त्वं प्रतिपादयता अर्जुनेन समुल्लिखितं यत् – शिवस्य चित्तं रागयुक्तं नास्ति, तथापि स महाविलासी। तस्य शरीरे पार्वती अर्धाङ्गिनीरूपेण

विराजते, परन्तु स कामी नास्ति। जगतः परमो वन्द्योनीयोऽपि स प्रतिदिनमुषसि विधातरं प्रणमति। अतः एतादृशः शिवस्य चेष्टितं दुर्बोध्यमस्ति। यदुक्तं–

"न रागि चेतः परमा विलासिता वधूः शरीरेऽस्ति न चास्ति मन्मथः।
नमस्क्रिया चोषसि धातुरित्यहो निसर्गदुर्बोधमिदं तवेहितम्।।"[६] इति।

अतःपरमर्जुनः शिवस्य वेशभूषाविषये कथयति– शिवस्य वस्त्रं भवति रोमावलियुक्तं मृगचर्म, देदीप्यमानमणियुक्तः सर्पोऽस्ति तस्य कटिसूत्रम्, तस्य मालाऽस्ति नरकपालवलिः, चिताभस्मेन स चन्दनकार्यं निर्वाहयति। एभिरसमानधर्मैः सह शिवः शिरसि शक्तिचन्द्रकलामपि धारयति। महाविचित्रमेतत्सर्वं केवलं शिव एव शोभते । इदमेव वैशिष्ट्यं धारयन् स्वमहत्त्वं स्वयमेव प्रकाशयति महादेवः। यदुक्तं कविना–

"तवोत्तरीयं करिचर्मसाङ्गजं ज्वलन्मणिः सारसनं महानहिः।
स्रगास्यपंक्तिः शवभस्म चन्दनं कला हिमांशोश्च समं चकासति।।"[७] इति।

तदनन्तरं स्थावरजङ्गमात्मकस्यास्य सर्वस्य मूलकारणरूपेण शिवस्य स्तुतिप्रसङ्गेऽर्जुनो वक्ति यत्–

"त्वमन्तकः स्थावरजङ्गमानां त्वया जगत्प्राणिति देव विश्वम्।
त्वं योगिनां हेतुफले रुणत्सि त्वं कारणं कारणकारणानाम्।।"[८] इति।

अर्थात् जगतो नाशकर्ताऽस्ति स्वयं शिवः। समग्रं जगदपि तदबलेन जीवति। स हि योगिनां कर्मफलध्वंसकर्ता। स हि विश्वस्य कारणत्वेन विद्यमानानां पञ्चमहाभूतानां तेषां कारणत्वेन विद्यमानानां पञ्चतन्मात्राणामपि कारणमस्ति। विषयेऽस्मिन् श्रुतिवचनं विद्यते– "यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत् प्रयन्त्यभिसंविशन्ति।"[९] अतःपरं भगवतः शिवस्याऽष्टमूर्तिषु वायुरूपमूर्तेः स्तुतिप्रसङ्गेऽर्जुनेन प्रतिपादितम्–

"तरसा भुवनानि यो बिभर्ति ध्वनति ब्रह्म यतः परं पवित्रम्।
परितो दुरितानि यः पुनीते शिवे तस्मै पवनात्मने नमस्ते।।"[१०] इति।

अर्थात् यः समस्तभुवनानि बिभर्ति, येन शब्दब्रह्म ध्वनिरूपमासाद्य जगति प्रसरति, यः परितो दुरितानि क्षालयति, तद् हे वायुरूपिन् देवदेव शिव! तुभ्यं नमोऽस्तु। तत्र अभिज्ञानशाकुन्तले वायुमूर्तिरूपस्य शिवस्योल्लेखो संप्राप्यते, यथा–"यया प्राणिनः प्राणवन्तः"[११] इति। एवंरूपेण शिवस्य गहनतत्त्ववर्णनप्रसङ्गे अग्निमूर्तिरूपस्य वर्णनं विहितमर्जुनेन–

"भवतः स्मरतां सदासने जयिनि ब्रह्ममये निषेदुषाम्।
दहते भवबीजसन्ततिं शिखिनेऽनेकशिखाय ते नमः।।"[१२] इति।

अर्थात् ब्रह्मप्राप्तये सर्वदा साधनारतानां शिवस्य स्मरणं कुर्वतां योगिनां संसारकारणभूतकर्मसमूहं स शिव एव दहति। अतः अग्निमूर्तये तस्मै शिवाय नमः।

अभिज्ञानशाकुन्तलेऽपि अग्निमूर्तिरूपस्य शिवस्योल्लेखो वर्तते, यथा– "वहति विधिहुतं या[१३] इति। अत:परमर्जुनो जलमूर्तिरूपं शिवं प्रस्तौति–

"आबाधामरणभयर्चिषा चिराय प्लुष्टेभ्यो भव महता भवानलेन।
निर्वाणं समुपगमेन यच्छते ते बीजानां प्रभव नमोऽस्तु जीवनाय।।"[१४] इति।

अर्थात् जलमूर्तिरूप: शिवो बीजानां कारणभूतो वर्तते। आध्यात्मिकादित्रिविध-दु:ख-मरण-भयार्चिषा महता संसाराग्निना चिरं दग्धेभ्यो मनुष्येभ्य: स्वकीयया संसेवया सन्तापशान्तिं प्रयच्छति अपि च जीवनदानं करोति स:। अत: एतादृशे जलमूर्तिरूपिणे शिवाय नम:। अस्या: मूर्ते: वर्णनं शाकुन्तले समुपलभ्यते, यथा– "या सृष्टि: स्रष्टुराद्या[१५] इति। एवंक्रमेण नभोमूर्तिरूपं शिवं प्रस्तौति अर्जुन: –

"य: सर्वेषामावरीता वरीयान् सर्वैर्भावैर्नावृतोऽनादिनिष्ठ:।
मार्गातीतायेन्द्रियाणां नमस्तेऽविज्ञेयाय व्योमरूपाय तस्मै।।"[१६] इति।

अर्थात् विभुसदृशो य: सर्वेषामाच्छादयिता, परन्तु सर्वै: भावै: न आवृत:। अनादिनिष्ठ: इन्द्रियाणां मार्गातीताय अविज्ञेयाय तस्मै व्योमरूपाय शिवाय नम:। प्रसङ्गेऽस्मिन् कविताकामिनीविलासेन कविकालिदासेन उक्तं यत्– "श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्"[१७] इति। अत:परमर्जुनो वर्णयति यत्– शिव: सूक्ष्मादपि सूक्ष्मतर: सन् सम्पूर्णविश्वं धारयति। स: अन्तर्यामी इत्यनेन कारणेन स: अन्तिकस्थ:। पुनश्च स इन्द्रियेभ्यो दुर्विगाह्य:, अत: स दूरतर:। तत्र ईशोपनिषदि श्रूयते यत्–

"तदेजति तन्नैजति तद्दूरे तद्वन्तिके।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यत:।।"[१८] इति।

शिव: अवाङ्मनसोगोचरोऽस्ति। यदुक्तं शिवपुराणे–

"यतो वाचो निवर्तन्ते अप्राप्य मनसा सह।
तदेव परमं प्रोक्तं ब्रह्मैव शिवसंज्ञकम्।।"[१९] इति।

अन्ततो गत्वा अर्जुन: कथयति यत् – शिव: सर्वविद्यानामीशो, यथा– "ईशान: सर्वविद्यानाम् इति श्रुति:, "ज्ञानमिच्छेद् महेश्वरात् इति सुभाषितम्। अज्ञानस्य दुश्चरितं तितिक्षितुं स शिव: समर्थ:। अपि तु स एव अज्ञानाद् वैरमुत्पाद्य पश्चात् शरणागतानां दुरात्मनां गति:। यदुक्तमर्जुनेन–

"असंविदानस्य ममेश संविदा तितिक्षितुं दुश्चरितं त्वमर्हसि।
विरोध्य मोहात्पुनरभ्युपेयुषां गतिर्भवानेव दुरात्मनामपि।।"[२०] इति।

कल्याणभाव: शिव:। स्थावरजङ्गमेषु सत्त्वमूर्तिरूप: शिव: अनादि:। तस्य परमात्मनो विधानेन विद्यमाना: जडचेतना: नूनं शिवभागिन:। एवंप्रकारेण महाकविना

भारविना सरल-सरसभाव-प्रसूनैः सुपष्टार्थबोधकैर्वाक्यैः समासतः किरातार्जुनीयमित्याख्ये महाकाव्ये शिवस्य तत्त्वं समुपस्थापितम्।

---

**सन्दर्भाः सहायकग्रन्थाश्च—**

१. किरातार्जुनीयम् १८/२२; चौखम्बा कृष्णदास अकादमी, वाराणसी।
२. तदेव १८/२४
३. तदेव १८/२७
४. तदेव १८/२९
५. तदेव १८/३०
६. तदेव १८/३१
७. तदेव १८/३२
८. तदेव १८/३५
९. तैत्तिरीयोपनिषद् ३/१/१; उद्बोधन कार्यालयः, कोलकाता।
१०. किरातार्जुनीयम् १८/३७
११. अभिज्ञानशाकुन्तलम् १/१; चौखम्बा सुरभारती प्रकाशनम्, वाराणसी।
१२. किरातार्जुनीयम् १८/३८
१३. अभिज्ञानशाकुन्तलम् १/१.
१४. किरातार्जुनीयम् १८/३९
१५. अभिज्ञानशाकुन्तलम् १/१.
१६. किरातार्जुनीयम् १८/४०
१७. अभिज्ञानशाकुन्तलम् १/१.
१८. ईशोपनिषद् मन्त्रसंख्या ५ ; उद्बोधन कार्यालयः, कोलकाता।
१९. शिवपुराणम् ४/४२/२४; नाग पब्लिसार्स,दिल्ली।
२०. किरातार्जुनीयम् १८/४२

—०—

*विद्यावारिधि (Ph.D.) शोधच्छात्रः, ३केन्द्रीयसंस्कृतविश्वविद्यालयः,*
*श्रीसदाशिवपरिसरः, पुरी, ओडिशा।*
*मार्गदर्शिका-*

# तालपत्रग्रन्थानां सम्पादनं लिपिदर्शनञ्च

**डॉ. बी.उमामहेश्वरी**

आसृष्टेरद्यावधिज्ञानविज्ञानसंरक्षणं ग्रन्थरूपेणैव सम्भवति । मौखिक-ग्राम्यभाषा ग्रन्थरूपेण परिणमितुं महान् कालो अपेक्ष्यते । मध्येऽपि बहवश्च विघ्ना: आयान्ति । विघ्नै: पुन: पुनरवरुध्यमानमपि अस्मदार्षविज्ञानमादौ ग्रन्थरूपमासीत् । परं कर्णाकर्णिकपरम्परयैव प्रचलितमासीत् । तस्यैव श्रुतिपरम्परा इति प्रसिद्धनामान्तरम् । श्रुतिपरम्परा दीर्घकालं यावत् प्रचलिता । लिखने आग्रहाभावात्, चौर्यभयात्, पाठकेषु लिखितपाठक:, अधम: इति धारणाहेतो: लिपिबद्ध-ग्रन्थ: न सञ्जात: । ऋषय: एवं विचारितवन्त: यत् 'व्यक्तिनाशे ज्ञानं नष्टं स्यात्' 'ज्ञानस्यादानप्रदानं विस्तृतज्ञानञ्च न स्यात्' 'बुद्धिनाशे सति ज्ञानं नष्टं स्यादि'त्येतादृशदोषा: कथं न भवेयुरिति । एतद् विचिन्त्य ग्रथनाय प्राधान्यं दत्तमुत्तरोत्तर ऋषिभि: । तदनु ऋषिगणा: आर्षोदितमन्त्रानेव अनुवादरूपेण आपस्तम्बसूत्रग्रथनं ग्रन्थरूपेण प्रप्रथममाविष्कृतवन्त: । इममेव पन्थानं स्मृतिकारा: आत्मसात्कृता: । यथा- मन्वादि ऋषय: धर्मविज्ञानम्, भारद्वाज, आर्यभट्टादय: विशालविज्ञाननिधिं, पराशरादिऋषय: खगोलविज्ञानम्, कौटिल्यादय: नीतिविज्ञानं, चरकादय: आयुर्विज्ञानं, षड्दर्शनाचार्या: षड्दर्शनविज्ञानञ्च ग्रन्थरूपेण प्रदत्तवन्त: ।

**लिपिपरिचय: –**

अव्यक्तभावानां व्यक्तीकरणाय लिपेराश्रयो भवति । ता: लिपय: भिन्नभिन्नदेशेषु भिन्नभिन्नरूपरेखै: विभूषिता: चिह्निता: । तथापि सा लिखनपद्धति: मुख्यतया त्रिधा विभक्ता वर्तते । ता: १. शून्यात्मिका, २. बिन्द्वात्मिका, ३. रेखात्मिका चेति । एतासु त्रिष्वेव लिपिषु सर्वा: संस्कृत-प्राकृत-पालीत्यादिलिपय: अन्तर्भूता: भवन्ति ।

**१. शून्यात्मिकालिपि: —** शून्यप्रधानात्मिका लिपिरियं लिपि: । इयं लिपि: दक्षिणभारते तथा दक्षिणाफ्रिकादेशादिषु दरीदृश्यते । यथा- मलयालम्, कन्नडा, तेलुगु, तमिलमित्यादय: ।

**२. बिन्द्वात्मिकालिपि:—** बिन्दुप्रधानात्मिकेयं लिपि: । लिपिरेषा भारतस्य पश्चिमदेशेषु उपयुज्यते । यथा- उर्दू, अरबी, पार्सी, सिन्धी इत्यादय:।

**३. रेखेत्मिकालिपि:—** रेखप्रधानात्मिकेयं लिपि: । भारतस्य उत्तरदेशेषु तथा पृष्ठदेशेषु च उपयुज्यते । यथा- चीनी, जापानी, आङ्ग्लम् इत्यादय: ।

परन्तु देवनागरीलिप्यां शून्यात्मिका, बिन्द्वात्मिका तथा रेखात्मिका चेति तिस्र: अपि लिपय: उपयुज्यन्ते ।

**लिपिलेखनाय पत्राणि–** तिसृणामपि लिपीनां लेखनाय भिन्नभिन्न-पत्राण्युपयुज्यन्ते स्म । ते यथा- भोजपत्राणि, तालपत्राणि, ताम्रपत्राणि, रजतपत्राणि, तन्तुपटलानि, शिलापट्टं, सुवर्णपत्रेत्यादीनि । भोजताल-पत्रादिषु पत्रेषु लिखितानि अक्षराणि चिरकालं यावत् रक्षिता: भवन्तीति कारणात्पूर्वं तेषामुपयोग: आसीत् । ताम्र-रजत-स्वर्णपत्रेषु लिखितानि अक्षराणि सहस्राधिकवर्षाणि विराजन्ते । अधिकधनव्ययकारणात् बाहुल्य-भावाच्च एतेषु देशकालराजादिमुख्यविषया: एव लिखन्ति स्म । तालपत्रेषु शून्यात्मिकैव लिपि: लेखितुं शक्यते । भोजपत्रताम्रपत्रादिषु शून्य-बिन्दु-रेखात्मिकेति तिस्र: अपि लिपय: लेखितुं शक्यन्ते । तथा अस्माकं देशे प्राचीनकाले काश्चन लिपय: प्रसिद्धा: आसन्, ता: यथा- ब्राह्मीलिपि:, शारदालिपि:, देवनागरीलिपि:, नन्दिनागरीलिपि:, ग्रन्थलिपि:, मैथिलीलिपि इत्यादय: बह्व्य: उपयुज्य पत्राणि लिखन्ति स्म ।

**सम्पादनम्–** सम्पादनं कथं करणीयं, कुतश्च करणीयमिति जिज्ञसायाम्, आर्षकाले लौकिकधनमिव ज्ञानधनमपि पिता पुत्राय ददाति स्म । पुत्रोऽपि स्वपुत्राय एवं पैतृकज्ञानसम्पदाधिकारी पुत्र एव आसीत् । कदाचित् प्रान्ते गुरु: स्वशिष्याय, शिष्योऽपि प्रशिष्याय ददाति स्म । एवं ज्ञानधारा पितृपुत्रपरम्परया गुरुशिष्यपरम्परया च प्रचलती आसीत् । तदा भरतखण्डे सर्वत्रापि ज्ञानविज्ञानसम्पत् पूर्णघट इव परिप्लुतो आसीत् । किन्तु एकस्यैकं प्रति सम्बन्धो नासीत् । परिपूर्णे सत्यपि असम्पूर्णेति अवभासते स्म । पूर्णविज्ञानं विज्ञातुं नैकेनापि सम्भवति स्म । एवं सति आर्षविज्ञानम् एकत्रीकर्तुं ज्ञातुं च प्रप्रथमं व्यासभगवान् विधातुमुद्युक्त: ।

''देशे देशे तथा ग्रन्थान् दृष्ट्वा चैव पृथग्विधान् ।
यथा स भगवान् व्यास: साक्षान्नारायण: प्रभु: ।।
जगाद भारताद्येषु तथा वक्ष्ये तदीक्षया ।।[१]'' इति ।

देशे-देशे, नगरे-नगरे, ग्रामे-ग्रामे, गृहे-गृहे, मठे-मठे विद्यमानाऽनेकार्षग्रन्थ-राशिम्, अधिकव्ययेन नयेन अनुनयेन विनयेन प्रीत्या स्नेहेन च श्रुतिविकीर्ण-विज्ञानं बृहत्प्रयत्नेन बहुलायासेन च वेदव्यासेन एकत्रीकृतम् । तत्र रक्षणमित्युक्ते–

''तैलाद्रक्षेज्जलाद्रक्षेत् रक्षेत् शिथिलबन्धनात् ।
मूर्खहस्ते न दातव्यमेवं वदति पुस्तकम् ।।[२] '' इति ।

तदारभ्य ऋग्वेदादेः कति शाखाः स्युः कुत्र स्युः, कति लुप्ताः, शाखाप्रशाखभिन्नत्वं, शाखासम्बन्धत्वं, तद्गतविषयविज्ञानं च विशद्रूपेणा-वगतमभवत्। सञ्चितश्रुतिसंरक्षणार्थम् अक्षराऽभ्रंशनार्थं पदवाक्यस्य अविच्छिन्नतयाऽवगमनार्थम् अनेकोपायाः अन्वेषिताः । यथा-

''जटा माला शिखा रेखा ध्वजो दण्डो रथो घनः ।
अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वं महर्षिभिः ।।[३] '' इति ।

कालान्तरेऽपि वेदव्यासशिष्यप्रशिष्याः अपि ग्रन्थसंरक्षणं च सम्यक्तया कृतवन्तः । तदा बहुलिपिकाः, बहुभाषज्ञाश्च आसुः । ते 'यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया' इति ते विद्वद्गणाः केवलं यद्वर्तते लेखनकार्यं कुर्वन्ति स्म ।

''भग्नपृष्टकटिग्रीवः स्तब्धदृष्टिरधोमुखः ।
कष्टेन लिखितं ग्रन्थं यत्नेन परिपालयेत् ।।[४] '' इति ।

तथा तक्षशिलाविश्वविद्यालयस्य कुलपतिः चाणक्योऽपि ग्रन्थसम्पादनं सञ्चयं संवर्धनं, संरक्षणञ्च व्यदधात् ।

प्राचीनाचार्यैः यदधीत्य विज्ञाय अनुभूय च यत् ज्ञानं प्राप्तं तज्ज्ञानमस्माकं रक्षणाय तथा देशरक्षणाय च भवेदिति तैः ते गम्भीरसार-भूतविषयाः तेषां मृत्योरनन्तरं नष्टाः मा भवेयुरिति धिया तैः परम्परया अधीतज्ञानं तालपत्र-भोजपत्रादिषु सरक्षितम् । यद्यप्यस्माकं देशे पूर्वं श्रौत-परम्परैवासीत् तथापि अनन्तरकाले सा परम्परा यदि न स्यादिति धिया आचार्यैः ज्ञानरक्षणार्थं लेखनपद्धतिः अनुसृता । तत्रापि कर्गदपत्रापेक्षया तालभोजताम्रादिपत्रेषु लेखने सति तेषां स्थितिः जीवनम् अधिकं स्यादित्यतः तेषु पत्रेषु एव लिखन्ति स्म । तेनास्माकं देशः ज्ञानेन विज्ञानेन च पूर्णकुम्भ इव दृश्यते स्म । गच्छता कालेन पाश्चात्यदेशीयाः अत्र आगत्य अस्माकं भूरिज्ञानधनं वीक्ष्य अस्मान् दुर्बलान् च अनुभूय ईर्ष्याभावेन विनाशयितु-मुद्युक्ताः । तेषां निर्गमनानन्तरं पुनः तेषां सम्पादनं संरक्षणं च अस्माकं कार्यमभवत् ।

**सम्पादनप्रयोजनानि—** तालपत्रसम्पादने अनेकानि प्रयोजनानि दरीदृश्यन्ते। मुख्यतया केचन दृष्टिगोचराणि भवन्ति, तानि यथा–

१. पाठान्तरभेदः, २. विषयं सम्पूर्णमसम्पूर्णञ्चेति ज्ञानम्,
३. विषयनिश्चयः , ४. प्रक्षिप्ताः,
५. ग्रन्थख्यातिः, ६. परिचयः ।

**१. पाठान्तरभेदाः —** एकस्मिन् विषये भिन्नभिन्नस्थानेषूपलब्ध-ग्रन्थेषु पदस्य वाक्यस्य च असमानार्थीय-अक्षराणां पदानाञ्च भेदः पाठान्तरभेद इत्युच्यते ।

**२. विषयसम्पूर्णासम्पूर्णज्ञानम्–** कविप्रारम्भितग्रन्थविषयः सम्पादितः न वेति ग्रन्थान्ते दृष्ट्वैव ज्ञायते । यदि अन्ते सम्पूर्णः विषयः आगतः तर्हि अयं ग्रन्थः सम्पूर्णः । यदि अन्तः न दृष्टः तर्हि स ग्रन्थः असम्पूर्ण इति ज्ञायते । यथा लक्षश्लोकात्मकं महाभारतमिति प्रसिद्धम् । किन्तु गणने न लक्षश्लोकात्मकं दृश्यते । तेनाऽयं ग्रन्थः असम्पूर्णः इति ज्ञायते । तथा चतुर्विंशतिसहस्रश्लोकात्मकं रामायणमिति प्रसिद्धम् । तत्रापि गणने तावन्तः श्लोकाः न दृश्यन्ते ।

**३. विषयनिश्चयः–** ग्रन्थे एकस्मिन् विषये प्रतिपादितविरुद्धविषयः स्थानान्तरेषु उपलब्धतद्ग्रन्थेषु स एव विषयः यदि उल्लेखितः स्यात्तर्हि स एव तद्ग्रन्थस्य विषय इति निश्चयो भवति ।

**४. प्रक्षिप्तानां परिगणना–** ग्रन्थविषयमतिरिच्य विषयप्रतिपादनम्। एकस्य भिन्नशैलीमाधारीकृत्य तद्विषयान्तरभेदेन शैलीभेदेन स्थानान्तरेषु अलभ्यमानेन वा प्रक्षिप्ताः परिदृश्यन्ते । यथा- रामायणे जैमिनिमुनिना प्रबोधितनास्तिकजैनदर्शनस्योत्तरत्वाच्च तस्य प्रक्षिप्तत्वं सम्बध्यते ज्ञायते।

**५. ग्रन्थख्यातिः–** एक एव ग्रन्थः यदि बहुत्र लभ्यते तर्हि तस्य ख्यातिः सर्वत्र अधिको वर्तत इति ज्ञायते । यदि एकत्रैव लब्धस्तर्हि तस्य तादृशख्यातिर्नास्तीति ज्ञायते ।

**६. परिचयः–** ग्रन्थनामोल्लेखनं कविनामोल्लेखनञ्च अन्यत्र ग्रन्थे दृश्यते तर्हि तस्य ग्रन्थस्य पूर्ववर्तित्वं तथा तत्कालदेशराजादीनां च ज्ञानं जायते । यथा उदयनाचार्येण स्वग्रन्थेषु भासर्वज्ञमतं बहुत्र खण्डनमण्डनादिकं कृतम् । तेन उदयनाचार्यात् पूर्वकालीनोऽयं भासर्वज्ञ इति ज्ञायते । तेन तस्य कालनिर्धारणमपि ज्ञायते । अस्माकं भारतदेशे बहुत्र ग्रन्थालयेषु अनेके तालपत्रग्रन्थाः उपलभ्यन्ते । तेषां विवरणं संक्षेपेणाऽत्र यथा–

| Sl.No. | Name of the Institutions | Palce | No.of Manu. Deposited |
|---|---|---|---|
| 1. | Government Sanskrit Collee | Banaras | 90.000 |
| 2. | Oriental Research Institute | Mysore | 45.000 |
| 3. | L.D. Institute | Ahmedabad | 45.000 |
| 4. | Kerala University Manuscripts Library | Trivandrum | 40.000 |
| 5. | Abhay Jain Granthalaya | Bikaner | 30.000 |
| 6. | Oriental Institute | Baroda | 25.000 |

| | | | |
|---|---|---|---|
| 7. | Rajasthan Oriental Research Institute | Jodhpur | 20.000 |
| 8. | Adyar Library & Research Centre | Madras | 20.000 |
| 9. | Orissa Government Museum | Bhubaneswar | 20.000 |
| 10. | Bhandarkar Oriental Research Institute | Poona | 18.000 |

**उपसंहार: –**

एकस्मिन् शास्त्रे अनेकै: कर्तृभि: स्वबुद्ध्या युक्तगवेषणेन आविष्कृता: भिन्नविषया: विविधग्रन्थरूपेणाविर्भूता: । तेषां सर्वेषामपि ग्रन्थानां सम्पादनेन चर्वितचर्वणम् । उक्तविषयमाधारीकृत्य इतोऽपि सूक्ष्मतया उक्तं वा उक्तविषयेष्वेव दोषानुदर्शनं दर्शितं वा कस्मिन् साधर्म्यज्ञानं वर्तते कस्मिन् वैधर्म्यं वर्तते, स कीदृश: इत्याद्यनेकविषयाणां ज्ञानं ज्ञायते ।अत: संस्कृतज्ञै: हस्तलिखितग्रन्थानां सम्पादनम् अनिवार्यतया कर्तव्यमिति मे मति: ।

---

**सन्दर्भसहायकग्रन्थसूची–**


१. The wealth of Sanskrit Manuscripts in India and abroad, Prof. K.T. Pandurangi, Brindavan Printers and Publishers, Bangalore, 1997

२. शब्दकल्पद्रुम:, राजा राधाकान्तदेवबहादूर, चतुर्थखण्ड:, नागपब्लिशर्स, दिल्ली, २००२


—०—


*सङ्कायाध्यक्षा, दर्शनसङ्काय:,*
*श्रीसोमनाथसंसकृतयुनिवर्सिटी,*
*वेराबलम् (गुजरात)*

# कालिदाससाहित्ये विनोदः

डॉ. जितेन्द्रकुमारदाशः

कालिदासः कविरूपेण सर्वत्र प्रसिद्धः । श्रव्यकाव्यानां रचयितृत्वेन तस्य यथा प्रसिद्धिः सकलनाट्यकारत्वेनापि तस्य सर्वत्र परिचितिः । समुचितालङ्काराणां विन्यासे कालिदासः अद्वितीयः। मुख्यतः तदीया उपमा सुन्दरी, सरला, स्वाभाविकी, नवीना च भवति । तस्य उपमा वर्णनीयवस्तु-प्रकृति-भाव-भाषानुकूला । रसव्यञ्जनापि कवेः अप्रतिमा। सुकुमारभावनां व्यञ्जनायां कालिदासस्य स्थानमद्वितीयम् । कविः सकलरसवर्णनायां सिद्धः । प्रणयरूपायने कवेः सूक्ष्मदृष्टिः विस्मयकारिणी । तस्य करुणः मर्मदाही । रघुवंशे अजविलापः कुमारसम्भवे च रतिविलापः कवेः करुणसिद्धत्वं प्रमाणीकुरुतः । हास्यरसविन्यासे कालिदासस्य दक्षतापि प्रमाणसिद्धा । तस्य ग्रन्थेषु विनोदः कवेः प्रमुखं वैशिष्ट्यम् । यद्यपि जयदेवेन भासः कविताकामिनीहास इत्युक्तं किन्तु उक्तिरियं न युक्तिसिद्धा । कारणं भासस्य सर्वेषु नाटकेषु विनोदः न परिलक्ष्यते। कालिदासस्य ग्रन्थेषु तु उत्तमकोटिकः विनोदः उपलभ्यते । अतः 'कविताकामिनीहासः' कालिदासे यौक्तिकतामवहति । तत्र वाचि, वेषभूषायाम्, आङ्गिकाभिनयेषु असम्बद्धतायाम् अनपेक्षितायां, कुत्रिमतायां च यः हास्योत्पादकश्चमत्कारः जायते स एव विनोदः । उक्तकारणैः चित्तं चञ्चलं भवति । मनसः प्रफुल्लतायै एतदेकप्रमुखं साधनम् । अस्य च नामान्तरं परिहासः । अस्मिन् प्रसङ्गे वक्तुः श्रोतुश्च हृदये सरसता अपेक्षिता भवति । विनोदः त्रिविधः यथा- १. स्वभावनिष्ठः, २. प्रसङ्गनिष्ठः, ३. शब्दनिष्ठः । कालिदासस्य ग्रन्थेषु सर्वविधविनोदः उपलभ्यते । साधारणतया संस्कृतनाटकेषु हास्यरसाभि-व्यक्तये विदूषकस्य (हास्याभिनेतुः) योजना क्रियते । विदुषकः मुख्यनायकस्य मित्रं भवति। नायकस्य प्रेमप्रकरणे सः सहायतां करोति । विदूषकस्य लक्षणं निरूपयितुकामः विश्वनाथः कथयति-

''कुसुमवसन्ताद्यभिधः कर्मवपुर्वेषभाषाद्यैः ।
हास्यकरः कलहरतिविदूषकः स्यात् स्वकर्मज्ञः ।।इति।''[१]

सर्वथा कलहप्रियः विदूषकः नायकस्य नर्मसचिवः भवति । कवेः मालविकाग्निमित्रे गौतमः विक्रमोर्वशीये माणवकः अभिज्ञानशाकुन्तले माधव्यश्चेति विदूषकस्य नामानि । ते त्रयः जात्या ब्राह्मणा अपि तेषां स्वभावे वैषम्यं परिलक्ष्यते । तेषां कार्यं भवति राज्ञः मनोरञ्जनम्, तथा प्रेमव्यापारे सहायता प्रदानम् । साधारणतः विदूषकचरित्रमशिक्षितं भवति । अतः परिहासच्छलेन सः महाब्राह्मण इत्युच्यते । विदूषकरूपेण न दर्शनीयः ।

विक्रमोर्वशीये राजा किमपि न विचिन्त्य स्वपुत्रं प्रति कथयति- 'पुत्र ! अत्र तव पितुः मित्रं ब्राह्मणस्तिष्ठति मा विभीहि, तं प्रणम ।' विदूषकः कथयति- 'कथं स भेष्यति ? आश्रमवासे मत्सदृशैः वानरैः सह परिचयः स्यात् । कुमारः विहस्य कथयति- तात !

प्रणमामि । कवेः भाषायाम्–

''राजा – (कुमारं परिष्वज्य पादपीठे चोपविश्य)- वत्स ! इतस्तव पितुः प्रियसखं ब्राह्मणमशङ्कितो वन्दस्व ।

विदूषकः– किमिति शङ्किष्यते । नन्वाश्रमवासपरिचित एव शाखामृगः।

कुमारः– स्वस्ति भवते ।।इति।''[२]

अत्र विदूषकशरीरस्यासुन्दरत्ववर्णनात् विनोदः जायते । तथा तत्र माणवकः पाकशालायां प्रस्तुतं पञ्चविधं व्यञ्जनं दृष्ट्वा अत्यन्तं मोदते। तस्य प्रफुल्लता तत्र विनोदस्य हेतुः । मालविकाग्निमित्रे गौतमः स्त्रीणामन्तःपुरे दीयमानेन दानेन अत्यन्तं पृथुलः लक्ष्यते। अभिज्ञानशाकुन्तले माधव्यस्य अरण्ये अनियमितखाद्येन विरक्तिभावः वर्णितोऽस्ति । यतः साधारणतया विदूषकाः स्वादिष्टखाद्यरुचयो भवन्ति । सकलं वस्तु तेषां कृते खाद्यमिव प्रतिभाति । ते त्रयः विदूषकाः अत्यन्तं भीरुस्वभावा भवन्ति । मालविकाग्निमित्रे गौतमः केतकीपुष्पद्वारैव सर्पदंशाभिनये निपुणः लक्ष्यते । निद्रितावस्थायां सर्पस्येव वक्राकारवस्तुनः शरीरस्योपरि पतनेन भयभीतो भवति । अभिज्ञानशाकुन्तले माधव्यः राक्षसेभ्यः भयेन कातरः शकुन्तलादर्शनोत्सुकोऽपि तत् सः परिहरति ।

विदूषकस्य वचने ग्राम्योपमा चमत्कारमुत्पादयितुं समर्था । तत्र हरदत्त-गणदासयोः कलहे धारिणी भयभीता भवति । कदाचित् मालविकागच्छेदिति सा आशङ्कते । यदा सा कथयति- एतयोः विवादः ममानभिप्रेतः । तदा गौतमः कथयति- ''देवि ! एतयोः मेषयोः कलहं पश्य । कथमेताभ्यां वेदनं दीयते ।।इति।''[३] विक्रमोर्वशीये विदुषकः ग्राम्योपमां प्रदाय कथयति– ''छिन्नाहस्तो मत्स्ये पलायिते निर्विर्ण्णो धीवरो
भणति धर्मो मे भविष्यतीति ।।इति।''[४]

तथा दुष्यन्तं शकुन्तलासक्तं दृष्ट्वा विदुषकः कथयति- ''यथा कस्यापि पिण्डखर्जूरैरुदवेजितस्य तिन्तिडिकायाम अभिलाषः भवेत् । तथा अन्तःपुरस्त्रीरत्नभाविनो भवत इयमभ्यर्थना ।।इति।[५]

वस्तुतः विदूषकचरित्रे ईदृशोपमाप्रयोगः विनोदं जनयति ।

कालिदासनाटकेषु विदूषकः जडबुद्धिः भवति । अतः काव्यमयीम् उक्तिं बोद्धुं सः समर्थः । अभिज्ञानशाकुन्तले यदा दुष्यन्तः आम्रमञ्जरीं मदबाणमिति कथयति तदा विदूषकः उक्तेः भावमबुद्धः यष्टिप्रहारेण मदनबाणं नाशयितुं गच्छति । तद् दृष्ट्वा राजा विदूषकमुपहसति ।

''इति दण्डकाष्ठमुद्यम्य चूताङ्कुरं पातयितुमिच्छामि'' ।।इति।।[६]

कालिदासेन नायकानां मनोविनोदनार्थं विदूषकचरित्रमुपस्थापितं तथा नायिकानामपि विनोदकारिणी सखी उपस्थापिता । यथा मालविकाग्निमित्रे मालविकायाः समदुःखिनी सखी 'वकुलवालिका, विक्रमोर्वशीये उर्वश्याः चित्रलेखा तथा अभिज्ञानशाकुन्तले शकुन्तलायाः प्रियंवदा । तत्र शब्दप्रयोगद्वारैव मालविकाग्निमित्रे वकुलावलिका राज्ञा सह मालविकायाः प्रेमसम्बन्धमित्थं कथयति ।

''वकुलवलिका– एष उपारूढराग: उपभोगक्षम: पुरतस्ते वर्तते ।
मालविका– (सहर्षम्) किं भर्ता ?
वकुलवलिका– (सस्मितम्) न तावदभर्ता । एषोऽशोकशाखावलम्बी पल्लवगुच्छ: । अवतंसयैनम् ।।इति।''[७]

विक्रमोर्वशीये राजानं पुनरवलोकयितुम् उर्वशी लताविटपे आत्मानं लग्नां प्रदर्शयति । तथा मोचयितुं यदा चित्रलेखां कथयति तदा चित्रलेखा परिहासच्छलेन निगदति– इत: मोचनं कष्टकरम् । तथापि प्रयते।

उर्वशी– (उत्पतनभङ्गं रूपयित्वा)- अहो ! लताविटप एकावली वैजयन्तिका मे लग्ना । (सव्याजं परिवृत्य) (राजानं पश्यन्ती) चित्रलेखे ! मोचयतावदेनाम् ।
चित्रलेखा– (सस्मितम्) दृढं खलु लग्ना । दुर्मोचनीयेव मम प्रतिभाति । भवतु, भविष्ये तावत् ।।इति।''[८]

परन्तु प्रियंवदा अभिज्ञानशाकुन्तले अधिविनोदिनी । परिहासकरणे सा चतुरा । सा सततं शकुन्तलाया मनोविनोदाय प्रयतते । वसन्ते नववकुलिताम्रवृक्षस्य तथा नवकलिकापूर्णाया: वनज्योत्स्नाया: रमणीयसंयोगं यदा शकुन्तला निरीक्षमाणास्ति तदा प्रियंवदा अनसूयां कथयति-

''प्रियंवदा– अनसूये ! जानासि किं शकुन्तला वनज्योत्स्नामतिमात्रं पश्यति ?
अनसूया– न खलु विभावयामि ।
प्रियंवदा– वनज्योत्स्नाऽनुरूपेण पादपेन सङ्गता । अपि नामैवमहमप्यात्मनो-ऽनुरूपं वरं लभेयेति ।।इति ।''[९]

प्रियंवदाया: विनोदेन यद्यपि मोदते शकुन्तला तथापि सा मिथ्याक्रोधं प्रकाशयति।

कुमारसम्भवेऽपि विनोदस्याभाव न लक्ष्यते । पार्वत्या: विवाहकाले तस्या: पादौ लाक्षारसेन रञ्जयित्वा सखी कथयति– ''तव पद्भ्यां चन्द्रकालां ताड्य या तव पत्यु: शिरसि वर्तते।

पत्यु: शिरश्चन्दनकलामनेन स्पृशेति सख्या परिहासपूर्वम् ।
सा रञ्जयित्वा चरणौ कृताशीर्माल्येन तां निर्वचनं जघान ।।''इति।[१०]

सख्या: परिहासं श्रुत्वा पार्वती किमपि नोक्तवती प्रत्युत पुष्पमालया तां ताडयितुं प्रायतत ।

रघुवंशे सत्स्वपि अनेकेषु नृपेषु केवलमजे आसक्तामिन्दुमतीं तस्या: सखी सुनन्दा कथयति– ''गच्छ, अन्यं राजानं प्रति गच्छ'' । सख्या: वचनेन क्रुद्धा इन्दुमती तां पश्यन्ती कथयति–

''तथाग्रतायां परिहासपूर्वं सख्यां सखी वेत्रभृदावभाषे ।
आर्ये व्रजामोऽन्यत इत्यथैनां वधूरसूया कुटिलं ददर्श ।।इति।''[११]

किं च कालिदासकाव्येषु प्रसङ्गनिष्ठविनोदस्य बहूनि उदाहरणानि उपलभ्यन्ते। यदा व्यक्तिद्वयस्य मिलनं भवति यदि उभौ उभयो: यथार्थस्वरूपविषये अनभिज्ञौ तर्हि तस्मिन् प्रसङ्गे उभयो: वार्तालापे विनोद: जायते । कुमारसम्भवे अजिनदण्डधारिण: वटो: तथा तपश्चरन्त्या: पार्वत्या: च परस्परं संवादे विनोद: जायते । तथा रघुवंशे सिंहदिलीपसंवादे कवि: भावात्मकं विनोदं सृजति । तत्र एकस्या: गो: कृते दिलीपस्यात्मत्यागे सिंह: तं निर्बोधं मनुते । तत्र सिंह: कथयति-

''एकातपत्रं जगत: प्रभुत्वं नवं वय: कान्तमिदं वपुश्च ।
अल्पस्य हेतो बहुदातुमिच्छन् विचारमूढ: प्रतिभासि मे त्वम् ।।इति।''[१२]

किं च कुमारसम्भवे शिवपार्वतीसंवादे नग्नम् अकुलीनं शिवं पतिरूपेण अवाप्तुम् इच्छन्तीं पार्वतीं बुद्धिहीनां कथयति ब्रह्मचारी । कुमारसम्भवे शिवपार्वत्यो: संवादे यथा विनोद: लभ्यते न तथा विनोद: लभ्यते रघुवंशे सिंहदिलीपयो: संवादे , किं च तस्मिन् रघुवंशेऽपि कौत्सरघुसंवादे विनोदभाव: नास्ति । तत्र रघु: स्वकीयं सकलं धनं कौत्साय दातुमिच्छुकोऽपि कौत्स: तत्सर्वं नेतुमिच्छति । दक्षिणारूपेण गुरवे प्रदातुं यत्परिमाणं धनमावश्यकं तदेव नेतुमिच्छति । कवि: कथयति– ''जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्त्वौ।
गुरुप्रदेयाधिकनि:स्पृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च ।।इति।''[१२]

कालिदाससाहित्यस्य बहुस्थलेषु शब्दगतविनोद: अस्ति । यथा अभिज्ञानशाकुन्तले शकुन्तलां प्रति स्वप्रेमविषयं वदन्तं राजानं विदूषक: कथयति-

''कृतं त्वयोपवनं तपोवनमिति पश्यामि'' ।।इति।।[१३]

इत्थं विदूषकस्य सर्वा: उक्तय: विनोदात्मका भवन्ति । कवि: परिहासकरणे यथा दक्ष: उपहासकरणेऽपि कुशल: । अस्य प्रमाणानि कवे: सर्वेषु नाटकेषु लभ्यन्ते ।।

---

**सन्दर्भा:सहायकग्रन्थाश्च –**


| | | | |
|---|---|---|---|
| १. | साहित्यदर्पण:, ३/४२ | २. | विक्रमोर्वशीयम्, अङ्क-५ |
| ३. | मालविकाग्निमित्रम्, अङ्क-१ | ४. | विक्रमोर्वशीयम्, अङ्क-१ |
| ५. | अभिज्ञानशाकुन्तलम्, अङ्क-२ | ६. | तदेव अङ्क-६ |
| ७. | मालविकाग्निमित्रम्, अङ्क-३ | ८. | विक्रमोर्वशीयम्, अङ्क-१ |
| ९. | अभिज्ञानशाकुन्तलम्, अङ्क-१ | १०. | कुमारसम्भवम्, ९/१९ |
| ११. | रघुवंशम्, ६/८२ | १२. | तदेव ५/३१ |
| १३. | अभिज्ञानशाकुन्तलम्, अङ्क-२ | | |


—o—


*प्राध्यापक:, संस्कृतविभाग:*
*अभिमन्युसामन्तसिंहार उच्चमाध्यमिकविद्यालय:*

# उपनिषदां साररसरूपं गीतामृतम्

डॉ.दयानन्दपाणिग्राही

कूटशब्दा: - गीता, भगवद्गीता, उपनिषद्गीता, गीतामृतम्।

दु:खमयेऽस्मिन् संसारे मानवा: सर्वदा सुखप्राप्त्यर्थमुत्सुका: सन्त: कार्यं कुर्वन्ति। परन्तु ते सुख - आनन्दयो: भेदं न जानन्ति । ते न जानन्ति सुखं तु लौकिकं तथा च क्षणस्थायि भवति। परन्तु आनन्दस्तु अन्तर्निहितपरमशान्तिप्रदायको भवति। यद्यपि क्षणस्थायिमनुष्या: लौकिकसुखार्थमग्रेसरन्ति, तदनु कार्यमपि कुर्वन्ति, किन्तु सर्वदा दु:खानामेकान्तत: आत्यन्तिकविनिवृत्तये तथा निरतिशयसुखाय यतन्ते। दु:खमयसंसारान्निवृत्यर्थं सर्वदा चिन्तयन्त: कालं यापयन्ति। तदर्थं गुरुग्रहणं कृत्वा अलौकिक - आध्यात्मिकज्ञानप्राप्त्यर्थं धनं समयञ्च नियोजयन्ति। एतत्खलु शास्त्रज्ञानं विना न कदापि सम्भवति। अत: ईश्वरकृष्णेनोक्तं -

''दु:खत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ।
दृष्टे सापार्था चेन्नैकान्तात्यन्ततोऽभावात्।।'' [१] इति।

तदेव सर्वतन्त्रस्वतन्त्राचार्येण वाचस्पतिमिश्रेनोक्तं - ''एवं हि शास्त्रविषयो न जिज्ञास्येत, यदि दु:खं नाम जगति न स्यात्, सद्वा न जिहासितम्, जिहासितं वा अशक्यमुच्छेदम्।''[२] अत: दु:खापघतकहेतु: शास्त्रप्रतिपाद्यो नान्य:। तच्च शास्त्रं संसारवारिधौ धर्मदर्शनशास्त्रातिरिक्तं नान्यदस्ति। तत्रापि भगवदुपदिष्टस्य शास्त्रस्य सर्वप्रथमत्वात् साक्षात् भगवत: मुखारविन्दात्प्रकटितं गीताशास्त्रमेव भवति। उपनिषदां सारभूतं भगवन्मुखारविन्दनि:सृतं सर्वजनादृतं त्रिविधदु:खनिदानरूपं सर्वत्र सर्वकालेषु शोकसन्तप्तमानसानां सुखस्वरूपममृतरूपं भवति श्रीमद्भगवद्गीतामृतम्। शोकाग्निदग्धमानवानां शोकपरं पारं तारयितुं भगवता श्रीकृष्णेन शोकसन्तप्तायार्जुनाय धर्मक्षेत्रे कुरुक्षेत्रे उपदिष्टा गीता। वेदोपनिषदां निष्कर्षरूपमिदमुपदेशशास्त्रं समग्रमानवसभ्यताया: समुद्धरणाय अर्जुनं प्रतिनिधित्वेन संस्थाप्य भगवान् उपदिदेश।महर्षिव्यासदेवविरचितान्महाभारतग्रन्थात् भीष्मपर्वत: आगता श्रीमद्भगवद्गीता अन्यतमास्ति। तत्र नैकानि तत्त्वानि सम्मिलितानि सन्ति । तेषु तत्त्वेषु स्वयं श्रीकृष्णेनोक्तमात्मविषयकतत्त्वमन्यतमम्। आत्मतत्त्वविषयकं सम्पूर्णगूढरहस्यं तत्र सूक्ष्मातिसूक्ष्मभावेन आलोचितमस्ति।

भगवद्गीता वेदान्तसिद्धान्तानामेव तात्पर्यत: प्रतिपादिका लक्ष्यते। उपनिषद एव वेदान्त:।

उपनिषदामेव सारभूता खलु भगवद्गीता। यथा चोच्यते-

'' सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीताऽमृतं महत्।।'' ३ इति।

श्रीमधुसूदनसरस्वतिकृतव्याख्यायामादावेव गीतातात्पर्यप्रदर्शनाभिप्रायेण अष्टादशाध्येषु षट्कत्रयं प्रकल्प्य -

'' कर्मोपास्तिस्तथा ज्ञानमिति काण्डत्रयं क्रमात्।
तद्रूपाष्टादशाध्यायैर्गीता काण्डत्रयात्मिका।।'' ४ इति।

एवं त्रिषु अपि काण्डाभिधेयेषु षट्केषु क्रमेण कर्मनिष्ठा भक्तिनिष्ठा ज्ञाननिष्ठा चेति प्रथमं निष्कामकर्मणान्तःकरणशुद्धिस्ततश्च भगवद्भक्त्या उपासनास्वरूपया चित्तैकाग्र्ये सति विवेकवैराग्यादिसाधनसम्पत्तौ मुमुक्षुर्ब्रह्मविद्यायां प्रवृत्तो महावाक्यैर्ब्रह्मात्मतां सम्प्राप्य जीवन्मुक्तः कृतार्थः सम्पद्यते। पुनरन्यप्रकारेणापि श्रीमधुसूदनसरस्वती भगवद्गीतां वेदान्तसिद्धान्तप्रतिपादनपरां दर्शयन् तत्त्वमसीति महावाक्यार्थं विसकलने एव त्रयाणामपि षट्कानां तात्पर्यमिति स्पष्टतया घोषयति यथा-

''तत्र तु प्रथमकाण्डे कर्मत्यागेन वर्त्मना
त्वं पदार्थो विशुद्धात्मा सोपपत्तिर्निरूप्यते।।
द्वितीये च भगवद्भक्ति-निष्ठावर्णनवर्त्मना।
भगवान् परमानन्दस्तत्पदार्थोऽवधार्यते।।
तृतीये तु तयोरैक्यं वाक्यार्थो वर्ण्यते स्फुटम्।
एवमप्यत्र काण्डानां सम्बन्धोऽस्ति परस्परम्।।'' ५ इति।

द्वितीयाध्याये वेदान्तप्रतिपादितप्रकारेणैवात्मनो नित्यत्वं प्रतिपादयति गीता यथा-

'' न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे।। ''
'' वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही।।'' ६ इति।

आत्मा न कदापि उत्पद्यते । अर्थात् उत्पत्तिरूपी वस्तुविकारः आत्मनि न भवति । स च न म्रियते। अस्मिन् श्लोके उपयुक्तं 'वा' इति पदं 'च' इत्यार्थबोधकम्। 'न म्रियते च' इत्यनेन कथनेन विनाशरूपस्य अन्तिमविकारस्य प्रतिषेधः (निषेधः) कृतः । 'कदाचित' इत्यस्य शब्दस्य सम्बन्धः सर्वेषां विकाराणां प्रतिषेधेन सह अस्ति । यथा एषः आत्मा न कदापि जायते, तथैव न कदापि म्रियते इत्यादि अन्यविकारेषु अपि ज्ञातव्यम्। एषः आत्मा उत्पन्नः सन् अर्थात् उत्पत्तिरूपविकारस्य अनुभवं कृत्वा पुनः अभावं प्राप्नोति

इति नास्ति। अत: स: न म्रियते । यतो हि य: उत्पद्य पुन: न भवति, स: 'म्रियते' इति लोके प्रसिद्धि: । 'वा', 'न' इत्येतयो: पदयो: उपयोगेन अर्थोक्ति: भवति यत् आत्मा शरीरवद् उत्पद्य पुन: न भवति । अत: स: न जायते । यतो हि अभूत्वा पुन: भवति स एव 'जायते' इति उच्यते । आत्मा तथा नास्ति, अत: स: न जायते । एवम् आत्मा अज:, नित्यश्च । मनुष्य: यथा जीर्णानि वस्त्राणि त्यक्त्वा नवीनानि वस्त्राणि गृह्णाति, तथैव आत्मा पुरातनं जीर्णं शरीरं त्यक्त्वा अपरं नवीनं शरीरं धरते अर्थात् अपरे शरीरे निवासाय गच्छति इति । अत: आत्मा सर्वदा सर्वकालेषु तिष्ठति। एतेन आत्मनो नित्यत्वमेव प्रतिपाद्यते। ब्रह्माभिन्नत्वं च प्रत्यगत्मनो वेदान्तसिद्धान्तसम्मतं गीताया: त्रयोदशाध्याये प्रतिपाद्यते- '' उपद्रष्टाऽनुमन्ता च भर्त्ता भोक्ता महेश्वर:।

परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुष: पर:।।''[७] इति।

अभिन्ननिमित्तोपादानत्वं च यथा -''पितामहस्य जगतो माताधाता पितामह:।'' इति।

गतिर्भर्त्ता प्रभु: साक्षी निवास: शरणं सुहृत्।
प्रभव: प्रलय: स्थानं निधानं बीजमव्ययम्।।[८] इति।

भगवान् परमात्मा एव कर्मणां फलं पोषक: स्वामी शुभाशुभयो: द्रष्टा अन्तिमनिवासस्थानं रक्षक: हितकारी उत्पत्तिस्थानं प्रलयकर्ता आधार: लयस्थानं नाशरहितं बीजं च अस्ति। जन्मनो नाशस्य च कर्ता स्वयमेव परमात्मा, अत: निमित्तमपि उपादानञ्चापि स्वयमेव भवति। एतेन परमात्मन: अभिन्ननिमित्तोपादानत्वं च सिद्ध्यति। सर्वरूपत्वमनिर्वचनीयत्वं च स्थाने स्थाने श्रुत्यनुकूलस्मृतय: प्राप्यन्ते। स्मृतयस्त्विमा: -
'' वासुदेव: सर्वमिति'' '' अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन।'' ''न सन्नासदुच्यते।'' ''बहिरन्तश्च भूतानामचरं चरमेव च । सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके तत्।।''[९] इत्याद्या:। ज्ञानमाहात्म्यं चापि वेदान्तसम्मतं यथा- '' अहमात्मा गुडाकेश सर्वभूताशयस्थित:।''[१०]इत्येवं सर्वातिशयविज्ञानमाहात्म्यं गीतायामुपलभ्यते ततश्च नास्ति कश्चित् संशय:। ज्ञाननिष्ठाप्राधान्ये एव गीताया: तात्पर्यमित्यत्र। जीवन्मुक्तलक्षणं वेदान्तप्रतिपादितमिह गीतायां स्थानत्रये प्राप्यते।

द्वितीयाध्याये स्थितप्रज्ञस्वरूपनिरूपणप्रसङ्गे-

'' य: सर्वत्रानभिस्नेहस्ततत्प्राप्य शुभाशुभम्।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता।।''[११] इति।

अर्थात् य: सर्वत्र प्रियपदार्थेषु स्नेहरहित: अर्थाद्उदासीन: अस्ति, प्रियपदार्थानां संयोगवियोगरूपं शुभाशुभं प्राप्य हर्षद्वेषरहितोऽस्ति, सोऽपि स्थितप्रज्ञ एवास्ति । द्वादशाध्याये भक्तलक्षणेषु-

'' यस्मान्नोद्विजते लोको लोकान्नोद्विजते च य:।

हर्षामर्षभयोद्वेगैर्मुक्तो य: स च मे प्रिय:।।'' [१२] इति।

यस्मात्पुरुषाल्लोक: उद्वेगं न गच्छति, य: च पुरुष: लोकान्नोद्वेगं प्राप्नोति, यश्च सन्तोषासूयात्रासक्षोभै: रहित: स: पुरुष: मम प्रियो भवति। एतादृश पुरुष: मद्भक्तरूपेण लोके प्रसिद्धिं प्राप्नोति अनन्तो मामेव प्रपद्यते।

चतुर्दशाध्याये गुणातीतलक्षणे च-

'' समदु:खसुखस्वस्थ: समलोष्ठाश्मकाञ्चन:।
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुति:।।
मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयो:।
सर्वारम्भपरित्यागी गुणातीत: स उच्यते।।'' [१३] इति।

यद्यपि गीतायास्तात्पर्यनिरूपणे भिन्नं भिन्नं मतानि समुपलभ्यन्ते -निष्कामकर्मपरायणा लोकमान्यश्रीगङ्गाधरतिलक- प्रभृतय: निष्कामकर्मनिष्ठायामेव सर्वस्यापि गीतायास्तात्पर्यमुपवर्णयन्ति। ते च ज्ञानं भाक्तिं चापि निष्कामकर्मण्येवोपयुक्तां मन्यन्ते। अन्ये पुनर्भगवद्भक्तिपरायणा: वैष्णवा: भक्तिनिष्ठामेव गीताया: मुख्यं विषयमुपवर्णयन्ति। निष्कामकर्मज्ञानं च भक्तौ एव उपयुक्तं व्यवस्थापयन्ति। वेदान्तिनश्च ज्ञाननिष्ठामेव सर्वमुख्यं गीताया: विषयमाचक्षते। किन्तु गम्भीरतया पर्यालोचनेन ज्ञायते - भगवद्गीतायां प्रतिपादिता: तिस्रोऽपि निष्ठा: स्वस्वस्थाने महत्त्वं विभर्ति परन्तु अधिकारिभेदेन व्यवस्थिता: क्रमेणान्ते वेदान्तसिद्धान्तसम्मतब्रह्मात्मैक्यज्ञानरूपायां ज्ञाननिष्ठायामेव पर्यवस्यन्त्यो मानवस्य परमपुरुषार्थभूतं मोक्षं साधयन्ति। इदं खलु गीताया: वैशिष्ट्यं यत्सा कर्मणो दोषं बन्धनकारणं कामं कर्तृत्वाभिमानं च परिहारयन्ती कर्मफलं परमगुरावीश्वरे भक्तिसाहाय्येन परमपुरुषार्थमोक्षसाधने ब्रह्मज्ञाने उपयोजयति। एवं भक्तिसम्पुटितं कर्म ज्ञानप्राप्तौ परमोपकारी भवति। भक्तिश्च ईश्वराराधनरूपकर्मसम्पुटिता ज्ञानमुपकरोति। कर्मणि भक्तौ चापि ज्ञानस्य परमापेक्षेति ज्ञानसम्पुटितं कर्म ज्ञानसम्पुटिता च पराभक्ति: स्वयं ज्ञानरूपतां बिभर्ति, अत एव चतुर्विधेषु भक्तेषु ज्ञानभक्ति: परमात्मस्वरूपत्वेन परिगणित:-'' ज्ञानी त्वात्मैव मे मतम् इति।'' [१४] व्यावहारिकदशायां निष्कामकर्मरूपतां बिभ्रत सर्वं कर्म अन्त:करणशुद्धिं जनयेत् भक्तिसम्पुटितं सच्चैकाग्रतां जनयत् विवेकवैराग्यादिसाधनसम्पत्तियुक्तं सत् ब्रह्मज्ञाने परमोपकारितां भजते। अत एव गीता न सहसा कर्म त्याजयति किन्तु स्वसिद्धान्तानुसारं तद्दोषमपाकृत्य अन्ते स्वाभाविकरूपेण तत्त्यागं प्रदर्शयति। यथा -

'' आरुरुक्षोर्मुनेर्योगं कर्मकारणमुच्यते।
योगारूढस्य तस्यैव शम: कारणमुच्यते।'' [१५] इति।

गीतायां च भक्तेरव्यभिचारेण ब्रह्मरूपावाप्तौ पर्यवसानं स्पष्टतया उपलभ्यते -

'' मां च योऽव्यभिचारेण भक्तियोगेन सेवते।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते।।
भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्।।''[१६] इति।

किञ्च वेदान्तसिद्धान्तसम्मतं सर्वशरीरेषु एकात्मत्वम्, आत्मनः ईश्वराभिन्नत्वं गीतायां कियता सुन्दररूपेणास्ति प्रतिपादितम्-

'' सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।''
'' द्रक्ष्यस्यात्मन्यथो मयि''[१७] इत्यादि।

एवं भगवद्गीता तिस्रोऽपि निष्ठाः स्पष्टं प्रतिपादयन्ती सच्चिदानन्दब्रह्मप्राप्तये सरलातिसरलं मार्गं प्रदर्शयन्ती वेदान्तसिद्धान्तानेव सर्वतो भावेन समर्थयतीति।

---

**सन्दर्भाः**

१. सांख्यकारिका - १ । २. सांख्यतत्त्वकौमुदी - १।
३. भगवद्गीतामाहात्म्यम्।
४. मधुसूदनसरस्वतिकृतगीताभाष्यटीकायामादौ ।
५. तत्रैव. ६. भगवद्गीता २.२०,२३।
७. सा एव १३.२२ । ८. सा एव ९.१७,१८।
०९. सा एव ७.१९,९.१९,७.१९,१३.१५।
१०. गीता.१०.२०। ११. सा एव २.५७ ।
१२. सा एव १२.१५। १३. सा एव १४.२४-२५।
१४. सा एव ७.१८। १५. सा एव ६.३ ।
१६. सा एव १४.२६,१८.५५। २७. सा एव ६.२९, ४.३५ ।

**सहायकग्रन्थसूची -**


०१. श्रीशंकरानन्दः।(२०१०)। श्रीमद्भगवद्गीता गीतातात्पर्यबोधिन्याख्य-शङ्करानन्दीव्याख्यासहिता। पणशीकरः, श्रीवासुदेवलक्ष्मणः, सम्पा.। नव देहली: राष्ट्रियसंस्कृतसंस्थानम्(मानितविश्वविद्यालयः),जनकपुरी।
०२. ईश्वरकृष्णः। सांख्यकारिका,तत्त्वकौमुदीटीकोपेता, चौखम्बासुरभारती-प्रकाशनम्,दिल्ली।
०३. श्रीशङ्कराचार्यः।(२००९)।श्रीमद्भगवद्गीताशाङ्करभाष्यम्, आनन्दगिर्याद्यष्ट-टीकोपेतम्। शास्त्री, वासुदेवलक्ष्मणपणशीकर,सम्पा.। दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान।


—०—


**सहायकाचार्यः, अद्वैतवेदान्तविभागः,**
**कलियाचकविक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयः,**
**हेडिया,पूर्वमेदिनीपुरम्, पश्चिमवङ्गः**

# प्रत्ययस्वरूपं तद्भेदाश्च

मधुस्मिता पाढी

**प्रत्ययस्वरूपम्**

प्रतीयते विधीयते इति प्रत्ययः । "प्रति" उपसर्गात् "इण्" धातोः भावकरणयोः अर्थे नन्दि–ग्राहि–पचादिभ्यो ल्यु णिन्यचः (३.१.१३४) इति सूत्रेण अच् प्रत्यये अनुबन्धलोपे वर्णसंयोगे "प्रत्ययः" इति पदं निष्पद्यते । सः प्रत्ययः प्रकृतिसम्बन्धिभूतात् कदाचित् धातु मुलात् कदाचित् प्रादिपदिकात् मुलात् च विधीयते। अखण्डैः वाक्यस्फोटैः स्फुटति अभिव्यक्तिः अर्थः अस्मात् इति स्फोटः । अर्थात् स्फुट् इति धातोः करणे घञ् प्रत्यये स्फोटः इति पदं निष्पद्यते । येन स्फुटति प्रकाशति अर्थ अनेन इति स्फोटः । यद्येव सर्वेषां पदानां वाचकत्वेन स्वीक्रियते इथमेव सर्वेषां पद निफतौ प्रकृतिप्रत्ययोः गुरुत्वपूर्णं महत्वं वर्त्तते । स्फोटः वाच्यः –वर्ण–ध्वनि–वाक्यानि वाचकत्वेन स्व भूमिकां आवहन्ति । तदुक्तं भर्त्तृहरिणा–

[१] पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च ।
वाक्यात्पदानामत्यन्तं प्रवविवेको न कश्चन ।।

अत्र वर्णादयः वाचकाः परिकल्पिताः स्फोटस्तु ध्वनि व्यङ्ग्याः वाच्याः वा सन्ति । संस्कृतवाङ्मये स्थितानां सर्वेषां शब्दानां विभागः सुप्तिङन्तं पदम् (१.४.१४) [२]इत्यानुसारं सुवन्तत्वे तिङन्तत्वे हि पदानि वाक्ये व्यवहर्त्तुं समर्थानि स्युः । तस्मात् कारणात् महाभाष्यकारेण उदात्तकण्ठेनोक्तं न केवला प्रकृतिः प्रयुक्तव्या न केवल प्रत्ययः ।

प्रकृतिप्रत्ययोः निष्पतिप्रकारकं विश्लेषणेन यद्यपि पाणिनिः स्फोटवादी आसीत्, तथापि जीवपरमात्मनोः सम्बन्धः प्रकृतिप्रत्ययोः सम्बन्धः इव वर्त्तते । प्रकृतिं विना प्रत्ययस्य स्थितिः प्रत्ययं विना प्रकृतेः स्थितिः वाक्येषु निरर्थकत्वं भजते । अतः संस्कृतवाङ्मये अद्वैतदर्शनं भवतु द्वैतदर्शनं भवतु सांख्यदर्शनं वा भवतु विश्लेषणेन सर्वेषां विजः अष्टाध्यायां वर्त्तते । प्रत्ययः प्रत्यायकत्वेन प्रकृतेः तत्त्वं निष्पादयति । अतः संस्कृतवाङ्मये प्रत्ययस्य महत्त्वम् अतिवगुरुत्त्वपूर्णमस्ति।

कत्वखत्वादिभाव यद्यपि स्फोटे अवभाषते तथापि उदात्तादि विरूध धर्मस्य सम्बन्धात् स्फोटस्य एकत्वं न विहन्यते । तदुक्तं हरिणा –[३]

यदेकं प्रक्रियाभेदैर्बुहुधा प्रविभज्यते ।
तद्व्याकरणमागम्य परं ब्रह्माधिगम्यते ।।

**प्रत्ययभेदाः**

प्रत्ययभेदविचारप्रसङ्गे नैयादिकमूर्धन्य जगदीशतर्कालंकारिकः

शब्दशक्तिप्रकाशिकायां प्रत्ययविभागं वक्ति यथा –

[४] यादृशार्थे प्रकृत्यन्यो निपातान्यश्च वृत्तिमान् ।
स तादृशार्थे शब्दः स्यात् प्रत्ययोऽसौ चतुर्विधः ।।

अर्थात् प्रकृतेः भिन्नः निपातात् अन्यः अर्थोवबोधकः शाब्दिकं तत्वं प्रत्ययस्वरूपमस्ति। यस्य भेदस्तु सुप्–तिङ्–कृत्–तद्धित चेति भावेन क्रियते । सुप् इति प्रत्याहारे एकविंशति प्रत्ययाः, तिङ् इति प्रत्याहारे अष्टादश प्रत्ययाः, तद्धितप्रकरणे २९१ इति प्रत्ययाः संकलिता । अपिच उच्यते –

[५] इतरार्थानवच्छिन्ने स्वार्थे यो बोधनाक्षमः ।
तिङर्थस्य निभाद्यन्यः स वा प्रत्य उच्यते ।।

अर्थात्, यो शब्दविशेषः इतराणां शब्दानां अर्थस्य अविशेषितत्वेन स्वार्थं बोधयति सः प्रत्ययः । यदि तिङ्भि सम्बन्धस्थापित न स्यात् ते निरर्थकत्वं अयोग्यत्वं वा भजन्ते । अपिच जगदिशतर्कालंकारेण प्रत्ययस्य पञ्चभेदत्वं स्वीकुर्वन्ति । यथा–

[६] विभक्तिश्चैव धात्वंशस्तद्धितः कृदितिक्रमात् ।
चतुर्धा प्रत्ययः प्रोक्तः टाबादिभिः पञ्चधाऽथवा ।।

**विभक्तिप्रत्ययाः**

विभक्ति पदेन च इह तन्त्रे सुपः तिङः प्रत्ययाः गृह्यन्ते । "विभक्ति श्च" [७] इत्यनेन तेषां विभक्ति संज्ञा विधीयते ।

**धात्वंश प्रत्ययाः**

धात्वंशकथनेन धातुभ्यः ये प्रत्ययाः विधीयन्ते ते धात्वंशप्रत्ययाः कथ्यन्ते। एकप्रकृतिभ्यः विहिताः भवन्ति । सुबन्तात् ये प्रत्ययाः विधीयन्ते ते तद्धितप्रत्ययाः सन्ति येषां संख्या आदौ प्रोक्ता ।

**स्त्रीप्रत्ययाः**

स्त्रीप्रत्ययाः न धात्वंशभूताः न च प्रातिपदिकभूताः अपिच सुप्विभक्ति युक्तेभ्यः स्थित्व विवक्षायां टाबादयः जायन्ते । एतेषां संख्या निम्नोक्तदिशा उच्यते। यथा – १. टाप्, २. डाप्, ३. चाप्, ४. ङीप्, ५. ङीषक, ६. ङीन्, ७.ऊङ्, ८.ति चेति अष्टप्रत्ययाः स्त्रीप्रत्ययत्वेन आकलिताः सन्ति । धात्वंशप्रत्ययत्वेन कृत्–तिङ् भिन्न ये द्वादशप्रत्ययाः सन्ति ते यथा–

[८] शन्क्यच्काम्यचकक्यषोऽथाचारक्विब्णिज्यङौ तथा ।
यगादि–ईयङ् णिङ् चेति द्वादशामी सनादयः ।।

**तद्धितप्रत्ययाः**

तद्धितपदेन ते प्रत्यया गृह्यन्ते येषां तद्धिताः (४.१.७६) इत्याधिकारेण अष्टाध्याय्यां तद्धितसंज्ञा विधीयते ।

**कृत्प्रत्ययाः**

कृत्प्रत्ययपदेन तिङ्भिन्नाः धातोः (३.१.९१) इत्याधिकारे विहिताः प्रत्यया

गृह्यन्ते । तदुक्तं कृदतिङ (३.१.१३) इति ।

**समासान्तप्रत्यया:**

व्यवहारविधौभाषाया: साधुत्वनिरूपणाय यदि व्याकरणस्य लक्ष्यं स्यात् तथैव लघुना उपायेन संक्षिप्त रूपमादाय वाक्यपदंपद्यानां च सौन्दर्य सम्बर्धनाय अपि पाणिनिना पर्यन्त: विहित: तदर्थं कृत्तद्धित समासान्त एकशेष इति भावेन पञ्चवृत्तय: स्वीकृता । एतेषु समास: य: वृत्ति अस्ति तत्र पदसाधनवेलायां कदाचित् समास अनन्तरं समस्तपदस्य साधुत्वविधानाय प्रत्यय व्यवस्था विहिता । तेषु निम्नोक्तप्रत्यया: स्वीकृता । १. ङच्, २.अ, ३.अच्, ४.टच्, ५.षच्, ६. ष, ७.अप्, ८. असिच् ९. अनिच्, १०.इच्, ११. कप् ।

**प्रत्ययलक्षणम्**

प्रत्ययलक्षणं कर्त्तुं प्रत्यय: (३.१.१.) इति सूत्रानुरोधात् तृतीयोऽध्यायत: पञ्चमोऽध्यायसमाप्तिपर्यन्तं तस्याधिकारऽस्मिन् सुप्–क्यच्–सन् आदि ये शब्दस्वरूपा: विधीयन्ते ते प्रत्ययसंज्ञां लभन्ते । तस्मात् कारणात् प्रकृति–उपपद–उपाधि–विकार–आगम प्रभृतय: न लभन्ते । प्रत्यया: धातु: प्रातिपदिकात् वा भवन्ति । एतदर्थं पाणिनिना परश्च इति सूत्रं विहितम् । अर्थात् ये प्रत्ययसंज्ञां परे भवति इति अवधियते। प्रत्यय परश्च चेति सूत्रद्वयं अधिकार सूत्रत्वेन अवधियते । अनुदात्तश्च (३.१.३) इति सूत्रद्वारा प्रत्ययानां आदि उदात्त स्वर विधियते ।

इथमेव मायया जगति यथा जीवार्निजीवा: श्च वद्धा: सन्ति तथैव सम्पूर्णं संस्कृतवाङ्मये प्रत्ययद्वारावद्धं स्यात् ।

**सन्दर्भा:**


१. वाक्यपदीयम् - १/७३
२. अष्टाध्यायी (१.४.१४)
३. वाक्यपदीयम्-कारिका- १/२२
४. शब्दशक्तिप्रकाशिका, कारिका-९
५. शब्दशक्तिप्रकाशिका, कारिका-१०
६. शब्दशक्तिप्रकाशिका, कारिका-१
७. अष्टाध्यायी (१.४.१०४)
८. बालमनोरमा (सिद्धान्तकौमुदी भाग- ३) पृ. ११२


—०—


*Ph.D.* ***शोधच्छात्रा, संस्कृतविभाग:,***
***रेभेन्साविश्वविद्यालय:, कटकम्, ओडिशा।***
***मार्गदर्शक:- डॉ० युधिष्ठिरसाहु:***

# श्रीजगन्नाथसंस्कृतौ कलेवरान्तरणम्

डॉ. नृसिंहनाथगुरुः

जगतः नाथः श्रीजगन्नाथः सर्वलोकपालकः पतितोद्धारकः शिष्टाचाररक्षकश्चेति प्रसिद्धिः गतः। नीलाचलाधिपतेः पुरुषोत्तमस्य देवस्यापि मानवोचितानि सर्वाणि सुख-दुःख-मोह-मायादीनि दैनन्दिनकार्याणि भवन्ति। 'जातस्य हि ध्रुवो मृत्युः ' इति स्मृतेः जनाः संसारे उत्पद्यन्ते कियत्कालं जीवन्ति परं नश्यन्ति च । यदा जनानां मृत्युर्भवति तदा आत्मा पुरातनं शरीरं घटं परित्यज्य कालक्रमेण नूतनशरीरे घटे संस्थापितो भवति। पुरातनशरीरे जीर्णे सति नूतनशरीरस्यावश्यकता अनुभूयते । तदुक्तं श्रीमद्भगवद्गीतायाम्–

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ।।[१] इति।

'यथा देहे तथा देवे' इति न्यायेन भगवतः परमपुरुषस्य श्रीजगन्नाथस्यापि नवकलेवरः भवति। नवकलेवरे श्रीविग्रहाणां घट अर्थात् ब्रह्म परिवर्तनं भवति । नवकलेवरस्य साधारणतः अर्थः भवति कलेवरान्तरणम् अर्थात् नूतनशरीरधारणम् ।

आत्मनः स्वरूपं न कोऽपि जानाति । आत्मा नित्यः अप्रमेयः अविनाशी अव्यक्तः अचिन्त्यः अविकारी चास्ति। तथैव ब्रह्मस्वरूपम् आकारं वर्णञ्चापि न कोऽपि जानाति। आत्मस्वरूपस्य ब्रह्मपदार्थस्य नवकलेवरे घटपरिवर्तनमर्तात् पिण्डपरिवर्तनं भवति । तर्हि ब्रह्मणः स्वरूपं किमिति जिज्ञासायां वेदान्तमतेन जगदीश्वरः ब्रह्मेत्याख्यायते। तस्य ब्रह्मणः स्वरूपम् उपनिषत्सु बहुधा प्रतिपाद्यते। माण्डूक्योपनिषदि तत्स्वरूपं निगद्यते यत्-

'' एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभावाप्ययौ हि भूतानाम्। नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं.... अदृष्टमव्यवहार्यमग्राह्यम्..... एकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः''।।[२] इति। असौ अद्वितीयः सर्वव्यापकः चैतन्यस्वरूपः निर्गुणश्चेति। अस्य शक्तिरपूर्वा विविधगुणमयी च। तद्यथा श्रूयते -

''एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ।।
न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते।
परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ।।
यस्तूर्णनाभ इव तन्तुभिः प्रधानजैः स्वभावतः।
देव एकः स्वमावृणोति स नो दधातु ब्रह्माव्ययम्।।''[३] इति।

अस्यैव तेजसा निखिलं जगत्प्रकाशते। सूर्यचन्द्रादयः एतस्य प्रकाशने प्रकाशिताः भवन्ति। अग्न्यादीनां तु का कथा। श्रूयते -

" न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः।
तमेव भान्तमनु भाति सर्वं तस्य भासा सर्वमिदं विभाति ।।" [४] इति।

स एवैको विश्वरूपः सर्वदेवमयश्चेति बहुधा वर्ण्यते। तद्यथा-

"अग्निर्यथैको भुवनं प्रविष्टो रुपं रुपं प्रतिरुपो बभूव।
एकस्तथा सर्वभूतान्तरात्मा रुपं रुपं प्रतिरुपो बहिश्च।।" [५] इति।

" तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः।
तदेव शुक्रं तद्ब्रह्म तदापस्तत्प्रजापतिः।।" [६] इति।

अतः 'सर्वं रहस्यं पुरुषोत्तमस्य देवा न जानन्ति कुतो मनुष्यः ।"

रहस्यमयस्य परमपुरुषस्य श्रीजगन्नाथस्य रहस्यं देवाः अपि ज्ञातुमसमर्थाः भवन्ति, कथं वा मनुष्याः । ब्रह्मपदार्थविषये आलोचनं वितर्ककरणं नोचितम् । श्रीविग्रहाणाम् अन्तर्विराजितः ब्रह्मपदार्थः कीदृशः? सः श्रीकृष्णस्य देहावशेषः, अथवा बुद्धदेवस्य दन्तविशेषः अथवा जीवितशालग्रामः अथवा अन्यत् किम् ? एतत्सर्वं कपोलकल्पितम्। यतोहि एनं ब्रह्मपदार्थं ब्रह्मा-इन्द्रद्युम्न-विश्वावसु-प्रभृतयः दृष्टवन्तः इति किम्वदन्ती। एवञ्च श्रीविग्रहाणां ये घटपरिवर्त्तनं कुर्वन्ति ते सेवका एव जानन्ति । तस्मात् ब्रह्मविषये किमपि कथनम् अत्दर्शनतुल्यं भविष्यति। तत्त्वतः श्रीजगन्नाथः हिरण्यगर्भः। तद्यथा श्रूयते - "

" हिरण्यगर्भ समवर्तताग्रे भूतस्य जातः पतिरेकमासीत् " [७] । इति।

हिरण्यगर्भशब्दस्यार्थः शालग्रामः हिरण्यप्रसूः ।आर्यावर्त्ते शालग्रामपूजनं बहुप्राचीनमस्ति। अतः विग्रहाणां क्रोटरे शालग्रामशिला रत्नमयी अलङ्कृता सुपूजिता च सती विराजते।

एषा वज्रकीटकर्तितविष्णुशिला गुण्डकीनदी तीरे प्राप्यते । तदुक्तं यथा-

" गण्डक्यामेव देशे तु शालग्रामस्थलं महत् ।
पाषाणस्तभं यत्तु शालग्रामेति स्थितम् ।।" [८] इति।

मानवानां देहः साधारणतः ६०-७० वर्षे नष्टो भवति । शास्त्रानुसारं मणिविग्रहाणां परमायुः दशसहस्र-परिमितमस्ति । धातुविग्रहाणां परमायुः एकसहस्रवर्षं, दारुविग्रहाणां परमायुः द्वादशतः अष्टादशवर्षं, चित्रप्रतिमाणां परमायुः एकवर्षम् एवञ्च मृण्मयप्रतिमाणां परमायुः एकमासं यावत् वर्तते । श्रीविग्रहाः दारुनिर्मिताः सन्ति अतः यस्मिन् वर्षे द्वौ आषाढमासौ भवतः तस्मिन् वर्षे श्रीविग्रहाणां नवकलेवरपर्व अनुष्ठीयते ।अपर आषाढमासः मलमास इति उच्यते । साधारणतः १२ वर्षान्तरे नवकलेवरः भवति । परन्तु एकस्यां शताब्द्यां चतुर्वारं १९ वर्षाभ्यन्तरे, द्विवारं १२ वर्षाभ्यन्तरे नवकलेवरः भवति । किन्तु श्रीविग्रहाणामङ्गक्षयवशात् तथा च वैदेशिकानामाक्रमणवशात् ८-९ - ११- १८ वर्षाभ्यन्तरेऽपि नवकलेवरपर्व अनुष्ठितमभवत् ।

पूर्वमहोदधितटे भासमानः सन् महादारुः प्रप्रथमतया यदा समागतोऽभवत्तदा मलमासः आसीत्। एषः आषाढ़मासः पुरुषोत्तमविष्णोः स्वरूपनिर्माणमासः इति विचिन्त्य पुरुषोत्तममासः इति कथ्यते ।

दारुदर्शनस्पर्शनमसत्रे महापातकनाशनं भवति । तस्मिन् ब्रह्मसंस्थापनेन यदा भक्ताः ब्रह्मघटमयस्य तस्य दर्शनेन चतुर्वर्गफलं प्राप्नुवन्ति । स्कन्दपुराणे उक्तं यथा-

'' अहो तवेयं खलु भाग्यराशिर्येनाविरासीद् भुवि दारुमूर्तिः ।
यस्यात्युपास्तं श्रुतिग्रहमुक्ति प्रदान मात्मज्ञ विमोहितानाम् ।।
यः एष प्लवते दारुः सिन्धोः पारे ह्यपूरुषम् ।
तमुपास्य दुराराध्यं मुक्तिं यान्ति सुदुर्लभाम् ।।'' [१] इति।

दारुवृक्षस्य लक्षणस्थानादिनिरूपणविषये इन्द्रनीलमणिग्रन्थे वर्णितमस्ति । दारुवृक्षाः नदीतटे श्मशाने मन्दिरप्राङ्गणे वा भवेयुः। चैत्यवृक्षः पिप्पलः न्यग्रोधवृक्षो (वटवृक्षः) वा दारुप्रतिमायाः कृते अच्छेद्यः। तद्यथा– ''चैत्यवृक्षश्च न्यग्रोध अच्छेद्यः प्रतिमार्थाय " ।

दारुः निश्चितरूपेण न्यग्रोधवृक्षः भवेत् । वृक्षस्य स्वादः तिक्तातिरिक्तः स्वल्पमधुरो भवेत्। अयं वृक्षः पुरातनः तथा च कीटैः न दूषितः वज्रपातरहितश्च भवेत् । तस्मिन् वृक्षे विहङ्गानां क्रोटरं न स्यात् । विषधरः सर्पः वृक्षस्य रक्षकः भवेत् ।
सूतसंहितानुसारं श्रीविग्रहाणां श्रीबलभद्र- देवी सुभद्रा- श्रीजगन्नाथ- श्रीसुदर्शनादीनां दारुवृक्षाणां वर्णः यथा- श्वेत-पीत-कृष्ण-रक्तयुक्तः भवेत् । शङ्ख-चक्र-गदा-पद्मादिभिः श्रीभगवच्चिह्नैः अङ्कितश्च भवेत् ।

नवकलेवरप्रक्रियायाः शुभारम्भः चैत्रमास-कृष्णपक्ष-दशमीतिथितः भवति । अस्मिन् दिवसे दारुसन्धानार्थं बहिर्वनयागयात्रा अनुष्ठिता भवति । अस्मिन् पर्याये श्रीविग्रहाणाम् आज्ञामालां स्वीकृत्य दइतापतिसेवकाः लेङ्कादेउलकरण-तडाउकरणेतिसंज्ञकसेवकाः राजगुरुप्रभृतयः पुरीमण्डलान्तर्गत-काकटपुर-मङ्गलामन्दिरं प्रति गच्छन्ति । तत्र मातुः कृपया दारुवृक्षाणां परिचयं संप्राप्य वैदिकपद्धत्यां वृक्षाणां संस्कारपूर्वकं यज्ञादिकर्म सम्पादयन्ति। अनन्तरं दारुवृक्षाणां स्वर्ण-रौप्य-लौहकुठारेण च्छेदनं कृत्वा तान्मन्दिरं प्रति आनयन्ति।

बहिर्वनयागयात्राऽनन्तरम् अन्तर्वनयागयात्रा स्नानपूर्णिमातः आरभ्यते । एषः महाऽनवसर इति उच्यते। अस्मिन् समये विग्रहनिर्माणं, घटपरिवर्तनं च भवति।

आषाढ़मासकृष्णपक्षचतुर्दश्यां निशार्द्धे नूतनविग्रहाणां न्यासकार्यानन्तरं श्रीमन्दिराभ्यन्तरे यज्ञे पूर्णाहूतिः भवति । अन्धकारः सर्वत्र भवति । तदनन्तरमेते दइतापतिसेवकाः नूतनविग्रहान् पटवस्त्रप्रदानपूर्वकं यज्ञशालातः गर्भगृहेस्थितं अनवसरपिण्डिं यावत् अनीय पुरातनविग्रहाणां सम्मुखे संस्थापयन्ति । तदा दइतापतिसेवकाः ब्रह्मघटपरिवर्तनं कुर्वन्ति । परन्तु एतत्सर्वं गोपनीयतया भवति ।

अनन्तरं दइतापतिसेवकाः पुरातनविग्रहान् नीत्वा कोइलिवैकुण्ठे इति स्थाने निर्मिते गर्ते गूहयन्ति ।

ब्रह्मतत्त्वं यद्यपि अगोचरं तथापि कलिकलुषनाशाय तदीयगुणकीर्तनमेव सत्पथ-प्रेरकमिति विचार्य महाप्रभोः श्रीजगन्नाथस्य दिव्यलीलाविलासवशात् तत्त्वामृतं किञ्चिदत्रोपस्थाप्यते इति दिक्।

---

**सन्दर्भाः सहायकग्रन्थाश्च**

१. श्रीमद्भगवद्गीतासांख्ययोगः-२२ ।
२. माण्डूक्योपनिषद् - ६.७।
३. श्वेताश्वतरोपनिषद् - ६.११, ८, १०।
४. सा एव - ६.१४ ।
५. कठोपनिषद् - - २.५.९।
६. श्वेताश्वतरोपनिषद् - ४.२ ।
७. शुक्लयजुर्वेदकाण्वसंहिता - १४/४ ।
८. पद्मपुराणम्, उत्तरखण्डः, अ ११
९. स्कन्दपुराण-उत्कलखण्डः - २१/२,३।

**सहायकग्रन्थसूची**


१. महापुरुषविद्या-प्रो.डॉ.सत्यवादी मिश्रः, पण्डित. सोमनाथ दाशः, श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, श्रीविहार, पुरी।८
२. पुरुषोत्तम श्रीजगन्नाथसंस्कृति - श्रीपरमानन्दत्रिपाठी, पुरी, २००३।
३. श्रीजगन्नाथदर्शनम् - डॉ. नृसिंहनाथ गुरुः, शिक्षाश्री पब्लिकेशन, पुरी, २०१४।
४. दारुब्रह्मङ्क नवकलेवर , श्री कृष्णचन्द्र महापात्र एवं श्री भास्कर मिश्र, ओडिशा वुक् ष्टोर, विनोदविहारी, कटक-२, १९९६।
५. श्रीजगन्नाथ ओ नवकलेवर - ड़ॉ. काह्नुचरण मिश्रः, विद्याभवन,पुरी।
६. Complete Sanskrit Works on Jagannatha Culture Vol.1.Edited by Prof. Harekrishna Satapathy, Rashtriya Sanskrit Vidyapeetha, Tirupati, 2006.


—०—


**सहायकाचार्यः,साहित्यविभागः,**
**कलियाचकविक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयः,**
**हेडिया, पूर्वमेदिनीपुरम् (प.व.)**

# अग्निदर्शनम्

**डॉ.सुरेनकुमारमहापात्र:**

परमे वैचियेऽस्मिन् चराचरे जगति यत् किमपि परिलक्ष्यते वा यत् किमपि विद्यते तत् सर्वं भगवत: सृष्टि भूति च तथा तस्यांशविशेषरूपं, यत्तु मानवानां कृते नित्यान्तं प्रयोजनमूल्यम्। आर्या: प्रकृतौ विभिन्ना: शक्ते: उपासका: । तेषां नये अग्निदेवताया: स्थानं महत्त्वपूर्णम्। अग्नि: पृथिवीस्थानीयदेवतापि स्वर्गे मर्त्त्ये पाताले च सर्वत्र विराजते । येन विना मानवानां जीवनधारणमसम्भवं, येन माध्यमेन च जीवने कुशलता जायते स एवाग्नि:। मानवसभ्यताया: विकाशानुसारं तस्य व्यवहारबिषये सर्बे परिचिता:। पुरा काले वैदिका: आर्या: मुनय:ऋषयश्चाग्निं देवतारूपेण पूजितवन्त:, तथा यज्ञादि कृत्वा फलमपि प्राप्तवन्त:। आर्या: भारतवर्षे अग्निपूजाया: प्रचलनं तथा च यज्ञस्य आयोजनं तथा पूजनं च कृतवन्त:। देवता भवतु नाम यद्यग्ने: व्यवहारे व्यतिक्रम: स्यात् , तर्हि अनर्थ एव घटते। अत: चतुर्षु वेदेषु अग्ने: माहात्म्यं सम्यक् प्रतिपादितम्। केवलं ऋग्वेदे द्विशत सूक्तमाध्यमेन तस्य वैशिष्ट्यं स्वरूपञ्च परिप्रकाशितम्। तत्रैव प्रथममन्त्रे वर्णितं यत्- "अग्निमीले पुरोहितं यज्ञस्य देवमृत्त्विजम् ।

होतारं रत्नधातमम्"।। इति।। (ऋग्वेदे-१/१/१)

अर्थात् अग्निदेवरस्माकं परम: पूज्य: , नमस्य:, पुरोहित: , शुभफलदायक:, इष्टदाता तथा रत्नधारकश्च। यतोऽहि यजमानैरायोजिते ईष्टयज्ञे अभीष्टफलप्राप्त्यर्थं ईष्टदेवानामाहूय हितं सम्पादयति फलं प्रापयति च। देदीप्यमान: , यज्ञस्य रक्षक:, स्वयं प्रकाश: तथा अग्निदेवेन सह अस्माकं संपर्क: पिता पुत्र इव। तेन यजमानानां धर्म:, अर्थ:, काम: , मोक्षादि लाभ: भवतीति मधुछन्दा ऋषिणा (मननात् मन्त्र:) मननं कृतवन्त:। अतोऽच्यते ब्राह्मणग्रन्थे - अग्निर्वै देवानां होता इति। (ऐ.ब्रा.-१ २-३)। मुण्डकोपनिषदि वर्णितं यत् - विराटपुरुषस्य मूर्ध्नि भवति अग्नि: । "अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ" (१-२-४)। यद्वा भवतु नाम, अग्निदेवबिषये सम्यक् ज्ञानारोहणं तथा बास्तविके जीवने अग्ने: व्यवहारे सदा सतर्कदृष्टि: अवश्यं प्रयोजनीयम्।

**अग्निशब्दस्य ब्युत्पत्ति: -**

अङग-नी(न लोपश्च) - अग्नि:। अंगति नाम उर्द्धं गछति। अङ्ग नी - अग्नि:, अर्थात् अग्रे य: नयति सैवाग्नि: , अपि च अ तस्यापरार्थ:अग्रणी, सेनापति: पुरोहितश्च। अपरञ्च अ कार: गतिसम्पन्न: , ग कार: पदार्थव्यञ्जक:, नि कार: दाहक:। अर्थात् य: काष्ठतृणादीन् आत्मसात् करोति वा अङ्गीभूतं करोति सैवाग्निरिति कथ्यते।

**अग्नेरुत्पत्ति:-**

अरणि तथा मन्थनदण्ड़सकाशादेव अग्नेरुत्पत्ति:। अत: अरणि तथा मन्थनदण्ड़श्च अग्ने: मातापितरौ भवत:। निरुक्तकार: यास्कमते अग्नि: पृथिवी स्थानीयदेवता (नि.७-

२) । सैवाग्निः द्युलोके उत्पन्नसत्त्वेऽपि चतुर्द्दशब्रह्माण्डे विराजते। मातरिश्वा च तं मर्त्त्यलोकमानीतवान्। ऋग्वेदे पुरुषसूक्ते विराटपुरुषस्य मुखादेव अग्नेरुत्पत्तिरिति प्रतिपादितम्। उक्तञ्च- "मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत इति। (१०-९०-१३) वैदिकऋषीणां कल्पनायामग्निः अनेकेषु क्षेत्रेषु समुपलभ्यते। ऋग्वेदे तस्य त्रिबिधजन्मविषये वर्णितं यत् -

"दिवस्पति प्रथमं यज्ञे अग्नियस्माद्वितीयं परिजातवेदाः।
तृतीयमस्तु नृण्णा अजस्रमिन्धान एनं जरते स्वाधः"। इति।
(१०-५४-१)

अर्थादग्निः प्रथमतः आकाशे विद्युदृपेण आहवनीयाग्निः नाम्ना जातम्। द्वितीये तु अस्माकं पार्श्वे , अतः तस्य नाम जातवेदसः रुपेण प्रसिद्धः। तृतीये जले जन्मग्रहणं कृतम्। अनेन रुपेण हितकारी अग्निः निरन्तरं ज्वाज्जल्यमानमेव तिष्ठति। यः तमुत्तमरुपेण आराधनां करोति, तस्य सर्वसौभाग्यलाभः जायते। आपस्तम्भश्रौतसूत्रे (५-१६-४) चत्वारः अग्नयरिति वर्णितम्। यथा - भौम(भूमिस्थानीय), जलमध्यस्थ, अन्तरीक्ष वा सूर्यमध्यस्थ, अपि च द्युलोकस्थमिति। अग्नेः सर्वमयसत्तारुपत्वं ऋग्वेदे प्रकाशितम्। यत्र सदसदः सत्तायां प्रकाशितं सन् ब्रह्मस्वरुपेऽपि तिष्ठति। उक्तञ्च ऋग्वेदे-

"असच्च सच्च परमे व्योमनुक्षस्य जन्मान्नदितेरुपस्थे।
अग्निर्ह नः प्रथमत्वा ऋतस्य पूर्व आयुनि बृषभस्य धेनुः "।। (१०-५-७)

अग्निः सच्चासच्च। स आकाशे सूर्यरुपेण जन्मग्रहणं कृतम्। अस्माकं पुरतोऽपि। स यज्ञस्य पूर्ववर्त्ती काले अवस्थितमासीत्। स बृषः गाभीश्च , अर्थात् स्त्री पुरुषश्च उभयरुपी।

**अग्नेः नामानि -**

अमरकोषानुसारेण अग्नेः चतुर्त्रिंशनामानि यथा-

"अग्निर्वैश्वानरो बह्विर्वीतिहोत्रो धनञ्जयः। कृपीट योनिर्ज्वलनो जातवेदात्तनुनपात्।।
बर्हिः शुष्मा कृष्णवत्मा शोचिष्केश उषर्वुधः। आश्रयासो बृहद्भानुः कृशानुः पावकोऽनलः।।
रोहिताश्वो वायुसखः शिखावानाशुशुक्षणिः। हिरण्यरेता हुतभुग्देहनो हव्यबाहनः।।
सप्ताचिर्दमुनाः शुक्रश्चित्रभानुर्विभावसुः। शुचिरपित. . . "।। इति ।। (१-५२)।

यद्यप्येतानि नामानि विद्यन्ते , तथापि स्वर्गमर्त्त्यपातालनिमित्तं स्थानानुसारेण भिन्नानि नामानि शास्त्रान्तरेषु वर्णितं यथा -

"स्वर्गे आहवनीयाग्निः मर्त्त्ये बार्हष्पत्याग्नये।
दक्षिणाग्निञ्च पाताले अग्निर्नाम स उच्यते"।।

एतदतिरिक्तं वाडवाग्निः, दावाग्निः , जठराग्निरिति नामानि विद्यन्ते। अथर्ववेदीयकर्मकाण्डे उपनयनकाले समुपलभ्यते दशसंस्कारे दशनामानि यथा -
१. गर्भाधाने भरतनामाग्निः , २. पुंसवने शुचिनामाग्निः , ३.सीमन्तनयने मङ्गलनामाग्निः, ४.जातकर्मे प्रगल्भनामाग्निः , ५.नामकरणे ज्योतिनामाग्निः, ६. अन्नप्राशन्ने

शुचिनामाग्निः, ७.गोदाने सूर्यक्नामाग्निः, ८. उपनयने समुद्भवनामाग्निः, ९.वेदारम्भे चन्द्रमसनामाग्निः, १०. विबाहे योजकनामाग्निरिति।

अपि च गोभिलकृत सूत्रसंग्रहे गृह्यपरिशिष्टे च कर्मानुसारेण अग्नेः बहुनि नामानि दृश्यन्ते यथा- लौकिके अर्थात् नूतनगृहप्रवेशादिषु पावकः, गर्भाधाने मारुतः, पुंसवने चन्द्रमसः, शुङ्गायां शोभनम् , सीमन्तोनयने मङ्गलम् , जातकर्मणि प्रगल्भः, नामकरणे पार्थिवः , अन्नप्राशन्ने शुचिः , चूडाकर्मणि सत्यम् , उपनयने समुद्भबः , गोदाने सूर्यः, समावर्त्तने अग्निः , बिसर्गे वैश्वानरः , विबाहे योजकः , चतुर्थ्यां शिखी , प्रायश्चित्ते बिधूः, पाकयज्ञे (वृषोत्सर्गादि) साहसः, बक्षहोमे बह्निः , कोटिहोमे हुताशनः , पूर्णाहूत्यां मृडः , शान्तिके वरदः , पौष्टिके वलदः , अभिचारे (मारण) क्रोधः , वशीकरणे शमनः , वरदाने अभिदूषकः , कोष्ठे (उदरे) जठरः , मृतभक्षणे (चिताग्निः) क्रव्यादश्चेति। (विहारीकर्मकाण्डे-पृ११७) ।

**अग्नेः स्वरूपवर्णनम् -**

अग्नेः स्वरूपं किमिति प्रसङ्गे अथर्ववेदीयकर्मकाण्डे वर्णितं यत् -" सर्वलक्षणसम्पर्णं जटामुकुटमण्डितम्। चतुः श्रोत्रं द्विनाशञ्च षडनेत्रं द्विरास्यकम्।।
सर्वलक्षणसम्पर्णं पीताम्वरं विभूषितम्। सितपद्मासनं देवमजवाहनसञ्ज्ञकम्।।
वालार्कसमवर्णञ्च मधुपिङ्गललोचनम्। पादौ पश्चिमतः स्थाप्य पूर्वतः शिर उच्यते।।
आयुधं सप्तहस्तं स्यादुर्ध्ववक्त्राकृतिं भवेत्। दक्षिणे चतुः हस्तं स्याद्वामभागे त्रिहस्तकम्। शक्तिं चापि गदां चैव पात्रं वामकरे स्थिताम्। एवं ध्यात्वा द्विजः सम्यक् होमं च तदनन्तरम"।। इति।।

**अग्नेरवयवम् -** " यत्र काष्ठं तत्र शोत्रं यतो धूमोऽत्र नासिका।
यत्राल्प ज्वलनं नेत्रं यतोऽङ्गारस्ततः शिरः।।
यत्र प्रज्वलिता ज्वाला सा जिह्वा जातवेदसः"।। इति।।

अमरकोषे मुण्डकोपनिषदि तथा तन्त्रसारेऽपि अग्नेः सप्तजिह्वानां नामः वर्णं स्थानादि विषये वर्णितं यत् -

" हिरण्या कनका रक्ता सुकृष्णा सुप्रभा तथा। बहुरुपातिरक्ता च सप्तजिह्वाः प्रकीर्त्तिताः।।
हिरण्या तप्तहेमाभा शूलपाणेर्दिशस्थिता। वैदूर्यवर्णा कनका प्राच्यां दिशि समाश्रिता।।
तरुणादित्यसंकाशा रक्त जिह्वाग्नि संस्थिता। अतिरिक्ता जवा भासा वायव्यां दिशि संस्थिता।। बहुरुपा यथाख्याता दक्षिणोत्तर संस्थिताह्न।। (बिहारी कर्मकाण्डे-पृ१३८)
अपि च अथर्ववेदीय कर्मकाण्डेऽपि वर्णनं दृश्यते यत् -

"काली कराली च मनोजवा च सुलोहिता या च सु धूम्रवर्णाः।
स्फुलिङ्गिनी विश्वरुची च देवी लोलायमाना इति सप्तजिह्वाः।।
हिरण्या लोहिता कृष्णा श्वेता धूम्रास्तथैव च।
ब्रह्मरुपाति रुपा च जिह्वा वर्ण प्रकीर्त्तिताः"।। इति।।

वस्तुतः वेदे विभिन्नेषु सूक्तेषु भिन्न भिन्नरुपेण अग्नेः स्वरुपं वर्णितम्। कुत्र च अग्निदेवं युबकरुपेण, कुत्र च प्रत्येकेषां गृहाणां गृहपतिरुपेण वर्णितम्। यथाचोक्तं ऋग्वेदे- "यः पञ्च चर्षणीरभि निषसाद दमे दमे। कवि गृहपतिर्युवा।। (७-१५-२)
तत्रैव सुदर्शनातिथिश्चेति प्रतिपादितं यथा- " स दर्शत श्रीरतिथिर्गृहे वने वने शिश्रीये तक्ववीरिव ।। इति।। (१०-९१-३) । कैषीतकि ब्राह्मणग्रन्थे च -ह्ल अग्निर्वै देवानां मुखं (३-६) रुपेण वर्णितम् । यतोऽहि यज्ञे आहूति प्रदानेन अग्निदेवः माध्यमेन सर्वे देवाः आहूतिं गृहणन्ति। ऋग्वेदे देवान् ब्राह्मणरुपेण (१-१४०-२) , पुरोहितरुपेण (९-९६-२०), देवदूत रुपेण (१-७२-७), असूर रुपेण, होता रूपेण , अध्वर्युः, कुत्र च ऋषिः रुपेणाऽपि वर्णनं दृश्यते। यथा च-

"ऋषिः श्रेष्ठः स मिध्यसे यज्ञस्य प्राविता भवह्ल। इति। (३-२१-३)। अथर्ववेदानुसारं सैवाग्निः मित्रम् , वरुणः , सविता , इन्द्रप्रभृति नाम्ना अभिहिता। यथा च - "स वरुणः सायमग्निर्भवति स मित्रो भवति, प्रातरुदान् स सविता भूत्वान्तरीक्षेण वाति स इन्द्रो भूत्वा तपति मथातो दिवम्"। इति। (अ.वे-१३-३-१३) । यद्यप्यग्निः सर्वदा सर्वत्र विराजन्ते तथापि माङ्गलिककार्यं यथा यज्ञः , व्रतोपनयनम्, बिबाहादि करणसमये पण्डिताः दिवसः कालः मुहूर्त्तादिकं अग्नेरवस्थितिं निरुपयन् प्रारम्भं कृतवन्तेति शास्त्रे परिलक्ष्यते यथा -

"रविः भौमः गुरुः स्वर्गे मर्त्त्ये च वुधसोमयोः।
शनि शुक्रौ च पाताले अग्निस्थान स उच्यते ।।
स्वर्गे सप्तघटि चैव मर्त्त्ये पञ्चघटि स्थितः।
पाताले त्रिघटि चैव अग्निकालः स उच्यते" ।इति।

अतः पुर्वकाले आर्याः मुनिऋषयश्च दिवसकालादि निर्णीय यज्ञानुष्ठानादि कृतवन्तः , येन तेषां कार्ये फलप्रसूरभवत्। अग्निर्विषये सम्यक् तया ज्ञानारोहणं कृत्वा तस्य यत्नपूर्वकं व्यवहारः करणीयः, अनेन स्वयं अग्निदेवः सर्वेषां कल्याणं करिष्यन्तीति मे मतिः।। ।। इति शम्।।

---

**सहायकग्रन्थाः -**


१. ऋग्वेदसंहिता। २. बिहारीकर्मकाण्डः। ३. अमरकोषः।
४.वेदसंकलन। ५.ऐतरेयब्राह्मणग्रन्थे। ६. निरुक्तम्।
७. आपस्तम्भश्रौतसूत्रम्। ८. अथर्ववेदीयकर्मकाण्डपद्धति।
९. मुण्डकोपनिषद्। १०. सूत्रसंग्रहः(गोभिलकृत)।
११. कौषीतकी ब्राह्मणग्रन्थः।


—o—

*अध्यापकः, संस्कृतविभागः, रामनगरमहाविद्यालयः*
*देपालः, पूर्बमेदिनीपुरम्, पश्चिमवङ्गः*

# माहेश्वरसूत्राणां दार्शनिकतत्त्वानुशीलनम्

प्रो. अनुपमापृष्टि:

संस्कृतभाषामधिकृत्य वैज्ञानिकपद्धत्या: सुव्यवस्थिता: पक्षा: भारतीयै: पण्डितै: यावत् विचारिता: तावदन्यत्र कुत्रापि नोपलब्धा: । संस्कृतवाङ्मये शाब्दिकानां व्याकरणे नैव बुद्धिवैभवं प्रतिपाद्यते । भाषाया: माहात्म्यं प्रतिपादयितुं शब्दानुशासनस्य प्रयोग: दृश्यते । तथाहि प्रकृतिप्रत्ययविश्लेषणेन, मूलभूतशब्दान्वेषणेन धातुप्रत्ययवाच्यनिश्चयेन पदार्थानां परस्परसम्बन्ध-निरूपणेन च तेषां शब्दानामनुशासनं भवति । तत्र अनेकेषु शब्दानुशासनेषु पाणिनीयशब्दानुशासन-मेव सर्वातिशयीतं भवति । अत: पाणिनीयव्याकरणशास्त्रस्याध्ययनं प्रथमत: आवश्यकम् । तत्र व्याक्रियन्ते व्युत्पाद्यन्ते प्रकृतिप्रत्ययविभागविषयीक्रियन्ते, असाधुशब्देभ्यो विविच्य बोध्यन्ते साधुशब्दा अनेनेति व्युत्पत्त्या वि-आङ्-पूर्वकात् डुकृञ् करणे इत्यस्माद्धातो: 'करणाधिकरणयोश्च' इति पाणिनिसूत्रेण करणार्थकल्युट्प्रत्ययान्तो निष्पद्यतेऽयं व्याकरणशब्द: । एवञ्च शास्ति अनेनेति शास्त्रम् । शास्-धातो: 'सार्वधातुभ्य: ष्ट्रन्' इत्यौणादिकसूत्रेण ष्ट्रन्-प्रत्यये नपुंसकलिङ्गे शास्त्रमिति । पाणिनीयव्याकरणं तु चतुर्दशमाहेश्वरसूत्राश्रितम्, एतेषां चतुर्दशसूत्राणां ज्ञाने सर्ववेदपारायणं पुण्यं फलमिति भाष्ये उक्तम् । व्याकरणोपक्रमे 'वेदानां वेद:' इति छन्दोग्य-श्रुतिरपि सर्णसमाम्नायमेव अधिकृत्य प्रवृत्ता एतत्परैव नान्यपरा इत्युक्तम् । अर्थात् परमात्मा-परंब्रह्म-ओंकारात्मक: यदा आविर्बभूव, तदा तस्य सृष्टिनिर्माणेच्छायां यन्महानर्तनं सञ्जातम्, तच्चतुर्दशविद्यात्मकं चतुर्दशवारं शब्दव्याकृतिकारकं डमरुकं ध्वनयन् । चतुर्दशशब्दनिर्माणा-त्मकसूत्राणि अकरोत्, तान्येव चतुर्दशसूत्राणि इमानि चतुर्दशभुवनानि, चतुर्दशविद्यारूपाणि परिवर्तितानि जातानि इति वैज्ञानिकं रहस्यम् । तत्तु तन्त्रागमसम्प्रदाये अद्वैतशैवदर्शनेतिहासे च आचार्यनन्दिकेश्वरकृतं माहेश्वरसूत्राणां दार्शनिकव्याख्यारूपं प्रतिपादितम् ।

नृत्तावसाने नटराजराजो ननादढक्कां नवपञ्चवारम् ।
उद्धर्तुकाम: सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ।।[१]

अर्थात् सकललोकनायक: परमेश्वर: परमशिव: सनक-सनन्दन-सत्कुमारादीन् श्रोतृन् नन्दिकेश-पतञ्जलि-व्याघ्रपाद-वसिष्ठादीन् उद्धर्तुकामो ढक्का-निनाद-व्याजेन चतुर्दशसूत्रात्मकं तत्त्वमुपदिदेश। आचार्यनन्दिकेश्वरेण चतुर्दशमाहेश्वरसूत्राणां व्याख्यानं शैवाद्वैतस्थापनार्थं शब्दशास्त्रप्रवृत्त्यर्थञ्च प्रकारद्वयेन कृतम् । तत्र एकैव कारिका पाणिन्यादिवैयाकरणानां कृते यथाह–

अत्र सर्वत्र सूत्रेषु ह्यन्त्यं वर्णचतुर्दशम् ।
धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये ।।[२]

अर्थात् एषु अन्त्यवर्णचतुर्दशं धातुमूलकशब्दशास्त्रप्रवृत्त्यर्थम्, पाणिन्यादीष्टसिद्धये अनुबन्धाः क्रियन्ते । अनुबन्धनमनुबन्धः । अर्थात् अनुबन्धो नाम विषयप्रयोजनाधिकारिसम्बन्धः ।

**१. अइउण् –**

इति सूत्रस्याध्यात्मपरत्वकथनं नन्दिकेश्वरकृतकाशिकायाम्–

अकारो ब्रह्मरूपः स्यान्निर्गुणः सर्ववस्तुषु ।
चित्कलामि समाश्रित्य जगद्रूप उणीश्वरः ।।[३]

तत्राद्येन सूत्रेण सर्ववर्णानां समस्तभुवनानां च समुद्भवरूपं स्वात्मतत्त्वमुपदिष्टम् । तद्यथा- 'अ' परमेश्वरो निर्गुणः, 'इ' मायामाश्रित्य, 'उ' व्यापकः सगुणो, 'ण्' ईश्वर आसीदिति श्रुतिः । अर्थात् असद्ब्रह्म, वै-निश्चयेन, अग्ने- सृष्टेः पूर्वम्, इदम्- अकाररूपाक्षरात्मकम् आसीत् । ततः - अक्षरात् असतो वै सत्- सगुणमजायत इत्यर्थः निष्पद्यते । तदुक्तं गीतायाम्- 'अक्षराणामकरोऽस्मि' (१०/३३) इति । ऐतरेयारण्यके (२.३.५) 'अ' इति ब्रह्मः । यथा-

अकारः सर्ववर्णाग्रयः प्रकाशः परमेश्वरः ।
आद्यमन्त्येन संयोगाद् अहमित्येव जायते ।।[४]

अत एवाह 'आदिरन्त्येन सहेता' इत्यादिकारोऽन्त्यो हकारः, अकारादि-हकारान्ता वर्णाः, ततः परमात्मन एवाभवन् इत्यर्थः । इदम् इति चित्कलामाश्रित्य गायत्रीम् ईम् पद्मिनीम् इम् इतिवत् बीजमन्त्रत्वेन बोध्यः । उक्तम्–

अकारो जप्तिमात्रं स्यादिकोरश्चित्कलामता ।
अकारो विष्णुरित्याहुर्व्यापकत्वात् महेश्वरः ।।[५]

**२. ऋलुक् –**

परमेश्वरस्य इच्छया जगतः जनयामासः । तदुक्तं नन्दिकेश्वरकृतकाशिकायाम्–

ऋलुक् सर्वेश्वरो मायां मनोवृत्तिमदर्शयत् ।
तामेव वृत्तिमाश्रित्य जगद्रूपमजीजनम् ।।[६]

ननु सर्व-वेदान्तेषु परमेश्वर एक इति निश्चितत्वात् मायाभिः चित्कलां समाश्रित्य जगद्रूपोऽभूद् इत्युक्तेरद्वैत हानिः स्यात्, इत्याशङ्कायमाह- ऋलृक्, अर्थात् ''ऋ-परमेश्वरः, लृ-मायाख्यां मनोवृत्तिं क्-अदर्शयत् । तामेवाश्रित्यश्चेच्छया जगत् जनयामास'' इत्यर्थः । ऋकारस्य प्रमाणम्- ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलमिति महानारायणोपनिषद् (१२-२) प्रमाणम् । श्रीतन्त्रेऽपि तत्त्वविमर्शिनीटीकायामुक्तम्–

''मम चाभून्मनोरूपम्लृकारः परमेश्वरः ।''

अर्थात् ऋ-लृ-वर्णौ यथा तादात्म्यमापन्नौ । अतः ऋकाररूपिवृत्तिः परमेश्वरः एवं लृकाररूपि

मनोवृत्तिमायया मध्ये न कोऽपि भेदः ।

**३. एओङ्–**

इति सूत्रे मायेश्वरयोः अद्वैतत्वं प्रतिपादितम् । तथाहि नन्दिकेश्वरकृतकाशिकायामुक्तम्–

एओङ्-माहेश्वरात्मैकयविज्ञानं सर्ववस्तुषु ।
साक्षित्वात् सर्वभूतानां स एक इति निश्चितम् ।।[७]

ननु ऋलृक् प्रसङ्गे - परमेश्वरः स्वच्छया जगन्तं जनयामास इत्युक्तेः जन्यजनकभावेऽद्वैत हानिः स्याद्, इत्यशङ्कायाः निवारणार्थमुक्तम्– तत् सृष्ट्वा तदेवानुप्राविशत् । तदनुप्रविष्टम् । इति तैत्तिरीयोपनिषद् (२.३) श्रुतिमाश्रित्य जन्यजनकत्वञ्च स्वस्यैव तद्रूपेण वर्तमानत्वाद् नाद्वैतहानिः । अकारेकाराभ्यां निष्पन्नप्रणवरूपेणोङ्कारेण सगुणनिर्गुणयोरैक्यबोधितेनैव दृष्टान्तेन सर्वत्र ऐक्यबुद्धौ द्वैतनाशो ध्वनितः ।

वट-बीजन्यायेन च पूर्वसूत्रद्वयजनितं वर्णपञ्चमकमेव सकलजगत्कारणमिति । उत्तरसूत्र-वर्णनामपि तस्मेदेव सम्भवः । समष्टि-व्यष्टिभेदेषु पूर्वपूर्वयुतद्वितीयस्य पूर्वपूर्वयुततृतीयस्य च संयोगजनकमिदं सूत्रम् । अर्थात् वट-बीजयोर्मध्ये परस्परं परस्परं प्रति जन्यजनकभावत्वात् अइउण् एवं ऋलृक् मध्ये विद्यमानाः पञ्चवर्णाः समस्तजगतः कारणम् । सूत्रमिदं समष्टि-व्यष्यिभेदेन प्रथमवर्ण अकारस्य द्वितीय इवर्णः एवं तृतीय उवर्णेन सह मिलित्वा ए,ओ, वर्णस्योत्पन्नं करोति । अतः समन्वये बोधनमन्येकत्वेनोक्तम्। अथर्ववेदस्य माण्डूक्योपनिषदि तस्य प्रमाणं दीयते - 'सर्वं ह्येतद् ब्रह्म', 'अयमात्मा ब्रह्म' (मा.३.२) ।

**४. ऐऔच्–**

इति सूत्रप्रसङ्गे नन्दिकेश्वरकृतकाशिकायामुक्तम्–

ऐऔच्-ब्रह्मस्वरूपः सन् जगत् स्वान्तर्गतं ततः ।
इच्छया विस्तरं कर्तुमाविरासीत् महामुनिः ।।[८]

स्वात्मभूतस्य परमेश्वरस्य जगत्कारणत्वं कथम् इत्याशङ्कायाम् ऐओच् इति । ततः स्वान्तर्गतं जगद् विस्तारयितुमिच्छुः ऐ-आदिशक्तियुक्तोक्षर इति । अतः पूर्वसूत्रगताकारेकारदीर्घ-योगस्यैव ऐकारत्वमेकत्वं च सम्यग्ज्ञानस्वरूपः परमेश्वरो यः, स पूर्वसूत्रकारदीर्घोकारस्यैव योग औकारत्वम् । यः प्रज्ञानात्मा मायासम्बलितः, स औकारो, यः स आउ इत्याविर्भावे । उक्तञ्च स्वरविमर्शिन्याम् उकारज्ञानसंयोगात् सर्वसम्भूतिरिष्यते इति । इच्छया जगद् विस्तारयितुमुक्त इत्यर्थः । अत्राह– प्रणवेन जगद् व्याप्तं मायायामवतिष्ठते । इति ज्ञानोत्तमे।

एवं तत्त्वसमुदायानां त्रयोदशवर्णाच्छिवादिप्रकृत्यन्तानाम् उद्भवः । प्रकृतिपुरुषविवेकमुत्तरत्र कथयति । अस्मिन् सूत्रे उपसंहारत्वेन पठ्यते । अत्र ह्रस्व-दीर्घ

प्रभेदाच्चतुर्दशस्वराणामेव कीर्तनं चतुर्दशदभुवन-चतुर्दशचक्र-चतुर्दशप्रकरणमिति निष्कर्षः।

**५. हयवारट् –**

इत्यनयोः सृष्टिप्रक्रिया उक्ताऽस्ति । पूर्वकथितमकार इ-मायामतित्य कया रीत्या व्यापको भवतीति जिज्ञासायां नन्दिकेश्वरकृतकाशिकायामुक्तम्–

भूतपञ्चममेस्माद् हयवरण्महेश्वरात् ।
व्योम-वाय्यम्बु-वह्न्याख्य-भूतान्यासीत्स एव हि ।।[९]

अस्मिन् सूत्रे भूतपञ्चकमासीत् । वस्तुतः आकाशादिभूतचतुष्टयमेवोक्तमत्र न तु पृथिवी । तत्तु लण्-सूत्रे प्रधानकारणत्वात् आधारभूतं पृथिवी इत्युक्तम् । स एव परमेश्वरः भूतपञ्चकमिति उक्तम् । हयवरट् इति सूत्रे भूतचतुष्टयमेव प्रतिपादितम् । तद्यथा उक्तम्–

हकाराद् व्योमसंज्ञश्च यकाराद् वायुरुच्यते ।
रकाद् वह्निस्तोयं तु वकारादिति शैववाक् ।।[१०]

अर्थात् हवर्णे आकारस्य यवर्णे वायोः रवर्णे अग्नेः, ववर्णे जलस्य ग्रहणं भवतीति शैववाक्। तैत्तिरीयोपनिषदि अप्युक्तम्- तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः । आकाशाद्वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी इति (२.२२) ।

**६. लण्–**

अस्मिन् सूत्रे परमात्मनि पञ्चभूतानामुत्पत्ति जातम् । तद्यथा- उद्भिज-स्वेदज-जरा-आयुज-अण्डजादीनां ग्रहणम् । तत्र प्रधानरूपेण कारणं भवति पृथिवी । अतः काशिकायामुक्तम्–

आधारभूतं भूतानामन्नादीनां च कारणम् ।
अन्नाद् रेतस्ततो जीवः कारणत्वाल्लणोरितम् ।।[११]

**७. ञमङणनम्–**

अस्मिन् सूत्रे तन्त्रोक्तप्रकारेण अन्न-पान-यानादीनां कारणत्वेन स्थितानां तन्मात्राणामुत्पत्ति-क्रमं काशिकायामुक्तम्–

शब्दस्पर्शौ रूप-रस-गन्धाश्च ञमङ्णनम् ।
व्योमादीनां गुणा ह्येते, जानीयात्सर्ववस्तुषु ।।[१२]

अत्र केषाञ्चित् ग्रन्थेऽकरादिक्षकारान्ताः षट्त्रिंशत् तत्त्वमयाः, कतिचित् तन्त्रराजादिग्रन्थे पञ्चपञ्चक्रमेण भूत-लिपि-प्रकारेण, एवमन्यत्र बीज-निर्णय-भेदा बहवः सन्ति । पञ्चवर्णेष्वन्तिमवर्णाः शब्दस्पर्शादयो गुणाः इति वचनात्सर्वजगत्कारणभूतस्य वर्ण-रूप-पुरुषस्य सर्वेषां च व्योमादिगुणा इत्यर्थः ।

**८. झभञ्–**

ततः सूत्राभ्यां कर्मेन्द्रियवर्णमुद्घाटयति काशिकायामुक्तम्–

वाक्पाणी च झमञासीद विराटरूपं चिदात्मनः ।
सर्वजन्तुषु विज्ञेयं स्थावरादौ न विद्यते ।।[१३]

परमात्मनश्चिद्रूपशिवस्य प्राणि जातस्य च झकारभकारौ स्थावरादिषु विना विराड्ुपं विज्ञेयम् इत्यर्थः ।

**९. घढधष्–**

अथ क्रमप्राप्तं पादादिकमाह नन्दिकेश्वरकृतकाशिकायाम् –

घढधष् सर्वभूतानां पाद-पायू उपस्थकः ।
कर्मेन्द्रियगण ह्येते जाता हि परमार्थतः ।।[१४]

अर्थात् परमार्थतः परमशिवसकाशात्, इमे कर्मेन्द्रियगणाः सर्वजन्तूनां पाद-पायूपस्थ घढधष् वर्ण जाता ।

**१०. जबगडदश्–**

अथ क्रमप्राप्तं ज्ञानेन्द्रियसम्भवमाह काशिकायाम्–

श्रौत्र-त्वङ्-नयन-घ्राण-जिह्वा-धीन्द्रियपञ्चकम् ।
सर्वेषामपि जन्तूनासीरितं जबगडदश् ।।[१५]

अर्थात् वर्गाणां मध्यवर्णोत्थो ज्ञानेन्द्रियगणः स्मृतः, इतिवचनात् जबगडवर्णसम्भवो ज्ञानेन्द्रियगण इति तस्य सर्वत्र स्थस्यैव ज्ञानेन्द्रियगणः समुत्पन्नः । सर्वज्ञ सर्वेषां प्राणिजातानामेते वर्णा ज्ञानेन्द्रियाणां जनका इति वा ज्ञातव्यमित्यर्थः ।

**११. खफछठथचटतव्–**

एतैरषृवर्णैः प्राणादिपञ्चकम्, मनोबुद्ध्यहंकृतश्च जगतां कारणत्वेन सम्भूतार्थं नन्दिकेश्वर-कृतकाशिकायामुक्तम्–

प्राणादिपञ्चकं चैव मनो बुद्धिरहङ्कृतिः ।
बभूव कारणत्वेन ख फ छ ठ थ ट त व् ।।[१६]

एतेष्वषृवर्णेषु पूर्वं पञ्चमवर्णाः वर्गस्य द्वितीयाक्षराः पश्चाच्च चकार तकारादयः । एतैव जगतां कारणत्वेन सम्भूताः ।

**१२. कपय –**

सर्वप्राणिकारमत्वेनाद्यन्तवर्ग-द्वक्षरग्रहणेन सम्पूटी ङावं प्रकृतिपुरुषाभ्यां प्रकाशयति। ककाग प्रकारात्प्रकृतिपुरुषौ सम्भूतौ । तथाहि काशिकायाम् –

प्रकृतिपुरुषं चैव सर्वेषामेव निश्चितम् ।
सम्भूतमिति विज्ञेयं क-पाभ्यामिति निश्चितम् ।।[१७]

**१३. शषसर्–**

ततोऽवस्थात्रयं निरूपयति काशिकायाम् –

सत्वं रजस्तम इति गुणानां त्रितयं पुरा ।
समाश्रित्य महादेव शषसर क्रीडति प्रभुः ।।[१८]

उक्त सूत्रे सत्त्वरजस्तमसां गुणत्रयाणां विशिष्टरूपेण विचारः कृतोऽस्ति । शक्नोति मनुष्यदेह-गदिकार्यं कर्तुं योऽसौ सः रजोगुणः । शक्लृशक्तौ इति धातोर्डः । स्यति अन्तं करोति इति षः । तमोगुणः । षोऽन्तकर्मणि इति धातुः । अथवा स्यायति क्षयं करोतीति षः । षोक्षये इति धातुः । पृषोदरादित्वात् षत्वम् । सीदन्ति तिष्ठन्ति अस्मिन् ज्ञानवैराग्यप्रभृतयो धर्माः इति सः सत्त्वगुणः ।

**१४. हल्–**

सर्वतत्त्वजनकः स्वयं त्वातीत इति ज्ञापनार्थमेतच्च तत्सूत्रं चकारात् काशिकायामुक्तम्-

तत्वातीतः परः साक्षी सर्वानुग्रहविग्रहः ।
अहमात्मा परो हल् स्यादिति शम्भुस्तिरोदधे ।।[१९]

अर्थात् सर्वानुग्रह-विग्रहः, साक्षी, तत्त्वातीतो, हल् स्यादिति ढक्का-निनादव्याजेन सर्वेषां मुनि-जनानां तत्त्वमुपदिशं स्तिरोदध इत्यर्थः ।

---

**सन्दर्भाः सहायकग्रन्थाश्च –**


१.नन्दिकेश्वरकृता काशिका- श्लो.सं. १ ।

| | | |
|---|---|---|
| २.सा एव -२ । | ३.सा एव -३। | ४.सा एव -४ । |
| ५.सा एव -९ । | ६.सा एव -१० । | ७.सा एव - १३। |
| ८.सा एव -१४ । | ९.सा एव -१५ । | १०.सा एव -१६ । |
| ११.सा एव -१७ । | १२.सा एव -१८। | १३.सा एव -१९ । |
| १४. सा एव -२० । | १५.सा एव -२१ । | १६.सा एव -२२ । |
| १७.सा एव -२४ । | १८.सा एव - २५। | १९.सा एव -२७ । |


—०—


*आचार्याः, व्याकरणविभागः,*
*केन्द्रियसंस्कृतविश्वविद्यालयः, श्रीसदाशिवपरिसरः, पुरी, ओडिशा*

# धर्मशास्त्रे याज्ञवल्क्योक्तदिशा श्राद्धविचार:

डॉ.अनिलकुमारदाश:

श्रत् नाम सत्यम् । यया क्रियया सत्यस्य धारणं ग्रहणं भवति सा श्रद्धा इति कथ्यते ।श्रद्धाऽस्मिन्नस्तीति व्युत्पत्त्या "नन्दिपचादिभ्योऽच्" इति [१] सूत्रेण श्राद्धमिति पदं सिद्ध्यति। श्रद्धमेव श्राद्धमिति विग्रहेण स्वार्थेऽण् प्रत्यये कृते श्रद्धापूर्वकं क्रियमाणं पितृपरितोषकर्म श्राद्धपदेन व्यपदिश्यते ।

"कुर्य्यादहरह: श्राद्धमन्नाद्येनोदकेन वा ।
पयोमूलफलैर्वापि पितृभ्य: प्रतीमावहन् ।।"

इति [२]मनो: अनुशासनमत्र मूलं प्रमाणम् । "श्राद्धं नामादनीयस्य तत्स्थानीयस्य वा द्रव्यस्य प्रेतोद्देश्येन श्रद्धया त्याग:" इति [३]विज्ञानेश्वरेण याज्ञवल्क्यस्मृतिव्याख्याने प्रोक्तम् ।श्राद्धं मुख्यत: द्विविधम् - दैवं पित्र्यञ्च। विज्ञानेश्वरमतानुसारं[४] पित्र्यं श्राद्धं द्विविधम्, यथा पार्वणमेकोद्दिष्टञ्चेति । पुनश्च श्राद्धं नित्यश्राद्धं पार्वणश्राद्धं वृद्धिश्राद्धम् एकोदिष्टश्रेद्धं सपिण्डीकरणञ्चेति पञ्चविधम् । पार्वणवृद्धिश्राद्धयो: कालविषये याज्ञवलक्येनोक्तं स्वमतं यत् -

[५]"अमावास्याऽष्टका वृद्धि: कृष्णपक्षेऽयनद्वयम् ।
द्रव्यं ब्राह्मणसंपत्तिर्विषुवत्सूर्यसंक्रम: ।।
व्यतीपातो गजछाया ग्रहणं चन्द्रसूर्ययो: ।
श्राद्धं प्रति रुचिश्चैते श्राद्धकाला: प्रकीर्तिता: ।।"

अर्थात् अमावास्यादिने विशेषत: अपराह्णे अष्टकाया: वृद्धौ नाम पुत्रोत्पत्त्यादिदिने कृष्णपक्षे (अपरपक्षे) अयनद्वये च श्राद्धं कर्तव्यम् ।

श्राद्धसम्पत्तिविषये श्राद्धे कानि द्रव्याण्यतीवाऽऽवश्यकानि तान्यत्र सम्पत्तिपदेनोच्यन्ते। यथोक्तं [६] याज्ञवल्क्येन -

"कर्मनिष्ठास्तपोनिष्ठाः पञ्चाग्निर्ब्रह्मचारिणः ।

पितृमातृपराश्चैव ब्राह्मणाः श्राद्धसम्पदः ।।" इति ।

श्रोत्रियः, ऋत्विक्, जामाता, त्रिणाचिकेतः, श्वशुरः, मातुलः, दौहित्रः, शिष्यसम्बन्धिनः विहितानुष्ठानतत्पराः, तपःशीलाः, पञ्चाग्नियुतब्रह्मचारी (उपकुर्वाणकः, नैष्ठिकश्च), ज्ञाननिष्ठादयश्च श्राद्धसम्पदो भवति । कर्त्ता श्राद्धे उपयुक्तब्राह्मणान् भोजयेत्। मिताक्षराकारेण सर्वेषु वेदेषु अग्र्यः, श्रुताध्ययनसम्पन्नः, ब्रह्मवित् प्रभृतयश्च श्राद्धे भोज्यन्नाः ब्राह्मणाः इति लिखितम् । अत्र मूलभूतं वचनं यथोक्तं [७]याज्ञवल्क्येन -

"अग्र्यः सर्वेषु वेदेषु श्रोत्रियो ब्रह्मविद्युवा ।

वेदार्थविज्ज्येष्ठसामा त्रिमधुस्त्रिसुपर्णकः ।।" इति ।

श्राद्धे कीदृशाः ब्राह्मणाः अभोज्यान्ना भवन्ति तस्मिन् विषये सम्प्रति प्रतिपाद्यते। चौर्यवृत्तिसम्पन्नः, पातकी, नपुंसकः, नास्तिकवृत्तिः, जटिलो अर्थात् यः ब्रह्मचारी वेदं नाधीतवान् सः, दुश्चर्मा, कितवो, पूगजायकाः, वैद्यः, देवलकः, मांसविक्रयी इत्यादयो ब्राह्मणाः श्राद्धेनैव भोज्याः भवन्तीति । अपि च क्षयश्वासः, हीनाङ्गोऽधिकाङ्ग, काणो, वधिरो, मूकः, भूतकाध्यापकः, पिशुनी, कुनखी, कृष्णदन्तः, क्लीवो, नासिकप्रभृतयः श्राद्धे अभोज्या। यथोक्तं [८]याज्ञवल्क्येन -

"रोगी हीनातिरिक्ताङ्गः काणः पौनर्भवस्तथा ।

अवकीर्णी कुण्डगोलौ कुनखी श्यावदन्तकः ।।" इति ।

श्राद्धकरणेन किम् फलम् ? प्राप्नोति इति जिज्ञासायां [९]योगीश्वरेण उक्तं यत् -

"आयुः प्रजां धनं विद्यां स्वर्गं मोक्षसुखानि च ।

प्रयच्छन्ति तथा राज्यं नृणां प्रीताः पितामहाः ।।" इति ।

अर्थात् आयु:, प्रजा:, धनं, सुखानि, स्वर्गं, मोक्ष:, राज्यञ्च पितृपुरुषा: प्रीता: सन्त: प्रयच्छन्ति । यत्र देशे वा वंशे श्राद्धं न भवति तत् कुले पुत्रा: न जायन्ते । न कोऽपि अरोग: न शतायु: कोऽपि । अत: य: श्राद्धं करोति य: वा श्राद्धाय उपदेशं प्रयच्छति स: लोके तुल्यफलं प्राप्नोति । एवंप्रकारेण मया धर्मशास्त्रे याज्ञवल्क्योक्तदिशा श्राद्धविचार: कृत:। इति ।

---

**सन्दर्भाः सहायकग्रन्थाश्च –**

१. पाणिनीय-अष्टाध्यायी - ३/१/१३४; चौखम्बाप्रकाशिता ।
२. मनुस्मृति: ३/८२; चौखम्बाप्रकाशिता ।
३. याज्ञवल्क्यस्मृति:, श्राद्धप्रकरण-मिताक्षराटीका; चौखम्बाप्रकाशिता ।
४. तत्रैव, मिताक्षरा ।
५. याज्ञवल्क्यस्मृति: -१/२१७-२१८ ।
६. याज्ञवल्क्यस्मृति:, १/२२१ ।
७. तत्रैव, १/२१९ ।
८. तत्रैव, १/२२२ ।
९. तत्रैव, १/२७० ।

—०—

*सामयिकाध्यापक:, धर्मशास्त्रविभाग:*
*श्रीजगन्नाथसंस्कृतविश्वविद्यालय:, श्रीविहार:, पुरी , ओडिशा ।*

# आगमप्रमाणे भर्तृहरिसिद्धान्तः

श्रीकृष्णमण्डलः

**"एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति"**[१] इति भाष्यप्रमाणाद् धर्मसाधनसाधुशब्दप्रतिपादकव्याकरणशास्त्रारम्भसमर्थकादागमात् साधुशब्दानां धर्माङ्गत्वं सिद्धम्। अतः साधुशब्दानां धर्माङ्गत्वेऽपि न साधुशब्दव्यवस्थार्थे व्याकरणागमापेक्षा, "अक्के चेन्मधुविन्देदिति" न्यायेन "अयं साधुः शिष्टप्रयुक्तत्वात् गोशब्दवत्" इति तर्कादेव साधुत्वज्ञानसम्भवादिति शङ्का समुदेति। अत एव केवलेन शुष्कतर्केण धर्मव्यवस्थापनं न भवितुमर्हति। ऋषिज्ञानस्याऽप्यागममूलकत्वात्। अतः आगमप्रमाणस्वीकारोऽप्यावश्यकः। तथा चोक्तं[२] हरिणा -

"न चागमादृते धर्मस्तर्केण व्यवतिष्ठते।
ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम् ।।" इति।

अर्थात् आगमादृते धर्मः पुण्यं पापञ्च केवलेन शुष्कतर्केण न व्यवतिष्ठन्ते। आगममूलक एव तर्को धर्मं व्यवस्थापयितुमर्हति। ऋषीणां यज्ज्ञानं तदप्यागमपूर्वकमेव। तदुक्तं भगवता[३] मनुना - "आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः।।" इति।

आगममूलकः पुरुषतर्कस्तु दृष्टमप्यर्थं व्यवस्थापयितुं न क्षमते, किमुतादृष्टस्वरूपं धर्मम्। सर्वेऽपि वादिनस्तर्कमालम्ब्य विचारे प्रवृत्ताः दूरमपि गत्वा तर्कं परित्यज्यन्ति न वस्तुस्वभावं व्यतिवर्तन्ते। यागात् स्वर्गः भवति इत्यनुमानेन न साधयितुं शक्यते, यागत्वस्वर्गसाधनत्वयोः व्यापकभावस्य कुत्राऽप्यदृष्टचरत्वेन व्याप्तिग्रहाभावेन तर्कस्य प्रवृत्त्ययोगात्। यतः सर्वेऽपि युक्तिवादिनः किमिति बह्निर्दहति न जलमिति स्वभाव एव बह्नेरिति वदन्ति। एवं यागः स्वर्गसाधनमिति विषये स्वभाव एष यागस्येत्युत्तरयन्ति। तत्र बह्नेर्दाहजनकत्वस्य प्रत्यक्षसिद्धतया दाहजननस्वभावो बह्निरिति तु सरलतयाऽवगन्तुं शक्यते। परन्तु यागस्य स्वर्गसाधनतया अप्रत्यक्षत्वाद् यागः स्वर्गसाधनमिति आगममन्तरेण नावगन्तुं शक्यते। ऋषीणामपि यदतीन्द्रियार्थविषयकं प्रातिभं ज्ञानम्भवति, तदपि आगमपूर्वकमेव,

न स्वोत्प्रेक्षापूर्वकमिति। अतस्तर्केण आगमस्य प्राबल्यं स्वीक्रियते। स च नरकपालं शुचि, प्राण्यङ्गत्वात् इत्यादिस्थलेषु बाधितो न भवति, अपितु तर्कं बध्नाति। तदुक्तं हरिणा[४]-

"धर्मस्य चाव्यवच्छिन्नाः पन्थानो ये व्यवस्थिताः।
न तांल्लोकप्रसिद्धत्वात् कश्चित्तर्केण बाधते ।।"

ये धर्मस्य पन्थानः धर्मप्रतिपत्त्युपायाः श्रुतिस्मृत्यादयः व्यवस्थिताः लोकप्रसिद्धाः सर्वैः शिष्टैरपरित्यागाद्विच्छेदरहिताः पारम्पर्यक्रमादागताः, तानागमान् लोकप्रसिद्धत्वात् कश्चित् तर्केण न बाधते, लोकविरोधे तर्कस्यानुत्पादात्। प्रत्युत नरकपालशुचित्वबोधकागमेन तर्क एव बाध्यते। यत आगमाल्लोकविरुद्धं तर्कविरुद्धं चाचरणं प्रतिपद्यन्ते शिष्टाः, अतो नागमस्तर्कबाध्यः। एतेषां तर्काणां न केवलमागमेषु, अपितु लोकेऽपि विफलता प्रसिद्धा। पदार्थानां शक्तयोऽवस्थादेशकालानां भेदाद् भिन्नाः भवन्ति। अवस्थाभेदात् - धान्यबीजानामवस्थान्तरेऽङ्कुरजननशक्तिः, भूषिकाद्याताानां च न, पिप्पल्याख्यौषधेः आर्द्रस्य कफजननशक्तिः, शुष्कस्य च त्रिदोषशमनशक्तिः। देशभेदात्- हैमवतीनामसु स्पर्शोऽतिशीतः, बलाहकाग्निकुण्डादिषु तूष्णः। कालभेदादपि वस्तूनां स्वभावभेदः, शक्तिभेदश्च। तथा च हेमन्ते कूपोदकमुष्णं, ग्रीष्मे च शीतम्भवति। तदुक्तम् -

"कूपोदकं वटच्छाया श्यामा स्त्री चेष्टकाग्रहम्।
शीतकाले भवेदुष्णमुष्णकाले च शीतलम्।।" इति।

ग्रीष्मे अग्नेरत्युष्णः स्पर्शः, न तथा हेमन्ते इति शक्तिभेदः। अतोऽवस्थादेशकालभेदाद् भावानां भिन्नासु शक्तिषु सिद्धासु अनुमानेन तासामप्रत्यक्षविशेषाणां शक्तीनां प्रसिद्धिर्निश्चयोऽतिदुर्लभः, प्रत्यक्षसाहचर्यदृष्टान्तबलेनैव तर्कप्रवृत्तेः। तदुक्तं [५] हरिणा -

"अवस्थादेशकालानां भेदाद्भिन्नासु शक्तिषु।
भावानामनुमानेन प्रसिद्धिरतिदुर्लभा।।" इति।

किञ्च पदार्थानां तां तामर्थक्रियाम्प्रति शक्तेः निश्चितत्वेऽपि द्रव्यस्याऽभ्रपटलचन्द्रकान्तादिविशिष्टद्रव्यसम्बन्धे सति सा शक्तिः प्रतिबध्यते। चन्द्रकान्तसंयोगे बह्न्यादेर्न दाहजननसामर्थ्यमित्यर्थः। अयं दहति अग्नित्वात् इत्यादिभिरनुमानैर्न शक्यते दाहजनकत्वमनुमातुम्। चन्द्रकान्तादिप्रतिबन्धकद्रव्यसमवधानेऽग्नित्वस्य दाहजनकत्वव्यभिचारादिति वस्तुस्वभावो नानुमानादवगन्तुं शक्यते, किन्त्वागमादेव। तथा चोक्तं [६]हरिणा-

"निर्ज्ञातशक्तेर्द्रव्यस्य तां तामर्थक्रियामपि।

विशिष्टद्रव्यसम्बन्धे सा शक्तिः प्रतिबध्यते।।" इति।

यतः कुशलैरनुमातृभिः कपिलादिभिः यत्नेनानुमितोऽपि जगतः कारणं प्रधानम् इत्येव रूपोऽर्थः अन्यैः कणादादिभिरपि युक्ततरैः अन्यथैव परमाणुः जगत्कारणमित्येवं रूपेणोपपाद्यते। एवं तदन्यैरप्यन्यथेति। अतः कुशलोऽनुमाता अपि धर्मविषये कञ्चिन्निर्णयं कर्तुं नार्हति। तदुक्तं [७] हरिणा–

"यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः।

अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते।।" इति।

एवं केवलेन शुष्कतर्केण न धर्मव्यवस्थापनम्, न दृष्टादृष्टफलसिद्धिः, न च पदार्थशक्तिज्ञानम्। अतः प्रत्यक्षानुमानप्रमाणपेक्षया आगमप्रमाणस्वीकारः अत्यावश्यकः इत्याचार्यभर्तृहरि-सिद्धान्तः इत्यलम्।

---

**सन्दर्भाः सहायकग्रन्थाश्च -**


१. पतञ्जलि-महाभाष्यम् - पस्पशाह्निकम् - चौखम्बाप्रकाशनम् ।

२. भर्तुहरि- वाक्यपदीयम्, ब्रह्मकाण्डम् -३०- चौखम्बाप्रकाशनम् ।

३. मनुस्मृतिः १२/१०६ - चौखम्बाप्रकाशनम्।

४. भर्तुहरि- वाक्यपदीयम्, ब्रह्मकाण्डम् -३१- चौखम्बाप्रकाशनम् ।

५. तदेव -३२।

६. तदेव - ३३।

७ - तदेव -३४


—०—


*विद्यावारिधि (Ph.D.) शोधच्छात्रः, नव्यव्याकरणविभागः,*

*केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीसदाशिवपरिसरः,पुरी, ओडिशा।*

*मार्गदर्शकः - प्रो०हरेकृष्णमहापात्रः*

# ऐतरेयोपनिषदि सृष्टिक्रमविचारः

जुबुलि षढङ्गी

ऋग्वेदीय-ऐतरेयारण्यकान्तर्गत-द्वितीयारण्यकस्य चतुर्थपञ्चमषष्ठाध्यायानां नाम ऐतरेयोपनिषद् भवति। अध्यायत्रययुक्ता इयम् उपनिषद्। इयम् उपनिषद् ब्रह्मविद्याप्रधाना भवति। प्रथमाध्याये इत्थं वर्णितमस्ति यत् सृष्टेः प्राक् केवलम् एक एव आत्मा आसीत्। आत्मानं विहाय अन्यत् किमपि नासीत्। अयमात्मा ईक्षां चक्रे अर्थात् सृष्टिरचनां कृतवान्। केवलं बहुभवितुं सङ्कल्पमाध्यमेन अम्भसः मरीचेः मरस्य च रचनां कृतवान्। आकाशादिक्रमेण अण्डमुत्पाद्य अम्भःप्रभृतीन् लोकान् असृजत। तत्राम्भःप्रभृतीन् स्वयमेव व्याचष्टे श्रुतिः। अदस्तदम्भः शब्दवाच्यो लोकः, परेण दिवं द्युलोकात् परेण परस्तात्सोम्भशब्दवाच्यः, अम्भो भरणात्। अम्भसो लोकस्य द्यौः प्रतिष्ठाश्रयः। द्युलोकाद् अधस्ताद् अन्तरिक्षं यत् तत् संज्ञया मरीचयः। मरीचिभिः वा रश्मिभिः सम्बन्धात् बहुवचनम्। मरो नाम विनाशस्वभावा पृथिवी। म्रियन्ते अस्मिन् भूतानि इति। या अधस्तात् पृथिव्याः ता आप उच्यन्ते। यद्यपि पञ्चभूतात्मकत्वं लोकानां तथापि अब् बाहुल्यात् अपामभिः एव अम्भो मरीचिः मरमाप इच्युच्यन्ते। एवं प्रकारेण लोकत्रयस्य रचनादनन्तरं तस्य पालनार्थं लोकपालानां रचनां कर्तुं प्रवृत्तः। स पुनः ईक्षणं कृतवान् लोकपालान् सृजे इति। यतो हि परिपालयितृन् विना मया सृष्टाः लोकाः विनश्येयुः। तेषां रक्षणार्थं लोकपालानामावश्यकता विद्यते। अतः ईक्षित्वा अद्भ्यः प्रधानेभ्यः पञ्चभूतेभ्यः पुरुषाकारं शिरःपाण्यादिलक्षणं स्वावयवसंयोगेन निर्मितवान्। परमात्मनः सङ्कल्पात् अस्य विराटपुरुषस्य शरीरे इन्द्रियाणाम् इन्द्रियगोलकानामेव च इन्द्रियाधिष्ठातृदेवानामपि उत्पत्तिर्भवति। प्राणिवर्गाणामुत्पत्त्यनन्तरं तेषां क्षुत्पिपासादूरीकरणार्थं स्वयं परमात्मा गोः शरीरं प्रस्तुतवान्। परन्तु एतत् प्राणीनां कृते न पर्याप्तमिति मत्वा घोटकं रचितवान्। तत्रापि पर्याप्तत्वमलब्ध्वा मनुष्यशरीरं सृष्टवान् परमात्मा। सुकृतं मनुष्यशरीरं दृष्ट्वा देवगणाः तां सृष्टिंमनुमोदितवन्तः। परमात्माज्ञया शरीरे यथास्थानं वागादीन्द्रियाणामुत्सोजायते। मनुष्यजीवनरक्षणार्थम् अन्नस्य रचना कृता तेन। परन्तु सर्वं सृष्ट्वा परमात्मानं विना इदं सर्वं निष्पलं स्यात् इति श्रुतिस्वारस्यमाधारीकृत्य तं सृष्ट्वा तदेवानुप्राविशत् इति। अर्थात् अयमेव आत्मा पुरुषस्य मूर्धसीमानं विदार्य तेनैव मार्गेण प्रविष्टवान्। इत्थं जीवभावं प्राप्य प्राणिभिः साकं तादात्म्य प्राप्तवान् अयमात्मा। इत्थं ईक्षणादारभ्यः आत्मानः प्रवेशपर्यन्तं यः सृष्टिक्रमः उक्तः। स एव क्रमः ईश्वरसृष्टिरिति विद्यारण्यमुनेः वचनं प्रामाणम्। एतदर्थं श्रुतिवाक्यं गीयते यत् - ईक्षणादिप्रवेशान्तः संसार ईश्वरकल्पितः। अर्थात् ईक्षणादारभ्यः प्रवेशपर्यन्तं सर्वमेव ईश्वरकल्पितमिति सर्वसम्मतं भवति। अस्या आख्यायिकायाः बहवः विचित्राः कथाः दृश्यन्ते। यतः मायायां न कापि

कौतुहलजनकवाणी वर्त्तते अर्थवादपरकमेव आचार्याणां वचः सर्वस्य विधानं युक्तमिति भगवदभिप्रायः।

अद्वितीयतत्त्वबोधार्थं सृष्टिरचना कृता परमात्मना। सृष्टिं विना आचारव्यवहाराभावात् तत्त्वजिज्ञासायाः अभावः स्वतःसिद्धः एव। तत्त्वस्य यथार्थरुपज्ञानाय सृष्टिं विरचयामास परमात्मा। संसारः अयं प्राणिनां कृते यथा विलासनिवासः तथा देवानामपि विलासस्थलम्। देवानां पूजार्चनादिकं संसारे भवति। पूजार्थं क्षीरघृतादीनां तथा च अन्नव्यञ्जनादीनाम् एवञ्च फलपुष्पप्रभृतीनामावश्यकता दृश्यते। तेषां सम्भवः पृथिव्यामेव। अतएव यथार्था भवति सृष्टिरचना।

सर्वादौ आत्मा एव एव आसीत्। अन्यत् किमपि द्रव्यं नासीत्। अनेनात्मना चिन्ता कृता कथमहं सृष्टिं विचरयिष्यामि। आत्मा आप्नोतेः अत्तेः अततेः वा परः सर्वज्ञः सर्वशक्तिः अशनयादिसर्वसंसारधर्मवर्जितो नित्यशुद्धबुद्धमुक्तस्वभावः अजः अजरः अमृतः अभयः अद्वयो वै। इदं यदुक्तं नामरूपकर्मभेदभिन्नजगदात्मैवैकः अग्रे जगतः सृष्टेः[१] प्रागासीत्।

उत्पत्तेः प्राक् जगदिदं नामरूपादिभेदरहितम् आसीत्। केवलं कारणात्मा आत्मस्वरूपेणासीत्। किमपि कार्यं करणञ्च नासीत् तदा। कार्यं नाम शरीरम्। करणं नाम इन्द्रियम्। पुनश्च यदा व्यक्तिभावं प्राप्तवान् जगत् तदा व्याकृतनामरूपभेदत्वात् अनेकशब्दप्रत्ययगोचरं भवति। न तु आत्मैकशब्दप्रत्ययगोचरं तदा। तदर्थम् एकमुदाहरणं दीयते शास्त्रकारेण - यथा सलिलात् पृथक् फेननामरूपव्याकरणात् प्राक् सलिलैकशब्दप्रत्ययगोचरमेव फेनं, यदा सलिलात् फृथक् नामरूपभेदेन व्याकृतं भवति तदा सलिलं फेनं चेति अनेकशब्दप्रत्ययभाक्सलिलमेवेति च एकशब्दप्रत्ययभाक् च फेनं भवति तद्वत्। एतद् व्यतिरिक्तमन्यत् किमपि व्यापारयुक्तं निष्क्रियं वा वस्तु नासीत्। यथा साङ्ख्यवादिनां मतानुसारेण आत्मव्यतिरिक्तं प्रधानं जगत्कारणं वर्तते। यथा च कणादमतावलम्बिनां विचारे परमाणुः आसीत्। इत्थम् अद्वैतवेदान्ते औपनिषत्सिद्धान्तानुसारेण आत्मव्यतिरिक्तं नान्यत्किञ्चिद् वर्त्तते। आत्मैवैक आसीत् इत्यभिप्रायः। यदि च उच्यते उत्पत्तेः प्राग् जगतः किमपि कार्यं करणञ्च नासीत्, तर्हि ईक्षणकार्यं कथं सम्भवम्। ईक्षणशब्देन दर्शनं बोध्यते, दर्शनकार्यं तु नयनाभ्यां भवितुं युज्यते। शरीरं विना इन्द्रियाणामाधाराभावादसम्भवत्वम्। इन्द्रियं विना दर्शनकार्यं कथं भवेत्। इत्यनुयोगे प्राप्ते उत्तरयति ग्रन्थकारो यत् - नात्र कस्यापि दोषस्य सम्भावना। सर्वज्ञस्वाभाव्यात् ईश्वरस्य। तथा च मन्त्रवर्णः - “अपाणिपादो जवनो ग्रहीता”[२] इत्यादि श्रुतेः। केनाभिप्रायेण इत्याह - लोकानम्भप्रभृतीन् प्राणिकर्मफलोपभोगस्थानभूतान्नु सृजौ सृजे अहमिति।

सः अयमात्मा इमाँल्लोकानसृजत् सृष्टवान्।३ यथा इह बुद्धिमान् तक्षादिः एवं प्रकारान् प्रासादादीन् सृजति, शिल्पकारादयः उपादानसामग्रीमाध्यमेन प्रासादनिर्माणे समर्थाः

भवन्ति परन्तु उपादानं विना कथं परमात्मा सृष्टिं रचयितुमर्हति। अस्य प्रश्नस्य उत्तरं दत्तवान् वेदान्ती यत् - नात्र कोपि दोष: सम्भवति। सलिले फेनस्थानीये आत्मभूते नामरूपे अव्याकृते आत्मैकशब्दवाच्ये व्याकृतफेनस्थानीयस्य जगत: उपादानभूते सम्भवत:। तस्मात् अयमेव सर्वज्ञ आत्मा स्वात्मभूतनामरूपोपादानभूतं जगत् निर्मितवान्। अत्र नास्ति कोपि विरोध:। यथा विज्ञानवान् मायावी उपादानं विनापि आत्मानमेव आत्मान्तरत्वेन आकाशेन गच्छन्तमिव निर्माति, तथा तदा सर्वज्ञो देव: सर्वशक्तिर्महामाय आत्मानमेव आत्मान्तरत्वेन जगद्रूपेण निर्माति इति युक्ततरं स्यात्। एवं च सति कार्यकारणयो: उभयो: असद्वादिपक्षाश्च न प्रसज्जन्ते । अनेनात्मना अम्भोमरीचीमरापप्रभृति लोकानां सृष्टि: भवति। यदा रचितद्रव्याणां रक्षणार्थं लोकपालस्य रचना कृता परमात्मना। स एव लोकपाल भवति विराट् पुरुष:। ईश्वरेण सङ्कल्प: कृत:। सङ्कल्पात् तस्य पिण्डादण्डसम: मुखस्योत्पत्तिर्जायते। मुखात् वागिन्द्रियस्य तस्मात् अग्नेरुत्पत्तिरासीत्। पुन: नासिकारन्ध्रस्य प्रकटनमभूत्। नासिकाभ्यां प्राणस्य तथा प्राणाद् वायोरुत्पत्तिर्भवति। तदनन्तरं क्रमानुसारेण नेत्रेन्द्रियस्य, कर्णेन्द्रियस्य, त्वच: लोमानि च उत्पद्यन्ते[४]। तं पिण्डं पुरुषविधमुद्दिश्य अभ्यतपत्। तदभिध्यानं सङ्कल्पं कृतवान् इत्यर्थ:। "यस्य ज्ञानमयं तप:" इति मुण्डकश्रुते:।

ईश्वरद्वारा अग्न्यादिदेवा: लोकपालरूपेण संकल्प्य आसीत् महत्संसारसमुद्रे निपातिता:। अयमेव संसार: अविद्याकार्यभूत:। अस्मिन् संसारसमुद्रे अविद्याकामकर्मप्रभवदु:खोदके तीव्ररोगजरामृत्युमहाग्राहे अनादावनन्ते अपारे निरालम्बे विषयेन्द्रियजनितसुखलवलक्षणविश्रामे पञ्चेन्द्रियार्थतृष्णामारुतविक्षोभोत्थितानर्थशतमहोर्मय: पतितवत्य:। अयमेव संसार: सर्वदा असार:। ब्रह्मज्ञानबाध्य:। ता: देवता: स्वयोनिं पुरुषं दृष्ट्वा खेदरहिता: भूत्वा उक्तवन्त: यत् - कृतमिदमधिष्ठानमतीव सुन्दरं दृश्यते अत एव सम्पूर्णपुण्यकर्मण: सकाशात् पुरुषो अयं निश्चितरूपेण सुकृतवान् भवति। तदर्थं शास्त्रप्रमाणं यत् - पुण्यं वै पुण्येन कर्मणा पापं पापेन इति ईश्वरेण इदं सर्वं ज्ञात्वा एतदेव स्थाने प्रियमिति उक्तम्। सर्वे हि स्वयोनिषु रमन्ते अतो यथायतनं यस्य यद्वदनादिक्रियायोग्यमायतनं तत्प्रविशतेति।[५]

यद् भवतुनाम यथा राजाज्ञां प्राप्य सोनानां प्रवेशो नगर्यां जायते तथा परमात्माज्ञया अग्न्यादिदेवानाम् इन्द्रियरूपेण शरीरमध्ये प्रवेश: श्रूयते। वागिन्द्रियं भूत्वा अग्नि: मुखं प्राविशत्। वायु: प्राणो भूत्वा नासिके प्राविशत्। आदित्य: चक्षुरिन्द्रियं भूत्वा अक्षिणी प्राविशत्। दिश: श्रवणेन्द्रियरूपेण कर्णौ प्राविशत्। ओषधिवनस्पतयो लोमानि भूत्वा त्वचं प्राविशत्। चन्द्रमा मनो भूत्वा हृदयं प्राविशत्। मृत्यु: अपानो भूत्वा नाभिं प्राविशत्। जलं रेतो भूत्वा लिङ्गं प्राविशत्। एतान् अधिष्ठातृदेवान् विना इन्द्रियाणि स्वस्वकार्येषु व्यापृतानि न भवन्ति। गोमहिष्यादय: ये च उपकारिण: पशव: अस्माकमुपकारं कुर्वन्ति सर्वदा तेषां सृष्टि: परमात्मन: सकाशाद् भवति। परब्रह्मपदेन भगवतो बोधो जायते। एतदर्थं[६] गीतासु

भगवता उच्यते -

"बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते।
वासुदेव सर्वमिति स महात्मा सुदुर्लभः।।" इति।

अस्मात् ज्ञायते यत् पूर्वजन्मसंस्कारं विना ज्ञानादयो न भविष्यति। ज्ञानार्थं भगवतः स्मरणं कर्तव्यम्। एतदर्थं व्याकरणे एतत्सूत्रं वर्तते यत् भक्तिः ज्ञानाय कल्पते ज्ञानात् मुक्तिः। तदेव ज्ञानं भवति भगवत्प्राप्तिः। लोकानां तथा लोकपालानां रचनादनन्तरं तेषां क्षुधातृषानिवारणार्थम् अन्नपानादिकं सृष्टमीश्वरेण। अन्नं विना जीवस्य स्थितिः न सम्भवति। ईश्वरस्य अनुग्रहेण सर्वेषां स्थितिः जायते। इत्थं लोके ईश्वरानुग्रहे निग्रहे च स्वातन्त्र्यं दृश्यते। तद्वत् महेश्वरस्यापि सर्वेश्वरपदवाच्यत्वात् सर्वान्प्रति निग्रहानुग्रहे स्वातन्त्र्यमेव। अनेन ईश्वरेण जलमुद्दिश्य तपश्चकार। ताभ्यो अभितप्ताभ्य उपादानभूताभ्यो मूर्तिघनरूपं धारणार्थं समर्थभूतं चराचरलक्षणं सृष्टवान्। अन्नं वै तन्मूर्तिरूपं भवति। सर्वं सृष्ट्वा ईश्वरेण विचारितं यत् मद्विना एतत्सर्वं निष्पलं स्यात्। तर्हि मम सृष्टिः निष्फला एव। अत एव मम प्रवेशः शरीरमध्ये सुनिश्चितः स्यात्। एतत् सर्वमभिलक्ष्य परमात्मा शरीरे प्राविशत्। स स्रष्टा ईश्वरः मूर्धसीमानं विदार्य कार्यकरणसङ्घातरूपशरीरं प्राविशत्। इदमेव प्रसिद्धं द्वारं भवति। यतः शिरसि तैलधारणसमये अन्तःरसादीनामनुभवः जायते। सैषा विदृतिः विदारितत्वात् प्रसिद्धा। पुरमध्ये परमात्मनः प्रवेशः उपमायोग्यो भवति। तस्य एवं सृष्ट्वा प्रविष्टस्य जीवेनात्मना राज्ञ इव पुरत्रयम् आवसथाः। १-जाग्रत्काले इन्द्रियाणां स्थानं दक्षिणचक्षुः। २-स्वप्नकाले अन्तर्मनः। ३- सषुप्तिकाले हृदयाकाशस्याभ्यन्तरे इत्येतत्। इत्थं शरीरे प्रविष्टो जीवरूपेण उत्पद्यते। अर्थात् भूतैः साकं तादात्म्यापन्नो भवति। परन्तु स कदाचित् परमकारुणिकेनाचार्येण आत्मज्ञानेनोद्धूतः सन् वदति यत् मद्भिन्नमन्यत् किमपि नास्ति एकात्मभावः। इत्थं ब्रह्मनिष्ठस्याभयप्राप्तिं निरूप्य सर्वोत्कृष्टानन्दं निरूपयति शास्त्रम्।

---

**सन्दर्भाः सहायकग्रन्थाश्च -**

१ - ऐतरोयोपनिषद् - १ - गीताप्रेस्, गोरखपुर।
२ - श्वेताश्वेतरोपनिषद् -३.१.२२ - गीताप्रेस्, गोरखपुर।
३ - ऐतरेयोपनिषद् - २ - गीताप्रेस्, गोरखपुर।
४ - सा एव - १.४ - गीताप्रेस्, गोरखपुर।
५ - सा एव - २.३ - गीताप्रेस्, गोरखपुर।
६ - श्रीमद्भगवद्गीता - ८.२५- गीताप्रेस्, गोरखपुर।

—०—

*विद्यावारिधि (Ph.D.) शोधच्छात्रः, अद्वैतवेदान्तविभागः,*
*केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीसदाशिवपरिसरः, पुरी, ओडिशा।*
*मार्गदर्शिका- प्रो० गौरप्रियादाशः*

# शिवाजीचरितमहाकाव्यम् - एकम् अध्ययनम्

**शुभकान्तबेहेरा**

**भूमिका –**

"साहित्य-सङ्गीत-कलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः ।
तृणं न खादन्नपि जीवमानः तद्भागधेयं परमं पशूनाम् ।।" इति।

साहित्यस्य महनीयत्वमनेन श्लोकेन ज्ञायत एव यत् भर्तृहरिणा उट्टङ्कितमं नीतिशतके । यदमृतप्रदायकं भवति तत् साहित्यं काव्यमिति प्राचीनैरुद्घोष्यते । किञ्च सर्वेषां शास्त्राणां समाहारः साहित्यं काव्यमिति वा कथ्यते । अतः एकस्यैव काव्यशास्त्रस्य पठने सति सर्वेषां शास्त्राणां ज्ञानं स्वयमेव आयाति । सहृदयानां हृदयमाह्लादितं भवति । आह्लादं प्रदातुं कान्तदर्शिनः कवयः काव्यशास्त्रस्य रचनां कुर्वन्ति। अखिलेऽस्मि संस्कृतसाहित्ये काव्यम् एका अनन्ता सृष्टिरस्ति । इयमस्माकं काव्यरचनापरम्परा वेद इव अतिप्राचीना वर्तते अद्यावधि प्रचाल्यमाना चास्ति ।

संस्कृतसाहित्यकाव्यवाङ्मयं बहुविशालं वर्तते। लौकिककाव्यपरम्परेयं त्रेतायुगाद् आदिकवेः वाल्मीकितः आरभ्य जायमाना वर्तते। तत्रादौ तावत् काव्यं द्विविधं विभज्यते दृश्यश्रव्यभेदेन। दर्शनेन्द्रियग्राहं काव्यं दृश्यकाव्यम्। श्रवणेन्द्रियग्राहं काव्यं तु श्रव्यकाव्यमित्युच्यते। अनयोः द्वयोरपि बहवो भेदाः सन्ति। तस्मात् श्रव्यकाव्यं गद्यपद्यत्वेन द्विविधं विभज्यते। पद्यकाव्यं महाकाव्यं, खण्डकाव्यं, गीतिकाव्यञ्च इत्येवं प्रकारेण त्रिधा विभज्यते। "सर्गबन्धो महाकाव्यं........ " इत्यादि उक्त्वा महाकाव्यं लक्षणविषये बहु भणति साहित्यदर्पणकारः। महाकाव्यस्य लक्षणानि सर्वाणि अस्मिन् शिवाजीचरितमहाकाव्ये द्रष्टुं शक्यते।

**शिवाजीचरितमहाकाव्यस्य कविपरिचयः -**

लौकिकसंस्कृतकविषु कृष्णदत्तशर्मा अन्यतमः । अस्य महानुभावस्य जन्म १५ जुलाई १९३० तमे वर्षे उतरप्रदेशस्य हापुड.(गाजियाबाद) नामके स्थाने अभवत्। पिता श्री पं० चिरञ्जीलाल शर्मा माता च श्रीमती द्रौपदी देवी आसीत्। गुरुः श्री बालकराम जी गौडः आसीत्। असौ कविः उत्तरप्रदेशमाध्यमिकशिक्षापरिषदः सहसचिवः आसीत् । अस्य सेवानिवृत्तिः सह- जिला(मेरठ)विद्यालयनिरीक्षकपदेन जाता ।

कृतयः- एतस्य महाकवेः अनुपमकृतिषु भारतदर्शनम्, प्रतापप्रशस्तिः, कृषाण-सैनिकौ, शिवाजीचरितम् इत्यादयः अन्यतमाः । "भारतदर्शनम्", "प्रतापप्रशस्तिः" च विरचय्य उत्तरप्रदेश संस्कृत-अकादमी द्वारा अयं पुरस्कृतः आसीत् ।

**शिवाजीचरितमहाकाव्यम् -**

"शिवाजी" सदृशवीरपुरुषस्य राष्ट्रभक्तिसुधाप्रवाहकस्य चरितमधिकृत्य कृतं काव्यं सर्वथा विचारपटलतरलप्रवाहमनुमोदते। अनेन वैदेशिकजालनिगडितो भारतदेशो दृष्टः । ततः स्वयं कृपाणं करे समुत्थाप्य तथा प्रयासः कृतो यथा हि स्वातन्त्र्यलहरी समान्दोलिताऽद्य फलन्ती शोभमानाऽस्माभिः भुज्यते। अयं वीरः प्रतापी, कुशलशासकः, निपुणो व्यूहभेत्ता, चतुरो दुर्गरक्षकः काले च फलदः, कूटनीतिपटुः, मातुः सुपुत्रः प्रातःस्मरणीय आसीत् । अद्यत्वे च प्रायः सर्वेषु प्रसिद्धनगरारामेषु अश्वारूढश्मश्रुखड्गधरवीरस्य मूर्तयः अस्यैव वीरस्य द्रष्टुं शक्याः । एतादृशस्य शिवाशिब्बाशिवाजीत्यादिनामधेयस्य पराक्रमिणः गौरवं स्मरति अत्र कृष्णदत्तशर्मा कविः। महाकाव्येऽस्मिन् विंशतिसर्गाः, अष्टसप्तत्यधिकपञ्चशतश्लोकाः सन्ति । मान्यामही, पारवश्यम्, शिवराजोद्भवः, मानधनः शिवः, तोरणदुर्ग, अफ़ज़लान्तः, शास्तिखान् पराभवः, राजा जयसिंहः, मातृदर्शनम्, आग्राप्रवासः, राजपथपान्थः, सभागतः शिवः, कारागारे महावीरः, चिकित्सकः, बन्दीशिवः, परिव्राजकः, विमुक्तिः, मातृत्वम्, राज्याभिषेकः, स्वदेशश्चेति विंशतिसर्गैः सम्पन्नमिदं प्रख्यातकथानकसंयुतं महाकाव्यम् वर्तते। सन्त्यस्मिन् महाकाव्ये बहुशः मनोरमाः काव्यपुलिनभागाः ये विविधेषु रसेसु, अलङ्कारेषु तथा छन्दस्सु निबद्धा भवन्ति। तेषु कतिपयोऽत्र स्थालीपुलाकन्यायेन पाणिपरामर्शाय उदाह्रियन्ते ।

**रसः –**

रसयति इति रसः । रस्यते आस्वाद्यते अनेन इति रसः । अयं रसः काव्यस्य आत्मा इति उद्घोष्यते प्राचीनालङ्कारिकैः। विना रसं काव्यं काव्यत्वं न प्राप्नोति। अतः भरतमुनिना उक्तं –"न हि रसादृते कश्चिदर्थः प्रवर्तते" इति।

पुनः रसस्य स्वरुपं तावत् "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः।" इत्यपि तेन भणितम् । आचार्यः मम्मटः चात्र –

"कारणान्यथ कार्याणि सहकारिणि यानि च ।
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ।।
विभावानुभावस्तत्कथ्यन्ते व्यभिचारिणः।
व्यक्तः स तैर्विभावाद्यैः स्थायिभावः रसः स्मृतः ।।" इति उपस्थापयति । रसभेदाः–

"शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
बीभत्साद्भुतसंज्ञौ नाट्ये रसाः स्मृताः ।।" इति उक्तं विश्वनाथेन ।

महाकाव्येऽस्मिन् वीररसः अङ्गीरसरुपेण भवति। अन्ये करुणशान्तरौद्राद्भुतादिरसाः अङ्गरसरुपेण समाविष्टाः भवन्ति । वीररसस्यलक्षणं भेदान्यथाह विश्वनाथः -

"उत्तमप्रकृतिर्वीर उत्सीहस्थायिभावक: ।
महेन्द्रदैवतो हेमवर्णोऽयं समुदाहृत: ।।
आलम्बनविभावास्तु विजेतव्यादयो मता:।
विजेतव्यादिचेष्टाद्यास्तस्योद्दीपनरुपिण:।
अनुभावास्तु तत्र स्यु: सहायान्वेषणादय:।।
सञ्चारिणस्तु धृतिमतिगर्वस्मृतितर्करोमाञ्चा:।
स च दानधर्मयुद्धैर्दयया च समन्वितश्चतुर्धा स्यात्।" इति।

अत्र कवि: श्लोकमेकमुदाहरति यथा -

"त्वरमाणा: समुत्प्लुत्य, सुभटा: शत्रुमर्दना:
सहसा प्रकटीभूय, सर्वान्मृत्युमुखेऽनयन्।।" इति।

**अलङ्कार: –**

अलङ्क्रियते अनेन इति अलङ्कार:। यथा नारी स्वस्या: सौन्दर्यवृद्धिकरणाय हार-कटककुण्डलादीन्धारयति तथैव कवि: कविताकामिम्या: सौन्दर्यवृद्धिकरणाय पाठकानां दृष्ट्याकर्षणाय च काव्ये अनुप्रासादीनाम्अलङ्काराणां प्रयोगं करोति। अलङ्कारविहीनकाव्यं सर्वथा उपहासष्पदं भवति। यथोक्तं भामहेन स्वस्य काव्यालङ्कारे – "न कान्तमपि निर्भूषं विभाति वनिताननम्" इति। शिवाजीचरितमहाकाव्यमिदम्अनुप्रास-यमक-उपमादि विविधै: अलङ्कारै भूषितमस्ति। तत्र अष्टादशसर्गे एक: श्लोक: -

"कतिपयकलकण्ठै: कोकिलै: कृष्णवर्णै:
कुटिलकरकठोरै:, कीचकै: कुञ्चितैश्च ।
कपिकुलकृतलासै: कृष्णकाकै: कठोरै:,
दिनकरकरकमा सर्वथाऽऽसीद्वनश्री: ।।"

अस्मिन्श्लोके वृत्यनुप्रासालङ्कारस्य समन्वयं भवति। वृत्यनुप्रासालङ्कारस्य लक्षणं यथा–

"अनेकस्यैकधा साम्यमसकृद्वाप्यनेकधा ।
एकस्य सकृदप्येष वृत्यनुप्रास उच्यते ।।"

अस्मिन्श्लोके तृतीयपादे "कपिकुलकृतलासै:" इत्यत्र "क" "ल" वर्णयो: असकृत् साम्यतावशात् अत्र वृत्यनुप्रासालङ्कार: भवति ।

**छन्द: –**

काव्ये रमणीयताह्लादकतासम्पादनाय कवि: छन्दसां प्रयोगं करोति। महाकाव्येऽस्मिन्प्रतिसर्गं विविधै: छन्दोभि: सम्वलितं भवति। अत्र अनुष्टुप् इन्द्रवज्रा, उपेन्द्रवज्रा, उपजाति:, भुजङ्गप्रयातम् वसन्ततिलका, मालिनी, शार्दूलविक्रीडितं च छन्दांसि प्रयुक्तानि सन्ति ।

अन्ततः “सर्वसंरक्षणीयः स्वदेशः” इति प्रतिपादयता कविना महाकाव्यसंदेश-व्याजेन भूजङ्गप्रयातछन्दसि एव समादिष्टः श्लोकः यथा -

“सुविज्ञैः सुसभ्यैः सुविज्ञानदक्षैः सुधीरैः सुवीरैः सुदानानुरक्तैः ।
सुशीलैः सुवेद्यैः स्वधर्मानुरक्तैः स्वदेशः सदैवास्ति संरक्षणीयः।।”इति ।

भुजङ्गप्रयातछन्दसः लक्षणं यथा–“भुजङ्गप्रयातं यकारैश्चतुर्भिः” इति। यस्मिन्छन्दसि प्रतिपादं द्वादशाक्षरविशिष्टं भवति तथा प्रतिगणं यगणः भवति तच्छन्दः भुजङ्गप्रयातछन्दः इति कथ्यते ।

**उपसंहारः-**

महाकाव्येऽस्मिन् कविः कृष्णदत्तशर्मा “सर्वसंरक्षणीयः स्वदेशः” कथमिति स्पष्टरूपेण मञ्जुलतया च वर्णयति। विविधेषु रसेसु, अलङ्कारेषु छन्दस्सु च निवद्धम्-ओजगुणयुक्तं महाकाव्यमिदं शिवाजीमहाराजस्य उत्कर्षतां प्रतिपादयति। तदानीन्तन -भारत –पारवश्यं वर्णयत्वासौ कविः शिवराजमुद्भावयति। शिवस्य राज्याभिषेकञ्चान्ततः उपस्थाप्य “स्वदेशः सदैवास्ति संरक्षणीयः” इति उपदिशन्सः स्वमनोरथं काव्यसन्देशञ्च समादिशतीति ।

**सन्दर्भाः सन्दर्भग्रन्थाश्च -**

१. शिवाजीचरितमहाकाव्यम्- कृष्णदत्तशर्मा, अप्रकाशितम्
२. नितिशतकम्- जनार्दनशास्त्री पाण्डेयः,मोतीलाल बनारसीदास, दिल्ली,२०१८
३. नाट्यशास्त्रम् भरतमुनिः,काशीहिन्दुविश्वविद्यालयः,वाराणसी
४. साहित्यदर्पणः - डा. सूर्यमणिरथः, सांविदीप्रकाशनम्पुरी,ओडिशा,
५. काव्यप्रकाशः - मम्मटभट्ट, सं-पं नारायण महापात्रः, ओडिशासाहित्य एकाडेमि, भुवनेश्वर, १९९१
६. छन्दोमञ्जरी - गङ्गादासः,डा.ब्रह्मानन्दित्रिपाठी,चौखम्बा सुरभारतीप्रकाशनम् वाराणसी,२०१५

—०—

*विद्यावारिधि (Ph.D.) शोधच्छात्रः, साहित्यविभागः,*
*केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीसदाशिवपरिसरः, पुरी, ओडिशा।*

# प्रश्नवैष्णवे रोगविचार:

**सौम्यरञ्जनकर:**

ग्रहाणां कालावस्थागत्यादिनिर्देशेन लौकिकवैदिककर्मसम्पादननिमित्तकमुहूर्त्तादिकथनेन, जन्मकालवर्षप्रवेशकालप्रश्नकालाद्यनुरोधेन प्राणिनां शुभाशुभफलकथनेन ग्रहनक्षत्रादियोगायोगेन जागतिकशुभाशुभफलोद्घोषेण चेदं ज्योतिषशास्त्रं प्रत्यक्षमेवोपकरोति। एवं जनोपकारकाशास्त्रेऽस्मिन् सामुद्रिक-ताजिक-मुहूर्त्त-होरा-वास्तु-रमल-शकुन-प्रश्नादय: सन्त्यनेके विभागा: ये सर्वेऽपि जनोपयोगिन एव । तत्रापि ज्योतिषे प्रश्नविद्या नैकं पृथगेव महत्त्वं भजते । प्रश्नशास्त्रं हि होराशास्त्रस्यापरमङ्गम् । प्रश्नलग्नमाधारीकृत्य फलादेशकशास्त्रमेव प्रश्नशास्त्रमित्युच्यते । अर्थात् प्रष्टु: तात्कालिकप्रश्नसमयानुसारं प्रश्नलग्नमाधारीकृत्य दैवज्ञ: शुभाशुभफलं निर्दिशति । अत्र इष्टदेवफलपुष्पादीनां नाम वक्तुं दैवज्ञ: प्रश्नकर्त्तारं पृच्छति । अथानयो: प्रश्नोत्तरयो: माध्यमं प्रश्नशास्त्रम् । शोधपत्रेऽस्मिन् मया प्रश्नवैष्णवदृष्ट्या रोगविचार: प्रस्तूयते। प्रष्टा रोगविमुक्तिविषये यदा पृच्छति तदा तस्य उत्तरं प्रयच्छन् श्रीमन्नारायणदास: स्वग्रन्थे “प्रश्नवैष्णवे” उक्तम्–

‘‘प्रष्टा यदा रोगविमुक्तिप्रश्न: कुर्यात्तदानीमवलोकनीयम् ।

लग्नेश्वरच्छिद्रपतीत्थशालंकृद् रन्ध्रे च चन्द्रेण युतो मृतिप्रद: ।। ”(प्रश्नवै. १/२०)।

अर्थात् यदा प्रष्टा रोगविमुक्तिप्रश्नं कुर्यात्तदा प्रश्नकुण्डल्या: लग्नेशं पश्येत् । यदि लग्नेश: अष्टमेशस्य इत्थशालयोगकर्ता स्यात्तदा अथवा चन्द्रेण युत: लग्नेश: अष्टमभावे स्यात्तदा रोगी मृत्युं प्राप्नोति । अत्र ताजिकग्रन्थानुसारम् इत्थशालयोग: द्रष्टव्य: । यथा ययो: वा ग्रहयोर्मध्ये अयं योग: विचार्यते । तयोर्मध्ये यस्य तीव्रा गति: भवेत् स यदि पृष्ठस्थ: स्यात्तथा यस्य स्वल्पगति: स यदि पृष्ठवर्तिग्रहस्य दीप्तांशान्तर्गत: अग्रस्थ: स्यात्तदा इत्थशालयोग: मुथशीलयोगो वा भवति। एवं परिस्थितौ शीघ्रगतिग्रह: मन्दगतिग्रहोपरि निजं तेज: ददाति तेन कारणेन इत्थशालयोग: भवति ।

"लग्नस्थितं शीतकरं प्रपश्येत्पापो नभस्थो मदनस्थितो वा ।

प्रष्टुस्तदा स्थानसुखार्थनाशो रोगोऽथवा मृत्युभयादिघातः ।।"(प्रश्नवै. १/२१)।

अर्थात् यदि प्रश्नलग्नकुण्डल्याः दशमे सप्तमे वा स्थितः पापग्रहः लग्नस्थं चन्द्रं प्रपश्येत्तदा प्रष्टुः स्थानस्य सुखस्य धनस्य च नाशः, तथा शस्त्रघातेन मृत्युभयं भवति । अत्र ताजिकशास्त्रानुसारं गुप्तवैरप्रत्यक्षवैरदृष्टिः द्रष्टव्या । तद्यथा यस्य ग्रहस्य दृष्टिः विचार्यते तस्माद् ग्रहात् चतुर्थे तथा दशमे स्थाने गुप्तवैरी दृष्टिः भवति । एषा गुप्तवैरी दृष्टिः पञ्चदशकलात्मिका भवति । एवं ग्रहात् सप्तमे तथा एकभवने अर्थात् ग्रहाधिष्ठितराशौ परस्परं प्रत्यक्षवैरी दृष्टिः भवति । एषा दृष्टिः सम्पूर्णा अर्थात् षष्टिकलात्मिका भवति ।

"क्रूरे विलग्ने न गुणास्तु वैद्यात् न चौषधे रोगमुपैति वृद्धिम् ।

सौम्यग्रहैः लग्नगतैः बलाढ्यैः वैद्यौषधाभ्यां गदवान् सुखी स्यात् ।।"(प्रश्नवै.९/७)।

अर्थाद् यदि कश्चित् प्रष्टा तस्य भ्रातुः शरीरस्वास्थ्यं पृच्छेत्तदा प्रश्नकुण्डलीलक्षणेन यदि लग्ने क्रूरग्रहाः स्युः तदा औषधसेवनेन रोगशमनं न भवति अपि तु अनुदिनं रोगवृद्धिः जायते । यदि लग्ने बलयुक्ताः शुभग्रहाः स्युः तदा औषधोपचारेण रोगशमनं सुखप्राप्तिः च भवति । पुनरपि उच्यते–

"पापैः स्मरस्थैर्भिषगौषधाभ्यां रोगात्कुरोगी भवति हवतीव ।

सौम्यैः मदस्थैः भिषगौषधैस्तु सुपथ्यसेवी गदवान् सुखी स्यात् ।।" (प्रश्नवै.९/८)।

यदि सप्तमभावे पापग्रहाः स्युः तदा औषधसेवनेन जातकः रोगान्मुक्तिं न लब्ध्वा अधिकरोगी भवति । यदि सप्तमभावे शुभग्रहाः स्युः अथवा तत्र शुभग्रहाणां दृष्टिः स्यात्तदा पथ्यपालनेन औषधसेवनेन च शीघ्रं रोगान्मुक्तिं प्राप्नोति जातकः । पुनरपि कथ्यते–

"पापैर्नभस्थैः गदवान् स्वबुद्ध्या कुपथ्यभक्षाद् गदमेति वृद्धिम् ।

सौम्यैः ग्रहैः कर्मगतैः सुपथ्याद् वैद्यौषधीभिः सुखमेति रोगी ।।" (प्रश्नवै.९/९)।

यदि दशमभावे क्रूरग्रहाः स्युः अथवा तत्र क्रूरग्रहाणां दृष्टिः स्यात्तदा रोगी कुबुद्ध्या अपथ्यपालनेन रोगवृद्धिं कारयति । परन्तु यदि दशमभावे शुभग्रहाणां दृष्टिः युतिः वा स्यात्तदा औषधसेवनेन सुपथ्यपालनेन च रोगस्य शमनं भवति ।

अत्र रोगविचारे विशेषः यत् प्रश्नलग्नं चिकित्सकः एवं दशमभावः रोगी इति प्रतीतिः भवति । तत्र षष्ठभावात् सप्तमभावाच्च रोगविचारः क्रियते । चुतर्थभावात् औषधोपचारः पथ्यविचारश्च क्रियते । अनेन ज्ञायते यत् यदि लग्नं पापग्रस्तं स्यात्तदा

चिकित्सक: दुष्ट: भवति । यदि दशमभाव: पापग्रस्त: स्यात्तदा रोगी दुष्ट: भवेत् । यदि सप्तमभाव: पापयुक्त: स्यात्तदा असाध्यदुष्टरोग: भवति । यदि चतुर्थभाव: पापयुक्त: स्यात्तदा औषधं हानिकरं भवति । एवं शुभप्रभावेण शुभफलमादिशेत्।

"सौम्यग्रहेणाथ विलग्नपेन यदीत्थशाड्कुरुते शशाङ्क: ।

केन्द्रस्थित: सौम्ययुतेक्षित: स्यान्निहन्ति रोगं सुखमाशु कुर्यात् ।।" (प्रश्नवै.९/१०)।

यदि कश्चित् केन्द्रे स्थित: लग्नेश: चन्द्रो वा सौम्यग्रहेण युतेक्षित: स्यात्तदा शुद्धिशालयोगेन युत: जातक: रोगान्मुक्तिं प्राप्नोति ।

"केन्द्रे शशाङ्केऽथ विलग्ननाथे सौम्यैर्ग्रहैर्दृष्टयुतेन पापै: ।

वक्रास्तरन्ध्रेश दिनेशवर्ज्यो हन्याद्गदाङ्गदयुते सुखमासु कुर्यात् ।।" (प्रश्नवै.९/११)।

यदि केन्द्रे (१,४,७,१०) चन्द्र: लग्नेशो वा स्यात्त्र तौ पापग्रहै: अदृष्ट: शुभग्रहै: युत: दृष्टो वा-

"चरोदये वा द्वितनूदये वा, शीतांशुलग्ने शुभवीक्षिते वा ।

स्वराशिसंस्थे गगनेऽथ चन्द्रे बन्धुस्थितो वापि गदक्षय: स्यात् ।।" (प्रश्नवै.९/१२)।

अर्थात् अथ रोगिप्रश्न: –

"रोगिप्रश्ने रोगग्रहं सप्तमं गृहमुच्यते ।
शुभे तत्र शुभं वाच्यमशुभे त्वशुभं वदेत् ।।
अतीसारोऽष्टमे चन्द्रे भार्गवे च निगद्यते ।
प्रत्यहं बलहानिश्च शुक्रयुक्तेऽष्टमे कुजे ।।
रक्तपीडा पित्तपीडा सूर्ये भूमिसुतेऽष्टमे ।
क्रूरयुक्ते बुधे तत्र सन्निपातो निगद्यते ।।
अष्टमस्थे राहुमन्दौ वातरोगप्रदायकौ ।
अष्टमस्थे यदा केतुरग्निपीडा च जायते ।।" (प्रश्नवै.१२/१९-२२)।

रोगिप्रश्ने रोगस्य विचार: सप्तमभावात् क्रियते । यदि सप्तमभावे शुभग्रह: स्यात्तर्हि शुभफलं, क्रूरग्रह: स्यात्तर्हि अशुभफलम् । यदि कुण्डल्यामष्टमभावे चन्द्र: अथवा शुक्र: स्यात्तदा रोगी दुर्बल: भवति । यदि अष्टमस्थशुक्रै: सह मङ्गल: भवति चेत् रोगि प्रतिदिनं दुर्बलं भवति । यदि अष्टमे सूर्य: अथवा मङ्गल: भवति तर्हि रक्तपित्तपीडा भवति । यदि क्रूरयुक्त: बुध: स्यात्तदा सन्निपात: भवति। यदि अष्टमे राहु: अथवा मन्द:

स्यात्तदा वातरोगकारक: भवति । केतु: अस्ति चेत् पित्तजनितरोग: भवति । अथ रोगार्तस्य परदेशस्थितिज्ञानमाह–

"मन्दं पापसमेतो लग्नान्नवमे शुभैरयुतदृष्टः ।

रोगार्त : परदेशी चाऽष्टमगो मृत्युकर एव ।।"(षट्पञ्चाशिका- ७/११)।

मन्दः सौरः स च पापसमेतो रविभौमक्षीणचन्द्राणामन्यतमेन युक्तस्तथाभूतो लग्नात्पृच्छालग्नान्नवमे स्थाने स्थितस्तत्र च शुभैरयुतदृष्टः तत्र च शुभग्रहाणामन्यतमेन न युक्तो नाप्यवलोकितस्तदा रोगार्तः रोगो ज्वरदिस्तेनार्तः पीडितः परदेशेऽस्मिन् ग्रामादौ स्थितः । तथा अनेनैव लक्षणेन युक्तः सौरो लग्नादष्टमे स्थाने गते समवस्थितस्तदा तस्यैव रोगार्तस्य मरणं करोति ।

---

**सन्दर्भसहायकग्रन्थौ** -


१. प्रश्नवैष्णवशास्त्रम्, श्रीसिद्धनारायणदासविरचितम्, खेमराजश्रीकृष्णदासमुद्रणालयप्रकाशितम्, मुम्बई - 1987AD.

२. षट्पञ्चाशिका, दैवज्ञपृथुयशोविरचिता, चौखम्बासंस्कृतसंस्थानवाराणसीप्रकाशिता - 2009 AD.


—०—


*विद्यावारिधि (Ph.D.) शोधच्छात्रः, ज्योतिषविभागः*

*केन्द्रीयसंस्कृतविश्वविद्यालयः, भोपालपरिसरः (म.प्र.)*

*मार्गदर्शकः - प्रो० भारतभूषणमिश्रः*

# द्विताया-तृतीया-सप्तमीनामाश्रयार्थविचार:

चन्दन शतपथी

**भूमिका-**

व्याकरणशास्त्रं सर्वशास्त्रोपकारकत्वेन अधिविद्यं प्रकाशते। व्याकरणं विना शास्त्रस्य साधुता सम्भवपरं नैव भवति तथोक्तं साधुत्वज्ञानविषया सैषा व्याकरणस्मृति:[१]। तत्र कारकप्रकरणम् व्याकरणस्य अन्यतम: विषय:।कारकस्य लक्षणविषये भट्टोजि दीक्षित: वदति तस्य प्रौढमनोरमायां कारकम् इत्यस्य क्रियान्वयि इत्यर्थ[२]। अत्र महाभाष्यम्- कारकमिति अन्वर्थ इयं संज्ञा करोति क्रियां निवर्तयतीति कारकम्[३]। साधकं निर्वर्तकं कारकसंज्ञं भवतीति। सर्वाणि हि कारकाणि साधकानि। अन्ये नागेशादय: आचार्या: क्रियाजनकत्वं कारकत्व[४] लक्षणं निरुपयति। अस्मिन् प्रबन्धे द्वितीयातृतीयासप्तमीनाम् आश्रयार्थस्य निरूपणं वर्तते।

**द्वितीयाविभक्तेराश्रयार्थ:-**

यतो द्वितीया-तृतीय-सप्तमीनाम् आश्रयोऽर्थ:। अपादानस्यावधी: सम्प्रदानस्योद्देश्य शेषषष्ठ्या:सम्बन्धार्थेति सुपां कर्मादयोप्यर्था संख्या चैव तथा तिङाम्।इयं महाभाष्यकारिका प्रमाणत्वेन स्वीकर्तुं शक्यते। किञ्च कर्मणि द्वितीया[५] इदंसूत्रं द्वितीयाया: आश्रयार्थत्वे मानम्।यतो हि कर्तृवृत्तिव्यापारप्रयोज्यफलाश्रय: कर्म[६]।। अत्र आश्रयत्वञ्च किञ्चित् धर्म अनवच्छिन्नाश्रयतावान् इत्यर्थ:। अत्र प्राचीननैयायिका: संयोगादि फलं द्वितीयाविभक्त्यर्थ:[७] हि क्रियाजन्यफलाश्रयकर्म इत्यत्र क्रियाजन्य फलस्य य: आश्रय: तस्यैव कर्मसंज्ञा साधुरिति। परञ्च द्वितीयार्थ:विषये नव्यनैयायिकानां भिन्नं मतम्। तेषां मते धात्वर्थ:फलव्यापारश्च।अत: द्वितीयार्थ: आधेयतामात्रम्। अत: प्रकृत्यर्थकर्मणि फलनिष्ठाधेयत्वान्वयिनि वक्तुं तात्पर्ये तदुत्तरं द्वितीया। आश्रयताया: निरूपकरूपेण फलंव्यापारश्च कर्त्तु:कर्मादीनां दर्शनं भवति अत: निरूपकस्य अनेकत्वात् आश्रयत्वस्यापि अनेकतापत्ति: भविष्यति एवञ्च तत्र शक्तेरपि अनेकत्वं स्यात् तदा आश्रयत्वस्य शक्यतावच्छेदकरूपेण व्यावहारमपि भवितुम् न शक्ष्यति। अनुगतो एक: धर्मो हि शक्यतावच्छेदक:[८] । यतो हि नियम: अस्ति आश्रयत्वञ्चाखण्डशक्ति रूपमवच्छेदकम् । अस्याक्षेपस्य समाधानाय आश्रयत्वस्य

अखण्डोपाधित्वं साधने युक्तिं दर्शयति आश्रयत्वम् अखण्डशक्त्या अखण्डोपाधिरूपेण अवच्छेदकं भवति अर्थात् फलाश्रयत्वं व्यापाराश्रयत्वं रूपेण । यत्र फलव्यापारश्च अन्यपदार्थे मिश्रितरूपेण आश्रयत्वं भवति तदा सखण्डोपाधि: भवति । यथा अनेकेषु घटेषु विद्यमानं घटत्वं यथा एकत्वधर्मयुक्त:तथैव अनेकेषु आश्रयेषु विद्यमानम् आश्रयत्वं तथैव एक:। वैयाकरणानां मते फलंव्यापारश्च धात्वर्थ:[९]। तत्र फलाश्रयस्यैव कर्मसंज्ञा भवति अत:ओदनं पचति अस्मिन् वाक्ये विक्लितिरूपं फलस्य आश्रयत्वात् ओदनस्य कर्मसंज्ञा भवति । अत्र कर्तृवृत्तिव्यापारजन्यफलाश्रयत्वं कर्मत्वम् नैयायिकानामाक्षेप:-इदं लक्षणं दोषाय भवतीति नैयायिकादीनां मतम् यथा-

प्रथमत:-चैत्र: ग्रामं गच्छति इत्यत्र क्रियाजन्यसंयोगफलाश्रय: यथा ग्राम: तथा चैत्रोऽपि भवतिअत:तस्यापि कर्मसंज्ञा भवितव्या इत्येषा जिज्ञासा ।

द्वितीयत:- चैत्र: प्रयागात् काशीं गच्छति इत्यत्र चैत्रस्य व्यापारात् उत्तरदेशसंयोगानुकूल व्यापार: अपरश्च पूर्वदेशविभागानुकूलव्यापार: नाम फलद्वयं लभ्यते ।अत: संयोगरूपफलाश्रयत्वात् यथा काशीम् इत्यस्य कर्मसंज्ञा भवति तथैव प्रयागस्यापि विभागानुकूलफलाश्रयत्वात् कर्मसंज्ञा उचितमित्याक्षेप:।। आक्षेपस्य वैयाकरणमते समाधानम्-

अस्य समाधानार्थं वक्तव्यं यत् तत्तु सर्वथा असमीचिनं यत् चैत्रे कर्मसंज्ञा एवञ्च द्वितीयापत्ति: ।अत्र कर्तृसंज्ञया कर्मसंज्ञाया: वाध: भविष्यति अत: चैत्रस्य कर्मतापत्ति:नैव सम्भविष्यति।। किञ्च द्वितीयाया: उत्पत्तौ सर्वदैव कर्मसंज्ञा हि कारणम्। यदि कर्मसंज्ञाया:नियामकत्वं न स्वीकृत्य फलाश्रयमात्रस्यैव कर्मसंज्ञा स्वीकृयते चेत् गमयति कृष्णं गोकुलं वासुदेव:इत्यत्र संयोगानुक लव्यापाररूपफलस्य आश्रयत्वात् कृष्णस्य यथा कर्मसंज्ञा तथैव पाचयति गोप: कृष्णेन ओदनम् इत्यत्र प्रयोज्यकर्त्ता कृष्णस्यापि कर्मसंज्ञापत्ति: भवति।। अत: यदि द्वितीयाविभक्ते: उत्पत्तौ कर्मसंज्ञा एव कारणं स्वीकृयते चेत् गतिवुद्धि . . .[१०] सूत्रेण गमि इत्यस्य व्यापाराश्रयस्य कर्मसंज्ञा भवति पचि इत्यस्य व्यापाराश्रयस्य न। तदा कृष्णस्य द्वितीयाविभक्तेरागमस्य सम्भावना एव न समुदेति । चैत्र: ग्रामं गच्छति इत्यत्र चैत्रस्य कर्मसंज्ञावारणार्थमिदं कार्यकारणभावस्य कल्पनमोचितमिति यथा-प्रकारतासम्बन्धेन धात्वर्थफलविशेष्यकवोधं प्रति धात्वर्थव्यापारानधिकरणाऽऽश्रयोपस्थिति:हेतु:। अत्र चैत्र: व्यापाराधिकरणत्वात् कर्मसंज्ञा तस्य न भवति ।

प्रयागात् काशीं गच्छति इत्यत्र विभागरूपफलाश्रयस्य प्रयागस्य कर्मसंज्ञाया: प्राप्ति: एव न सम्भवति यतो हि गम् धात्वर्थजन्यफलाश्रयत्वात् काशीम् इत्यस्य कर्मसंज्ञा गम् धात्वर्थ: विभागस्य विवरणं न दत्वा संयोगस्य विवरणं ददाति अत: काशीं इत्यस्य कर्मसंज्ञा गम् धात्वर्थतावच्छेदकत्वात् भवति । परन्तु तार्किका: चैत्र: प्रयागत: काशीं गच्छति इत्यत्र चैत्रप्रयागयो: कर्मसंज्ञावारणार्थं तत्र परसमवेतत्वं एवञ्च धात्वर्थतावच्छेदक: इत्यनयो: शब्दयोजनं करोति तदा लक्षणस्वरूपं भवति परसमवेतक्रियाजन्यधात्वर्थ-तावच्छेदकफलशाली त्वं कर्मत्वम्।। परन्तु तत् गौरवादिदोषग्रस्तत्वात् वैयाकरणेषु समादरं लब्धुं न प्रभवति।

इदानीं कर्मण: भेदा:निरूप्यते -

1.निर्वत्यकर्म 2.विकार्यकर्म 3.प्राप्यकर्म 4.उदासीनकर्म. द्वेष्यकर्म .संज्ञान्तरैरनाख्यातं कर्म□.अन्यपूर्वकं कर्म १।[११]

अत:परिशेषे वक्तव्यं यत् वैयाकरणसम्मतेयं परिभाषा-कर्तृवृत्तिव्यापारप्रयोज्य प्रकृतधात्वर्थफलाश्रयत्वं कर्मत्वम्। गौरवादिदोषरहित:सन् कर्मण:आश्रयार्थतां प्रतिपादयति।। तृतीयाविभक्तेराश्रयार्थ: कर्तृकरणयोस्तृतीया[१२] इति सूत्रं तृतीयाविभक्ते: आश्रयार्थत्वे मानम्। तेन कतृवाचकशब्दात् आगताया: तृतीयाविभर्क्ते: आश्रयार्थस्य प्रतिपादनं करोति । करणे तृतीयाविभक्ति: भवति यत्र आश्रयार्थ: व्यापारर्थश्चेति नाम वाच्यार्थद्वयमस्ति । करणसंज्ञा साधकतमं करणम् सूत्रेण भवति। तमप् प्रत्यय:-प्रकर्षार्थपरक:। करणमपि कारकमेव स च अव्यधानेन फलजनकव्यापारवत्ता तादृशव्यापारवत्कारणञ्च करणम्। उक्तञ्च वाक्यपदीये क्रियाया:परिनिष्पत्तिर्यद्व्या-पारादनन्तरम्।विवक्षते यदा यत्र करणं तत् तदा स्मृतम्।। अत: पाकक्रियावाचक: पचति इत्यस्य स्थाली कदापि कर्त्ता भवति क्वचित् अग्नेरपि कर्त्तृत्वम् आयाति अन्यच्च कुत्रापि एधांसि कर्त्तृत्वं प्राप्नोति। किम् अन्यत् तण्डुलमपि स्वयमेव कर्त्ता भवति। यथा स्थाली पचति अग्नि: पचति एधांसि पचन्ति तण्डल: पच्यते स्वयमेव इति।अथेदं तात्पर्यं यत् व्यापारन्तु सर्वे कारका: कुर्वन्ति अत: पाक:भवति परन्तु यदा यदीय व्यापार: धातुनाऽभिधीयते तदा स: कर्त्ता भवति । अत: विवक्षाधीनानि कारकाणि भवन्ति परन्तु यदि यदा यदीय व्यापारो धातुनाऽभिधीयते तदा स कर्त्ता चेत् भगवान् व्यासेन कर्मण: कर्तृत्वभवने यत् विरोधं कृतं तद् व्यर्थं भविष्यति।अयमाशय: कर्तृकर्मव्यपदेशाच्च सूत्रे मनोमय: प्राणशरीरं वाक्यात् मनोमय: इत्यस्मात् शब्दात् संकेतितं ब्रह्मभिन्नसङ्कल्पकर्त्तु:रूपेण

जीवत्वे वाक्यशेषे तस्य एतमितः प्रत्याभिसम्भविताऽस्मि इति प्राप्तिकर्मत्वकर्तृत्वव्यपदेशो विरुद्ध इति भगवता व्यासेन निर्णीतं कथं सङ्गच्छताम् इत्याशङ्का अत्र समाधानं च यत् एकस्मिन्नेव जीवे कर्तृत्वकर्मत्वस्य व्यपदेशः नैव भवति इत्यभिप्रायः शाङ्करभाष्ये नास्ति क्वचित्।परञ्च तत्र एकस्यैकदा संज्ञाद्वयं न युक्तम् इत्येवम् अभिप्रायः आकडारादेकासंज्ञा सूत्रेऽपि कडारा कर्मधारये सूत्रात् पूर्वेषां सूत्राणाम् एका एव संज्ञा विधीयते। कर्तृकर्मसंज्ञा आकडारीय एव अतः अनयोरेकत्रावस्थानमेकदा एकस्मिन् जीवे कथं सम्भवति। यदि जीवे ज्ञेयत्वं स्वीकृयते चेत् तत्र प्राप्तिकर्मता आगमिष्यति पुनः भू धातोः उत्तरं मि प्रत्ययस्य सत्वात् ततःजीवे कर्तृत्वमपि आगच्छति।एकस्मिनेकदा संज्ञाद्वयं नैव उचितम्। यदि एकदा एव संज्ञाद्वयम् प्राप्नोति चेत् कर्त्तृसंज्ञया कर्मसंज्ञायाःबाधः भवति। अतः एतम् इत्यस्मिन् शब्दे द्वितीयाविभक्तिरागमनमपि नैव भवितुं शक्नोति। यदि कर्मणः कर्त्तृत्वं स्वीकार्य्य कर्मकर्त्तृरूपेण स्थाप्यते चेत् तत्रापि प्राप्यकर्मत्वात् आत्मनेपदं एवञ्च यगापत्तिः स्यात् अतः जीवब्रह्मणोः अभेदसत्वेऽपि मि इत्याख्यातपदेन बक्षमाणो जीवःभिन्नः अन्यच्च प्राप्तिकर्मरुपेण एतम् शब्दघटकपरमात्मा भिन्नम् इत्येव अभिप्रायः सूत्रस्येतस्य ब्रह्मसूत्रस्य। अतः धातोः व्यापारांशस्य लाभात् आश्रय एव हि तृतीयाविभक्त्यर्थः। धातोः प्रधानव्यापारार्थस्य यः आश्रयः सः शुद्धकर्ता यथा- मया हरिः सेव्यते मदभिन्नाश्रयको हरिकर्मकसेवनानूकुलो व्यापारः। णिजन्तप्रेरणार्थकस्य आश्रयकर्त्ता प्रयोजकहेतुकर्त्ता। यथा कार्यते हरिणा हर्य्यभिन्नाश्रयक उत्पादनानुकूलो व्यापारः। यस्मिन् कर्मणि कर्त्तुः लक्षणं मिलति स कर्मकर्ता यथा- गमयति कृष्णं गोकुलम् गोकुलकर्मकगमनानुकूल-कृष्णाश्रयकतादृश व्यापारानुकूलो व्यापार इति शाब्दवोधः।

**सप्तमीविभक्तेराश्रयार्थः**

सप्तमीविभक्तेराश्रयार्थः यतो हि सप्तम्यधिकरणे च सूत्रम् अधिकरणे सप्तमीविभक्तेः विधानं करोति। एतत्तु आधारोऽधिकरणम् सूत्रेण आधारः एव भवति। आधारे विद्यमानधर्मः आधारत्व एवञ्च कर्त्ता-कर्मद्वारा क्रियाधारस्य अधिकरणसंज्ञात्वात् क्रियायाःप्राप्तिःधातोः लभ्यते। अतः आश्रय एव अवशिष्यते स च सप्तम्यर्थः आश्रयत्वञ्च शक्यतावच्छेकम् इति सिद्धम्। उपसंहारः-

1.कर्त्तुरीप्सिततमं कर्म इत्यनेन कर्तृसम्बन्धिप्राप्तिरिच्छावेशेषस्यैव कर्मत्वं प्रतिपाद्यते चेत् तथायुक्तं चानीप्सितम् सूत्रात् यच्च इच्छोद्देश्यं नास्ति तस्य कर्मसंज्ञा नैव प्राप्नोति अतः कर्तृवृत्तिव्यापारप्रयोज्यफलाश्रयत्वं कर्मत्वम् इदं लक्षणं कर्त्तव्यम्।

2. धात्वर्थ: फलव्यापारश्च । अत: ओदनं पचति अत्र विक्लितिफलाश्रयत्वात् ओदनस्यकर्मसंज्ञा तथा च कृ धातोरर्थ: उत्पत्यनुकूलव्यापार: अत: उत्पत्यनुकूल-व्यापारजन्यफलाश्रयत्वात् घटं करोति अत्र घटस्य कर्मत्वम्। घटं जानाति इत्यत्र आवरणभङ्गरूपफलाश्रयत्वात् घटस्यक्रियाजन्यफलाश्रयत्वम् कर्मत्वम्। अत्र वाक्यपदीयानुसारेण कर्मण: भेदसप्तकं निरूप्तते ।

निर्वत्यञ्च विकार्यञ्च प्राप्यञ्चेति त्रिधामतम् ।
तच्चेप्सिततमं कर्म चतुर्धाऽन्यत्तु कल्पितम् ।।
औदासिन्येन यत्प्राप्यं यच्च कर्त्तुरनीप्सितम् ।
संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम् ।।
सदसज्जायते सद्वा जन्मना यत् प्रकाशते ।
तन्निर्वत्यं विकार्यं तु द्वेधा कर्मव्यवस्थितम् ।।
प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठादिभस्मवत् ।
किञ्चित् गुणान्तरोत्पत्या सुवर्णादिविकारवत् ।।
क्रियाकृतविशेषाणां सिद्धिर्यत्र न विद्यते ।
दर्शनादनुमानाद्वा तत् प्राप्यमिति कथ्यते ।।

4. यदि कर्त्ता-कर्म-करणादि संज्ञा स्वस्य स्वस्य वाधक: न भवेत् चेत् तत्र आधारसंज्ञां प्राप्स्यति। यतो हि कारके सूत्राधिकारे कर्त्ताकर्मकरणादिसंज्ञा तिष्ठति। करोति कर्त्तृकर्मव्यपदेशानिति कारकम्। कर्त्ताकर्मादीनां व्यपदेशं क्रियया एव सम्भवति अत: क्रिया एव कारकार्थ:। एवञ्च सप्तम्या:आश्रयार्थ:। अत: कारके अर्थात् क्रियाश्रय: एव कर्त्तृकर्मादि संज्ञां प्राप्नोति परन्तु अधिकरणकारके कर्तृकर्मद्वारातदाश्रयत्वमस्त्वेव। न चात्र शाङ्कर्यं निरूपकभिन्नत्वात् निरूपिताधारस्यापि भिन्नता आयाति । यथा फलनिरूपिताधारस्य द्वितीयार्थ: व्यापारनिरूपिताधारस्य तृतीयार्थ: तथा च कर्तृकर्मणो: क्रमेण व्यापार-फल निरूपिताधारस्य सप्तम्यर्थ: इति शम्।।

**सन्दर्भा:**

१. वाक्यपदीयम्
२. प्रौढमनोरमा
३. महाभाष्यम्

४. लघुशब्देन्दुशेखर

५. पाणिनिसूत्रम्-२.३.२

६.लघुशब्देन्दुशेखर भैरब टीका

७.भूषणसार, चन्द्रिका ;टीका

८.भूषणसार, चन्द्रिका ;टीका

९.पाणिनिसूत्रम्-१.४.५२

१०.वाक्यपदीयम्

११.पाणिनिसूत्रम्-२.३.१८

**सन्दर्भग्रन्थसूची-**

१. विभक्त्यर्थनिर्णय: चौखम्वा प्रकाशनम्

२. वैयाकरणभूषणसार:-चौखम्वा प्रकाशनम्

३. अष्ठाध्यायी- कृष्णदास आकादेमी

४. तर्कसंग्रह- न्यायबोधिनी व्याख्या

५. व्युत्पत्तिवाद:- आदर्शव्याख्या

६. अर्थसंग्रह: -लौगाक्षिभासकर:

७. व्याकरणमहाभाष्यम्- चारुदेव शास्त्री

८. ब्रह्मसूत्रम् -गीताप्रेस:

९. सिद्धान्तकौमुदी -भट्टोजिदीक्षित श्रीनिवासमुखोल्लासिनी

—०—

*विद्यावारिधि (Ph.D.) शोधच्छात्र:, नव्यव्याकरणविभाग:,*
*केन्द्रीयसंस्कृतविश्वविद्यालय:, श्रीसदाशिवपरिसर:, पुरी, ओडिशा।*
*मार्गदर्शक: प्रो०हरेकृष्णमहापात्र:*

IMPACT FACTOR : 2.995 PRACI SUDHA ISSN 2249 - 2313
A NATIONAL PEER REVIEWED HALF-YEARLY SANSKRIT RESEARCH JOURNAL

# DECLARATION

| | |
|---|---|
| Name of the Jounal | PRACI SUDHA |
| Language | Sanskrit |
| Period of Publication | Half-Yearly |
| Time of Publication | March(October - March)<br>September (April - September) |
| Name of the Publisher | Prof. Biswanath Swain |
| Address | General Secretary,<br>Purusottam Research Academy<br>of Indology, Puri, Odisha<br>Email : biswanathpuri1958@gmail.com<br>pracisudha2013@gmail.com |
| Name of the Printer | Prof. Biswanath Swain |
| Nationality | Indian |
| Owner | Prof. Biswanath Swain, General Secretary,<br>Purusottam Research Academy of Indology,<br>Sarvodaya Nagar, Puri - 752002, Odisha |
| Name of the Editor | Prof. Biswanath Swain, (Retd.Principal)<br>General Secretary, Purusottam<br>Research Academy of Indology,<br>Sarvodaya Nagar, Puri - 752002, Odisha<br>Mob.: +91 9438134700<br>Email : biswanathpuri1958@gmail.com<br>pracisudha2013@gmail.com |
| Nationality | Indian |
| Printing Press | Sri Narayan Press, Bali Sahi, Puri-752001 |
| Annual Subscription | Rs. 100/- |
| Price of the each issue | Rs. 50/- |

The above particulars are true to the best of my knowledge and belief.

**Dt - 30.09.2020** **Sd - Biswanath Swain**

# संस्कृतसाहित्य नारीविमर्श:

डा. युगलकुमारदास:

भारतीयसंस्कृतौ नारीणां स्थानं वसुन्धरेन सवात्कर्षण वर्त्तते । इयं नारी नृ + अञ् + ङीप् प्रत्ययेन सिद्ध्यति । अस्य शब्दस्य पर्यायशब्दा: वहव: शन्त्यत्ममरकोषाज्ज्ञायते । यथा -

स्त्रीयोषिदबला योषा नारी सीनन्तिनी वधु: ।
प्रतीपदर्शिनी वामा वनिता गहिला तथा ।।

एतेषु पर्यायवाचिशब्देषु महिलेति एक: शब्दो वर्त्तते अस्यार्थ: भवति महति मह्यते वा मह् पूजायमिन्यनेन इलच् प्रत्ययेन महिलाशब्द: निष्पद्यते । अत: सा सर्वदा पूजनीया वन्दनीया वा सर्वै: । पुरुषेण सह अस्या: सम्बन्ध: शब्दार्थौ इवेति कालिदास पचनाजज्ञायते -

वागर्थाविवसंपृक्तौ वागर्थप्रतिपत्तये ।
जगत: पितरौ वन्दे पार्वतीपरमेश्वरौ ।।

इयं शक्तिस्वरूपिणी नारी दुर्गा, सरस्वती, लक्ष्मीत्यादि नाम्ना पूज्यतेऽस्मिन् संसारे श्रद्धया भक्त्या च । अनेन संसारस्य कल्याणं भवति । श्रीदुर्गासप्तसत्यां श्रीमहाकाली, महालक्ष्मी, महासरस्वती, श्रीदुर्गेतिनाम्ना नारीशक्ति: विविधरुपेण वर्ण्यते । मनुस्मृतावपि कथ्यते-

"स्त्रिय: श्रियश्च गेहेषु न विशेशेऽस्ति कश्चन" असीत् स्त्री शतीश्चेति द्वयोर्मध्ये नास्ति कश्चन भेद: । स्व स्व विवाहार्थं स्वयम्बरसभायां पतिवरणं स्वेच्छया कृतवन्त: ।

**पत्नीरूपेण नारी -**

अस्माक संस्कृतौ गृहस्थाश्रमे पत्न्या: स्थानं सर्वोपरि वर्त्तते । सा पतिपरायणा सती संपूर्ण परिवारं संचालयति । सर्वत्र साहित्य दृश्यते पुरुषस्य सहधर्मिणीरूपेण समस्तकार्यं सुचारुरूपेण सम्पादयति । वैदिककाले विश्वामित्र, वशिष्ठ, भरद्वाज प्रभृतय: यथा कवय: मन्त्रद्रष्टार: आस न तथैव श्रद्धाकामायनी, अपला, घोषा, सरस्वती, सूर्या, सेर्पराज्ञी, सावित्री,

अदिति लोपामुद्रा-गार्गी दक्षायणी-इन्द्राणी प्रभृतयो भवन्ति । रामायणेऽपि आदर्शपतिव्रता पत्नीरूपेण रामेण सहसीता सर्वं सफलतया सम्पादयति इति तु निर्विवादनम् । महाभारतानुसारं परिवारे पत्नी, सम्मनीया, पूजनीया, भाग्यवती, पूण्यशीला गृहस्य लक्ष्मी स्वरूपा च । गृहस्य शोभा भवति पत्नी । यस्मिन् सद्मनि पत्नी नास्ति तद् गृहं गृहं न भवतीत्युच्यते-

"न गृहं गअहमित्याहु गृहिणी गृहमुच्यते"

स्कन्दपूराणोऽपियुक्तं स्त्री कार्यकुशलता, पतिव्रता, पुत्रवती मधुरभाषिणि प्रभृति गुणै: साक्षात् लक्ष्मीरिव शोभते-

दक्षा पतिव्रता पुत्री प्रियवाक्यवंशवदा ।
गुणैरमीभि: संयुक्ता सा श्री स्त्रीरूपधारिणी ।।

(स्कन्दपुराणे - ३६/८७)

श्रीमद्भागवतेऽपि मनुपत्नी पुत्रेष्टियज्ञातावरे होतु: कन्याप्रार्थना कृता । यथा-

तत्र श्रद्धा मनोहारी होतारं समचायत ।
दुहित्र्यर्थमुपागम्य प्रणिपत्य पतिव्रता ।।

(श्रीमद्भागवते - ९/१/१४)

तथैव महाभारते कन्याया: महत्त्वं प्रतिपाद्य स्वीकथियते व्यासेन यत् कान्यायां लक्ष्मी निवसतीति ।

संस्कृतसाहित्ये आर्यसंस्कृते: प्रतिनिधिस्वरूप: महाकविकालिदास: स्वकृतिभि: संस्कृतवाङ्मये स्वतन्त्रस्थानमधिकरोति सहृदयानां हृदयेऽपि । तेन कुमारसंभवमहाकाव्ये पार्वत्या: चित्रणमादर्शकन्यारूपेण विहितम् । आर्यसंस्कृतावभीष्टवस्तुप्राप्तये तपस्या एव श्रेष्ठसाधनं भवति । अत: सा मृत्युञ्जयं रूपेण लब्धुं मुनिमहर्षिवत् कठोरतपस्यामाचरिवती।

यथा कुमारसंभवे – इयेष सा कर्त्तुमबन्ध्यरूपतां
समाधिमास्थाय तपोभिरात्मव:
उवाण्यते वा कथमन्यथाद्वयं
तथाविधं प्रेम पतिश्च तादृश:

अन्ततोगत्वा परिशेषे पार्वत्यादुपरि प्रसन्न: भूत्वा आविर्वभूव । येन तस्या अभिलाष: पूर्णतामति स्म । एवं तत्कालिकसमाजे नारीणां स्वतन्त्रतासीदिति तत्कृतिष्ववलोक्यते यथा - अभिज्ञानशाकुन्तले शकुन्तला, कुमारसंभव पार्वती, तथा रघुवंशे इन्दुमती ।

भिप्रायो यत् सृष्टिः शक्त्या संचाल्यते । सा शक्तिः भवति नारीशक्तिः । धर्मशास्त्रादौ नारीणां महत्त्वमनेकशः प्रतिपादितम् । यथा मनुस्मृतौ मनुना प्रतिपाद्यते-

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः

यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ।। (मनु. ३/५६)

उत्कृष्ट सभ्यतानिर्माणे नारीणां भूमिका सुमहतीति अनस्वीकार्या । मुख्यतः नारी त्रिधा इति संस्कृतसाहित्येषु दरीदृश्यते कन्यारूपेण भार्यारूपेण, जननीरूपेण । यतः साहित्यं समाजस्य एव दर्पणः । व्यास-वाल्मीकि-कालिदास-भवभूति प्रभृतिभिः स्व स्व कृतिषु नारीणां महत्त्वं यथाकालं प्रतिपादितम् ।

**१. काव्यारूपेण नारी -**

कन्या साक्षात् लक्ष्मीस्वरूपेति जनश्रुतिः प्रमाणम् । परिवारे कन्याजन्मानन्तरं प्रायशः जनाः वदन्ति यत् लक्ष्मी समायातेति शुभङ्करी । यद्यपि शब्दानुशासने "शोकंकरी कन्या" इति दृश्यते कन्यायाः विशेषणपदं शोकंकरोति प्रदीयते । (शब्दानुशासन मृ. ५.१.१०३) तथापि वैदिकसाहित्ये कन्या संप्रार्थ्यत इति दृश्यते .... । अथ य इच्छेत् दुहिता मे पण्डिता जायते सर्वज्ञातुरियादित् वृहदारण्यकोपनिषद् - ६/४/१७ ।

जीवनस्य लक्ष्यं धर्मार्थकाममोक्षादिचतुवर्गफलप्राप्तिरेव तत्र धर्मार्थकामेषु स्त्रीयः भूमिकापरिहार्या । यथा राामायणे रामः यज्ञानुष्ठानसमये सीताया अभावे स्वर्णमयीसीताप्रतिमां संस्थाप्य धर्माजर्नं कृतवान् यज्ञं संपादितवान् । महाकवि कालिदासः अभिज्ञानशाकुन्तल सप्तमाङ्क निगदति यत् पत्नीत्यागः महत् पापं भवति कस्तस्य धर्मदारपरित्यागिनो नाम संकीर्त्तयितुं चिन्तयिष्यति ? (डा.कपिलदेवदेवी संपादित अभिज्ञानशाकुन्तलम् - ७ अङ्क १-४२१) दाम्पत्यजीवनस्य मार्मिकवर्णनं यथा भवभूतिना कृतं न तथा अन्यत्र । प्रेम दाम्पत्यजीवनं मधुमयं विदधाति । अस्य प्रेमतत्त्वस्य शिक्षा गृहस्थजीवने परमावश्यकी। अस्य सुन्दरवर्णनं भवभूतिना एवं कृतम् -

अद्वैतं सुखदुःखयोरनुगुणं सर्वास्ववस्थासु यत्

विश्राम हृदयस्य यत्र जरसा यस्मिन्नहार्या रसः ।

कालेनावरणात्ययात् परिणते यत्स्नेहसारे स्थितं

भद्रं प्रेम सुमानुषस्य कथमप्येकं हि तत्प्राप्यते ।।

(उत्तररामचरितम् -१/३९)

अस्य प्रेम्णा: प्रतिमूर्त्ति भवति पत्नी वा नारी एतत् प्रेमतत्त्वं केवलं सहृदयहृदयमेव ज्ञातुं समर्थम् - उक्तं च तेन तत्र - हृदयं त्वेव जानाति प्रीतियोगं परस्परं । (उ.रा,च. ६/ ३२)

**जननीरूपेण नारी -**

भारतीयसंस्कृतौ स्त्री ज्ञानुक्तं जननीत्यनलभ्यते । तस्या: सम्मान: क्रियते । उक्तञ्च शास्त्रं मातृवत् परदारेषु इति । तैत्तिरीयोपनिषदि माता साक्षात् देवता इति उपदिशति। यथा - मातृदेवो भव । पुनश्च शास्त्रेषु एतदपि कथ्यते -

मातृतेऽन्य न देव: तस्मात् पूज्या सदा सुत:
गर्भधारणपोषणाद्धि ततो माता गतीपसी ।।

अत: पुरुषापेक्षया मातु: स्थानं सर्वोपरि वर्त्तते । संपूर्णसंसारस्य सृष्टि: विकाश: धारणञ्च मातुरुपति निर्भरं करोति । यदि माता शिक्षिता भवति तहि तस्य: सन्ताना: अपि शिक्षिता भविष्यन्ति । राष्ट्रहिताय शिक्षिता मति एव अपेक्षते । महाभारते माता श्रेष्ठगुरुरिति कथ्यते ।

नास्ति मातृसमो गुरु: (महाभारत शान्तिपर्व १०८/१७) वैदिकसाहित्ये लौकिकसाहित्येऽपि सर्वत्र मातु: प्रशंसा विहिता । भवभूति: उत्तररामचरिते मुक्तकण्ठेनोद्घोषयति यत् - "जननी जन्मभूमिश्च स्वर्गादपि गरीयसीति" ।

**उपसंहार -**

नारी स्नेहश्रद्धाप्रेम्र: प्रतिमूत्ति: । सुखदु:खयो: केन्द्रविन्दु: । तस्या: सुरक्षा अस्माकं रक्षा तस्या: सम्मानोऽस्माकं सम्मान:, तस्यारपमानोऽस्मकमर्पमान एव । उत्कृष्टसमाजसंगठने नारीणां भुक्ता: महत्त्वपूर्णा । स्वयं नारीभिरपि एतदपि चिन्तनीयम् । ताभि:

८. कुमारसंभवम् - ५/२
९. स्कन्दपुराणम् - ३६/८७
१०. काव्यप्रकाश: - १/२
११. ध्वन्यालोक: - १/४
१२. अमिभज्ञानशाकुन्तलम् - ७ अङ्क
१३. उत्तररामचरितम् - ६/३२
१४. महाभारतम् शान्तिपर्व- १०८/१७
१५. मनुस्मृति - ९/८ ।

# आचार्यनिम्बार्कदृष्ट्या श्रीपुरुषोत्तम:

डॉ. सुरेनकुमारमहापात्र:

"एते चांशकला:पुंस: कृष्णस्तु भगवान् स्वयम्"[१] इति श्रीमद्भागवतोक्त-वचनानुसारं कृष्णप्रेम्णा अभिभूत: भगवद्भक्त्या परिपूर्ण: तथा द्वैताद्वैतमतवादस्य प्रवर्त्तक: आचार्य: निम्बार्क: वैष्णवसंप्रदायप्रवर्त्तनेषु अग्रगण्य: । अस्य आचार्यस्य महनीयताविषये भविष्यपुराणे वर्णितं यत् -

"निम्बार्को भगवान् येषां वाञ्छितार्थ प्रदायक:"[२] इति । जनानाम् आधिव्याधि-निवारणाय स्वयं सूर्यदेव: निम्बार्करूपेण संसारे आविर्भुत: । यदा समाजे आचारसंहिताया: परिपालनं न जायते, तस्मिन् समये भगवान् धराधाम्नि आविर्भूय धर्मस्य रक्षां तथा च अधर्मस्य विनाशं करोति । यथोक्तं भगवद् गीतायाम् -

"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ।।
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ।।"[३] इति ।

आर्यावर्त्ते उत्कलभूमि: धर्मधारणाप्रचारप्रसारक्षेत्ररूपेण प्रसिद्धा वर्त्तते । अस्मिन् पवित्रप्रदेशे यथा अनेकेषां धर्मसम्प्रदायानाम् अभिबृद्धिरभवत्, भारतवर्षे परिलक्षितानां धर्मसम्प्रदायानां मूलभूता: भवन्ति सावध: आचार्या: । वेदोपनिषदानिधर्मग्रन्था: एतेषां शास्त्राणां कतिचित् तात्त्विकं गूढरहस्यं विचारयन्त: आचर्या: अस्माकं भारतवर्षे शैव-शाक्त-सौर गाणपत्य वौद्धादि संप्रदाय प्रवर्त्तका: सम्भूता: । एतेषां सर्वेषां संप्रदायानाम् आधारस्थलम् उत्कलप्रदेश इति कपिलसंहितायां वर्णितमस्ति।

श्रीसुदर्शनचक्रवतार: भगवान् निम्बार्काचार्य: एवं क्रमेण आविर्भुत: जात: । तैलङ्ग-ब्राह्मणपरिवारे लब्धजन्मा श्रीनिम्बार्क: । तस्य पिता अरुणमुनि: । कार्त्तिकपूर्ण्णिमायां आचार्य: निम्बार्क: धराधाम्नि अवतरित: । वाल्यकालादारभ्य: तस्य अलौकिकी लीला

सर्वजनगोचरीभूता जाता ।

ब्रह्मसूत्रग्रन्थोपरि आचार्यस्य निम्बार्कस्य तत्त्वपूर्णग्रन्थ: वर्त्तते वेदान्तपारिजात-सौरभम् । तस्य शिष्य: शङ्कावतार: आचार्य: श्रीनिवास: एतं भाष्यग्रन्थम् आधारीकृत्य वेदान्तकौस्तुभनामकं विस्तृतव्याख्याग्रन्थं कृतवान् ।

**निम्बार्कस्य दार्शनिकविचार :-**

निम्बार्कमते "द्वैत" तथा "अद्वैत" उभयोरपि सत्यं श्रुति मूलकं च एतेषां मते द्वैत अद्वैतयो: श्रुति: एक वद । अत: केवलं अद्वैतं स्वीकार्य द्वैतस्य निरामकरणं वा द्वैतं स्वकार्य अद्वैतस्य निराकरणं अनुचितम् । केवलं एक स्वीकार्य । अपरस्य व्याख्या असम्भव। अन्ये वेदान्तीनामिव निम्बाकाचार्यमपि परम कर्मतत्त्वं स्वीकृतवान् । रामानुजाचार्य एकं मध्वाचार्ये यामकाशात् एवमेव पार्थव्यं यत् उभयो नारायणं अथवा विष्णुं ब्रह्म इति स्वीकुर्वन्ति । परन्तु वल्लभ इव निम्बार्क: केवलं गोपाल कृष्णं एव ब्रह्म इति स्वीकुर्वन्ति। निम्बार्काचार्य रचित दशोश्लोक्यां वर्ण्णितं यत् -

"स्वत्ताबतोऽप्राप्त समस्तदोषमशेषकल्याणगुणैकराशमि व्युहाङ्गिनं व्रह्मपरं वरेण्यं ध्यायेन-कृष्णं कमलेक्षणं हरिम् ।।

श्रीराधा भगवत: आद्य सहधर्मि इति दोषव्य । अस्य जगत: निमित्त: उपदानकारणं च ब्रह्मण इश्वर: मकाशात् अस्य जगत: सृष्टि: केवलं लीला इति । अनेन तम्य इश्वरस्य किमपि प्रयोजनं नास्ति । जीव: कर्त्ता भोक्ता च । जीव: केवलं नज्ञानस्वरूप: ज्ञातं ज्ञातृत्वं धर्मवित् च ज्ञानं जीवस्य उभय स्वरूपं एवं धर्मं च । रामानुजाचार्य: एवं निम्बाकाचार्यये: मतानुसारं जीव: अणुपरिणामस्वरूप: प्रेत्येण शरीरे जीव: भिन्नभिन्न अत: जीव: अनन्त इति उक्तं च -

"ज्ञान-स्वरूपं च हरेरधिनं शरीरसंयोगवियोग योग्य ।
अणुं हि जीवं प्रतिदेहभिन्नं ज्ञानृत्व वन्तं यवनन्तमाहु" [३] ।।

वहु अंशी तथा जीव: अंश: वह उपास्य तथा जीव: उपासक:, तथा च वहु ज्ञेय: जीव: ज्ञाता च । अत: जीवब्रह्मयो: भेद: स्वीकार्य:, तद्वत् ब्रह्म तथा जगत्तयो: मध्ये पार्थक्यं सुस्पष्टं । ब्रह्मकारणं तथा जगतकार्यं च । ब्रह्म चेतनं तथा जगत् अचेतन: अत: पक्षेस्मिन् ब्रह्म अपरपक्षे चिदचि- द्वयो: स्वाभाविकं भेदं वर्त्तमानम् । वस्तुत: भेदाभे

दये: मध्ये उभयो: सत्यमिति । कार्यकारणं वा अंशाशी मध्ये सम्बन्ध: भेदाभेदात्मकम् । तै परस्परयो: न भिन्म् नाऽपि अभिनम् । स्वरूपत: कार्यऽ कारणमकाशात् इति वोधव्यम्। परन्तु कार्ये स्वकीया विशिष्टाकृति: गुणं एवं क्रिया: विद्यमान हेतो: कारण सकाशात् भेदाभे इव । अत: निम्बार्कस्य मतवादम् स्वभाविकतया भेदोभदमिति कथ्यते ।

**श्री श्री पुरुषोत्तममहात्म्यम् -**

श्रीजगन्नाथस्यव प्राचीन नाम भवति श्रीपुरुषोत्तम: इति । अस्मिन् पुण्ये उत्कलप्रदेशे श्रीश्रीपुरुषोत्तमक्षेत्रे उत्कलीयानां इष्टदेव रूपेण उत्कलीय संस्कृते: पृष्ठपोषकरूपेण च जगत:नाथ: श्रीजगन्नाथ: श्रीमन्दिरे विराजमाना: भवन्ति । तत्त्वयामलग्रन्थेपि वर्णितं यत्-

"भारतचोत्कलदेशे भूस्वर्गे पुरुषोत्तमे ।

दारुरूपी जगन्नाथ: भक्तानांमभयपद: ।।[८] इति

अपिच शक्तिसङ्गम तन्त्रे वर्ण्णितं यत् -

"जगन्नाथप्रान्तदेशश्चोत्कल: परिकीर्त्तित: ।।[९] इति

श्रीजगन्नाथस्य मूर्त्ति यथा रहस्यात्मिका तथैव तत्त्वमपि रहस्याबृत्तम् च । तद्विषये विभिन्ना: गवेषका: विभिन्न समये भिन्न भिन्न रूपेण व्याख्यां कुर्वन्ति । श्रीजगन्नाथ: न कस्यापि निर्दिष्ट धर्मस्य प्रचारक: । जगत:नाथ:श्रीजगन्नाथ: समग्रसृष्टौ यावन्त: जीवा: अजीवा: च विद्यन्ते तेषां सर्वेषां

"अपाणिपादो यवनग्रहीता, पश्यत्यचक्षु: म शृशोत्यकर्ण्ण: ।

म देत्तिवेद्यं न च सोस्ति वेत्ता तमाहुरस्यं पुरुषं महान्तम् ।।

हस्तपदरहित: परंब्रह्मं पुरुषोत्तममेव सर्वत्र विराजन्ते तस्मात् मकाशात् सर्वासां सत्त्वानां उत्पत्ति: समाहारोपि अत: शिशु - संहितायामपि वर्ण्णितं यत् -

"ज कार स्तु जगन्नाथो वलभद्रो ग कारक: ।

ना कारस्तु सुभद्रा च थ कारोऽपि सुदर्शन: ।।[११]

अत: स्पष्टं अनुमीयते, सर्वासां सत्त्वानां श्रीजगन्नाथ एव स्रष्टा धाता, नियन्ता च। एवं परिलक्षते यत् विभिन्न मतावलम्विन: महापुरुषा: अन्तिम समये श्रीक्षेत्रमागत्य तेषां मतवादं परित्यज्य श्रीजगन्नाथधर्म प्रचारे निमग्ना: सन्त: लवण इव विलीना: जाता:।

वृहत् नारदीय पुराणे श्रीक्षेत्रस्य माहात्म्य प्रसङ्गे वर्ण्णितं यत् -

"तथा समस्ततीर्थानं वरिष्ठं पुरुषोत्तमम् ।

सेनानीनां यथा स्कन्द: सिद्धानां कपिलोयथा ।।

वसूनां पावको यद्वव द्रुद्राणां शङ्करो यथा" इति ।

अस्य क्षेत्रस्य महात्म्यमनुभूय निम्बार्काचार्यैव विशिष्ट व्रह्बवित् शैव शाक्त - वैष्णवादि सर्वेषु तीर्थेषु श्रेष्ठ: तथा मोक्ष-क्षेत्र रूपेण स्वीकृतवान् । अस्मिन् प्रसङ्गे विभिन्नेषु पुराणेषु वर्णितं यत् -

एवं श्रीजगन्नाथमाश्रित्य अत्रत्यानाम् आचार्याणां साधुनां विदूषां च मतवादा: एव सम्मिलिता: सन्ति । एतदर्थं शङ्खक्षेत्रे श्रीक्षेत्रे श्रीजगन्नाथपुर्यां सर्वै: एतै: महापुरुषै: आश्रमा: संस्थापिता: स्वस्वमतवाद: अपि प्रसारित: । इति ॐ ।

---

**सन्दर्भाः**

१. श्वेताश्वतरोपनिषद् -

२. वृहन्नारदीयपुराणम् - ५२/१४ ।

३. वृहद्धर्मपुराणम् - १४/३२ ।

—०—

*अध्यापक:, संस्कृतविभाग:, रामनगरमहाविद्यालय:*

*देपाल:, पूर्बमेदिनीपुरम्, पश्चिमवङ्ग:*